[illegible] विशी॥ संतम

[illegible]

5932

106 complete

म. नि. तं. १

ॐ श्रीगणेशाय नमः ॐ श्रीगुरुचरणकमलेभ्यो
नमः गिरीशृंगे रम्ये नानारत्नोपशोभिते
नानावृक्षलताकीर्णे नानापक्षिरवैर्युते सर्वर्त्तु
कुसुमामोदमोदिते सुमनोहरे शैत्यसौगंध्य
मांद्याढ्यमरुद्भिरुपवीजिते अप्सरोगणसंगी
तकलध्वनिनिनादिते स्थिरच्छायद्रुमच्छायाच्छा
दिते स्निग्धमंजुले मत्तकोकिलसंदोहसंघुष्ट
विपिनांतरे सर्वदा स्वगणैः सार्द्धमृतुराजनिषे
विते सिद्धचारणगंधर्वगाणपत्यगणैर्वृते त
त्र मौनधरं देवं चराचरजगद्गुरुं सदाशिवं सदा
नंदं करुणामृतसागरं कर्पूरकुंदधवलं शुद्धसत्व
मयं विभुं दिगंबरं दीननाथं योगींद्रं योगिवल्लभं
गंगाशीकरसंसिक्तजटामंडलमंडितं विभूतिभू
षितं शांतं व्यालमालं कपालिनं त्रिलोचनं त्रिलोके
शं त्रिशूलवरधारिणं आशुतोषं ज्ञानमयं कैवल्य
फलदायकं निर्विकल्पं निरातंकं निर्विशेषं नि
रंजनं सर्वेषां हितकर्त्तारं देवदेवं निरामयं प्र
सन्नवदनं वीक्ष्य लोकानां हितकाम्यया विनया
वनता देवी पार्वती शिवमब्रवीत् पार्वत्युवाच

देवदेव जगन्नाथ मन्नाथ करुणानिधे त्वदधीनास्मि
देवेश तवाज्ञाकारिणी सदा विना त्वया मया किंचिज्ज्ञा
षितुं नैव शक्यते कृपावलेशो मयि चेत्तवेहास्ति य
दि मां प्रति तदा निवेद्यतां किंचिन्मनसा यद्विचारितं
त्वदग्रे संशयस्यास्य कस्त्रिलोक्यां महेश्वर छेत्ता भवि
तमेहावा सर्वज्ञः सर्वशास्त्रवित् सदाशिव उवाच
किमुच्यते महाप्राज्ञे कथ्यतां प्राणवल्लभे यदकथ्यं ग
णेशेपि स्कंदे सेनापतावपि तवाग्रे कथयिष्यामि सु
गोप्यमपि यद्भवेत् किमस्ति त्रिषु लोकेषु गोपनीयं
तवाग्रतः मम रूपासि देवि त्वं न भेदोस्ति त्वया मम
सर्वज्ञा किं न जानासि त्वं न भिन्नेव पृच्छसि इति देव व
चः श्रुत्वा पार्वती हृष्टमानसा विनयावनता साध्वी
परिपप्रच्छ शंकरं श्रीआद्योवाच भगवन्सर्वभूतेश
सर्वधर्मविदांवर कृपावता भगवता ब्रह्मान्तर्यामिना
पुरा प्रकाशिताश्चतुर्वेदाः सर्वधर्मोपबृंहिताः वा
र्णाश्रमादिनियमा यत्रैव प्रतिष्ठिताः तत्तत्क्रियायोग
यज्ञाद्यैः कर्मभिर्भुवि मानवाः देवान्पितॄन्प्रीणयंतः
पुण्यशीलाः कृते युगे स्वाध्यायध्यानतपसा दयादा
नैर्जितेंद्रियाः महाबला महावीर्या महासत्वपराक्र
माः देवायतनगा मर्त्या देवकल्पा दृढव्रताः सत्यय

म॰ नि॰
तं॰
१
2

र्मपराः सर्वे साधवः सत्यवादिनः राजानः सत्यसंकल्पाः
प्रजापालनतत्पराः मातृवत्परयोषित्सु पुत्रवत्परसू
नुषु लोष्ठवत्परवित्तेषु पश्यन्तो मानवास्तदा आसन्
स्वधर्मनिरताः सदा सन्मार्गवर्तिनः न मिथ्याभाषि
णः केचित्त्र प्रमादरताः क्वचित् न चौरा न परद्रोहका
रकानष्टाशयाः न मत्सरा नातिकृष्टा नातिलुब्धा न
कामुकाः सदन्तः करुणाः सर्वे सर्वदानन्दमानसाः प्र
मयाः सर्वे सस्याढ्याः पर्जन्याः कालवर्षिणः गावोपि दु
ग्धसंपन्नाः पादपाः फलशालिनः नाकालमृत्युस्तत्रासी
न्न दुर्भिक्षं न वा रुजः हृष्टाः पुष्टाः सदारोग्यास्तेजोरू
पगुणान्विताः स्त्रियो न व्यभिचारिण्यः पतिभक्तिपरा
यणाः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः स्वाचारवर्तिनः
स्वैः स्वैर्धर्मैर्यजन्तस्ते निस्तारपदवीं गताः कृते व्यती
ते त्रेतायां दृष्ट्वा धर्मव्यतिक्रमं वेदोक्तकर्मभिर्मर्त्या
न शक्ताः स्वेष्टसाधने बहुक्लेशकरं कर्म वैदिकं भू
रिसाधनं कर्तुं न योग्या मनुजाश्चिन्ताव्याकुलमान
साः त्यक्तुं कर्तुं न वार्हन्ति सदा कातरचेतसः वेदार्थ
युक्तशास्त्राणि स्मृतिरूपाणि भूतले तदा त्वं प्रकटी
कृत्य तपःस्वाध्यायदुर्बलान् लोकानुत्तारयः पापात्
दुःखशोकामयप्रदात् त्वां विना कोस्ति जीवानां घो

रसंसारसागरे मग्नानामुद्धर्त्तापितृवत्प्रियकृत्
प्रभुः ततोपिहापुरेप्राप्तेसत्यकमहत्तोज्झिते ध
र्मार्थलोपेमनुजेप्राधिव्याधिसमाकुले संहिताद्यु
पदेशेनत्वयैवोद्धारितानराः प्रायातेपापिनिकलौ
सर्वधर्मविलोपिनि दुराचारेदुष्प्रपंचेदुष्टकर्मप्रव
र्त्तके नवेद[illegible]प्रभवस्तत्रसत्तीनांस्मरणंकृतः नाने
तिहाससुक्तानांनानामार्गप्रदर्शिनां बहूलानांपुरा
णानांविनाशोभविताविभो तदालोकाभविष्यंतिय
मकर्मबहिर्मुखाः उच्छृंखलामदोन्मत्ताःपापकर्म
रताःसदा कामक्रोधलोलुपाक्रूरानिष्ठुरादुर्मुखाःश
ठाः स्वल्पायुर्मंदमतयोरोगशोकसमाकुलाः
निःश्रीकानिर्बलानीचानीचाचारपरायणाः नीच।
संसर्गनिरताःपरवित्तापहारिकाः परनिंदापरा।
द्रोहपरीवादपराःखलाः परस्त्रीहरणेपापाःशंका
भयविवर्जिताः निर्धनामलिनादीनादरिद्राश्चिर
रोगिणः विप्राःशूद्रसमाचाराःसंध्यावंदनवर्जिताः
अयाज्ययाजकालुब्धादुर्हीनाःपापकारिणः असत्
त्यभाषिणोमूर्खादांतिकादुष्प्रपंचकाः कन्याविक्र
यिणोव्रात्यास्तपोव्रतपराङ्मुखाः लोकप्रतारणार्थी
यजपपूजापरायणाः पाषंडाःपतितंमन्याश्रद्धाम

म॰नि॰ तं॰ ३

3

क्तिविवर्जिताः कदाहाराः कदाचाराश्छलकाः शूद्र
सेवकाः शूद्रान्नभोजिनः क्रूरा वृषलीरतिकामुकाः
दास्यंति धनलोभेन स्वदारान्नीचजातिषु ब्राह्मणाएव चि
ह्नमेतावत्केवलं सूत्रधारणं नैवपानादिनियमा
भक्ष्याभक्ष्यविवेचनं धर्मशास्त्रे सदा निंदा साधुद्रो
हा निरंतरं सत्कथालापमात्रं वचनं तेषां मनसि क्वा
चित् त्वयाकृतानि तंत्राणि जीवोद्धारणहेतवे नि
गमागमजातानि भुक्तिमुक्तिकराणि च देवीनां च
देवानां मंत्रयंत्रादिसाधनं कथिता बहवो न्यासाः
सृष्टिस्थित्यादिलक्षणाः बद्धपद्मासनादीनि गदि
तान्यपि भूरिशः पशुवीरदिव्यभावा देवतामंत्रसि
द्धिदाः शवासनं चितारोहो मुंडसाधनमेव च
लतासाधनकर्माणि त्वयोक्तानि सहस्रशः पशुभा
वदिव्यभावौ स्वयमेव निवारितौ कलौ न पशुभा
वोस्ति दिव्यभावः कुतो भवेत् पत्रं पुष्पं फलं तोयं स्व
यमेवाहरेत्पशुः न शूद्रदर्शनं कुर्यात् मनसा न स्त्रियं
स्मरेत् दिव्यश्च देवताप्रायः शुद्धांतःकरणः सदा
द्वंद्वातीतो वीतरागः सर्वभूतसमः क्षमी कलिक
ल्मषयुक्तानां सर्वदा स्थिरचेतसां निद्रालस्यप्रस
क्तानां भावशुद्धिः कथं भवेत् वीरसाधनकर्माणि

पंचतत्तोदितानिच मद्यंमांसंतथामत्स्यमुद्रामैथुनमे
वच एतानिपंचतत्त्वानित्वयाप्रोक्तानिशंकर कलिजा
मानवालुब्धाशिश्नोदरपरायणाः लोभात्तत्रपतिष्यंति
नकरिष्यंतिसाधनं इंद्रियाणांसुखार्थायपीत्वाचवहु
लंमधु भविष्यंतिमदोन्मत्तहिताहितविवर्जिताः प
रस्त्रीधर्षकाकेचिद्दस्यवोवहवोभुवि नकरिष्यंतिते
मत्ताः पापयोनिविचारणं अतिपानादिदोषेणरोगिणो
वहवः क्षितौ शक्तिहीनाबुद्धिहीनाश्चत्वाचविकलेंद्रि
याः हृदेगर्तेप्रांतरेचप्रासादात्पर्वतादपि पतिष्यंतिम
रिष्यंतिमनुजामदविह्वलाः केचिद्विवादयिष्यंतिगु
रुभिःस्वजनैरपि केचिन्मौनामृतप्रायाअपरेवहुजल्प
काः अकार्यकारिणःक्रूराधर्ममार्गविलोपकाः हि
ताययानिकर्माणिकथितानित्वयाप्रभो मन्येतानिम
हादेवविपरीतानिमानवे केवायोगंकरिष्यंतिन्यास
जातानिकेपिवा स्तोत्रपाठंयंत्रलिपिंपुरश्चर्यांजगत्पते
युगधर्मप्रभावेनस्वभावेनकलौनराः भविष्यन्तितु
र्धृताः सर्वेपापकारिणः तेषामुपायंदीनेशकृपया
कथयप्रभो आयुरारोग्यवर्चस्वंवलवीर्यविवर्द्धनं
विद्याबुद्धिप्रदंनृणामप्रयत्नशुभंकरं येनलोकाभवि
ष्यंतिमहावलपराक्रमाः शुद्धचित्ताःपरहितामातापित्रोः

प्रियंकराः स्वदारनिष्ठाः पुरुषाः परस्त्रीषु पराङ्मुखाः दे
वतागुरुभक्ताश्च पुत्रस्वजनपोषकाः ब्रह्मज्ञा ब्रह्मविद्या
श्च ब्रह्मचिंतनमानसाः सिद्ध्यर्थं लोकयात्रायाः कथय
स्वहिताय यत् कर्तव्यं यदकर्तव्यं वर्णाश्रमविभेदतः
विना त्वां सर्वलोकानां कस्त्राता भुवनत्रये ॥ इति श्रीम
हानिर्वाणतंत्रे सर्वतंत्रोत्तमोत्तमे सर्वधर्मनिर्णयसा
रे श्रीमदाद्यासदाशिवसंवादे जीवनिस्तारोपायप्रश्नः
प्रथमोल्लासः ॥ १ ॥ इति देव्या वचः श्रुत्वा शंकरो लोक
शंकरः कथयामास तत्त्वेन महाकारुण्यवारिधिः ॥ श्री
सदाशिव उवाच ॥ साधु पृष्टं महाभागे जगतां हितकारि
णि एतादृशः शुभः प्रश्नो न केनापि पुराकृतः धन्यासि
कृतकृत्यासि हितासि कलिजन्मनां यदुक्तं त्वया भ
द्रे सत्यं सत्यं यथार्थतः सर्वज्ञा त्वं त्रिकालज्ञा धर्मज्ञा पर
मेश्वरि भूतं भवद्भविष्यं च धर्मयुक्तं त्वया प्रिये यथातथं
यथान्यायं यथायोग्येन संशयः कलिकल्मषदीनानां ।
द्विजादीनां सुरेश्वरि मेध्यामेध्याविचाराणां न शुद्धिः श्रौ
तकर्मणां न संहिताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणां भवेत्
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं मयोच्यते विना ह्यागममा
र्गेण कलौ नास्ति गतिः प्रिये श्रुतिस्मृतिपुराणादौ मयै
वोक्तं पुरा शिवे आगमोक्तविधानेन कलौ देवान्यजेत्सु

धीः कलावागममुल्लंघ्य योन्यमार्गे प्रवर्त्तते न तस्य ग
तिरस्तीति सत्यं सत्यं न संशयः सर्वैर्वेदैः पुराणैश्च स्मृ
तिभिः संहितादिभिः प्रतिपाद्योस्मि नान्योस्ति प्रभुर्ज
गति मां विना आमनंति च ते सर्वे मत्पदं लोकपावनं म
न्मार्गविमुखा लोकाः पाषंडा ब्रह्मघातिनः अतो मन्मत
मुत्सृज्य यो यः कर्म समाचरेत् निष्फलं तद्भवेद्देवि कर्त्ता
पि नारकी भवेत् मूढो मन्मतमुत्सृज्य योन्यन्मतमुपा
श्रयेत् ब्रह्महा पितृहा स्त्रीघ्नः स भवेन्नात्र संशयः कलौ
तंत्रोदिता मंत्राः सिद्धास्तूर्णफलप्रदाः शस्ताः कर्मसु स
र्वेषु जपयज्ञक्रियादिषु निर्वीर्याः श्रौतजातीया विष
हीनोरगा इव सत्यादौ सफला आसन् कलौ ते मृतका इ
व पांचालिका यथा भित्तौ सर्वेंद्रियसमन्विताः अमूर
शक्ताः कार्येषु तथान्ये मंत्रराशयः अन्यमंत्रैः कृतं कर्म
वंध्यास्त्रीसंगमो यथा न तत्र फलसिद्धिः स्याच्छ्रम एव हि
केवलं कलावन्योदितैर्मार्गैः सिद्धिमिच्छति यो नरः
तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः मदुक्तादुदि
तं धर्मं हित्वान्यद्धर्ममीहते अमृतं स्वगृहे त्यक्त्वा क्षीर
मार्कं स वांछति नान्यः पंथा मुक्तिहेतुरिहामुत्र सु
खाप्तये यथा तंत्रोदितो मार्गो मोक्षाय च सुखाय च तं
त्राणि बहुयोक्तानि नानाख्यानान्वितानि च सिद्धानां।

म. नि.
तं.
५
5

साधकानांचविधानिचभूरिशः अधिकारिविभेदेन
पशुवाद्कल्पनःप्रिये कुलाचारादितंत्रेषुयमेगुप्तार्थंकथि
तंक्वचित् जीवप्रवृत्तिकारीणिकानिचित्कथितान्यपि
देवानानाविधाःप्रोक्तादेव्योपिबहुधाप्रिये भैरवाश्च
वेतालाबटुकानायिकागणाः शाक्ताःशैवावैष्णवा
श्चसौरागाणपतादयः नानामंत्राश्चयंत्राणिसिद्धोपा
यान्यनेकशः भूरिश्रयासमाध्यानियथोक्तफलदानि
च यथायथाकृताःप्रश्नायेनयेनयदायदा तदातस्यो
पकारायतथैवोक्तंमयाप्रिये सर्वलोकोपकारायस
र्वप्राणिहितायच युगधर्मानुसारेणयथानुष्ठेनया
धेति त्वयायादृक्कृताःप्रश्नानकेनापिपुराकृताः त
वस्नेहेनवक्ष्यामिसारात्सारंपरात्परं वेदानामागमा
नांचतंत्राणांचविशेषतः सारमुद्धृत्यदेवेशितवाग्रे
कथितंमया यथानरेषुतेजस्वाःसरितांजाह्नवीयथा
था यथाहंत्रिदिवेशानामागमानामिदंतथा किंवे
दैःकिंपुराणैश्चकिंशास्त्रैर्बहुभिःशिवे विज्ञातेस्मि
न्महातंत्रेसर्वसिद्धीश्वरोभवेत् यतोजगन्मंगलाय
त्वयाहंविनियोजितः अतस्तेकथयिष्यामियद्विश्व
हितकृद्भवेत् कृतेविश्वहितेदेविविश्वेशःपरमेश्व
रि प्रीतोभवतिविश्वात्मायतोविश्वंतदाश्रितं स

एकएवसद्रूपःसत्योद्वैतःपरात्परः स्वप्रकाशःस
दापूर्णःसच्चिदानंदलक्षणः निर्विकारोनिराधारोनि
विशेषोनिराकुलः गुणातीतःसर्वसाक्षीसर्वात्मास
र्वदृग्विभुः गूढःसर्वेषुभूतेषुसर्वव्यापीसनातनः
सर्वेंद्रियगुणाभासःसर्वेंद्रियविवर्जितः लोकाती
तोलोककृत्तरवाङ्मनसगोचरः सवेत्तिविश्वंसर्वज्ञ
स्तंनजानातिकश्चन तदधीनंजगत्सर्वंत्रैलोक्यंस
चराचरं तदवलंबनात्तिष्ठेदवितर्क्यमिदंजगत्
तत्सत्यतामुपाश्रित्यसद्वद्भातिपृथक्पृथक् तेने
वहेतुभूतेनवयंजातामहेश्वरि कारणंसर्वभूता
नांसएकःपरमेश्वरः लोकेषुसृष्टिकरणात्स्रष्टा
ब्रह्मेतिगीयते विष्णुःपालयितादेविसंहर्ताहंत
दिच्छया इंद्रादयोलोकपालाःसर्वेतद्वशवर्तिनः
स्वेस्वेधिकारेनिरतास्तेशासतितदाज्ञया त्वंपराप्र
कृतिस्तस्यसूक्ष्मात्रिभुवनत्रये तेनांतर्यामिरूपेण
तत्रहिविषयोजिताः स्वंस्वंकर्मप्रकुर्वंतिनस्वतं
त्राःकदाचन यद्भयाद्वातिवातोपिसूर्यस्तपतिय
द्भयात् वर्षतितोयदःकालेपुष्यंतितरवोवने
कालंकालयतेकालेमृत्योर्मृत्युर्भियोभयं वेदांत
वेद्योभगवान्यतत्त्वोपलक्षितः सर्वेदेवाश्चदे

म. नि.
तं.
९
6

मुष्यतन्मयाः सर्वेविदिते आब्रह्मस्तंबपर्यंतंतन्मयंस
कलंजगत् तस्मिंस्तुष्टेजगत्तुष्टंप्रीणितेप्रीणितंजग
त् तदाराधनतोदेविसर्वेषांप्रीणनंभवेत् तरोर्मूला
भिषेकेनयथातद्भुजपल्लवाः तृप्यंतितदनुष्ठानात्तथा
सर्वेमरादयः यथानवार्चनाध्यानास्वजनाज्जपनाच्छ्रि
ये भवंतिबद्धाःसंर्दयोस्तथाजानीहिसुव्रते यथाग
च्छंतिसरितोवशेनापिसरित्पतिं तथार्चादीनिकर्मा
णितद्देशानिपार्वति योयोयांयांयजेद्देवान्श्रद्ध
यायदाशये तस्तद्ददातिसोध्यक्षस्तैस्तैर्देवगणैः
शिवे बहुनात्रकिमुक्तेनतवाग्रेकथ्यतेप्रिये ध्येयः
इज्यःस्वाराध्यस्तंविनानास्तिमुक्तये नायासोनो
पवासश्चकायक्लेशोनविद्यते नैवाचारादिनियमा
नोपचारास्तुभूरिशः नदिक्कालविचारोस्तिनमुद्रा
न्यासंसंहतिः यस्मात्येनकलेशानितेविनाकोन्य
माश्रयेत् इतिश्रीमहानिर्वाणतंत्रेसर्वतंत्रोत्तमोत्त
मेसर्वधर्मनिर्णयसारेश्रीमदाद्यासदाशिवसंवा।
देजीवनिस्तारोपायप्रश्नोत्तरेब्रह्मोपासनक्रमो
नामद्वितीयोल्लासः २ श्रीदेव्युवाच देवदेवमहा
देवदेवानांगुरोर्गुरो वक्तात्वंसर्वशास्त्राणांमंत्रा।
णांसाधनस्यच कथितंयत्त्वयाब्रह्मपरमेशपरात्परं

यस्योपासनतो मर्त्यो भुक्तिं मुक्तिं च विंदति केनोपाये
न भगवन्परमात्मा प्रसीदति किं तस्य साधने देव मंत्रः
को वा प्रकीर्तितः किं ध्याने किं च दाने च परेशस्य परा।
त्मनः तत्वेन श्रोतुमिच्छामि कृपया कथय प्रभो
श्रीसदाशिव उवाच अतिगुह्यं परं तत्वं शृणु मत्प्राण
वल्लभे रहस्यमेतत्कल्याणि न कुत्रापि प्रकाशितं
तव स्नेहेन वक्ष्यामि मम प्राणाधिकं परं ज्ञेयं भवति
तद्ब्रह्म सच्चिद्विशिष्टमव्ययं परं यथा तथ्यस्वरूपेण लक्ष।
णैर्वा महेश्वरि सत्तामात्रे निर्विशेषमवाङ्मनसगो
चरं असत्त्रिलोकी सद्भानं स्वरूपं ब्रह्मणः स्मृतं समा
धियोगैस्तद्वेद्यं सर्वत्र समदृष्टिभिः द्वंद्वातीतं निर्वि
कल्पं देहाद्यात्मासवर्जितैः यतो विश्वं समुद्भूतं येन
जातं च तिष्ठति यस्मिन्सर्वाणि लीयंते तेते यत्तद्ब्रह्मल
क्षणैः स्वरूपबुद्ध्या यद्वेद्यं तदेव लक्षणैः शिवे लक्ष।
णैरात्मसिद्ध्यर्थं विहितं तत्र साधनं तत्साधने प्रवक्ष्या
मि शृणुष्वावहिता प्रिये तत्रादौ कथयाम्याद्यं मंत्रो।
द्धारं महेश्वरि प्रणवं पूर्वमुद्धृत्य सच्चित्पदमुदाह
रेत् एकं पदं तेन ब्रह्मेति मंत्रोद्धारः प्रकीर्तितः संधि
क्रमेण मिलितं सप्तार्णोऽयं मनुर्मतः तारहीनेन देवे
शि षट्वर्णोऽयं मनुर्भवेत् सर्वमंत्रोत्तमः साक्षाद्धर्मा

म॰ नि॰ तं॰ ७

यकाममोक्षदः नात्रसिद्धाद्यपेक्षास्तिनारिमित्रादिदूष
णं नतिथिर्नचनक्षत्रंनराशिगणनंतथा कुलाकु
लादिनियमोनसंस्कारोत्रविद्यते सर्वथासिद्धमंत्रोयं
नात्रकार्याविचारणा बहुजन्मार्जितैःपुण्यैः सद्गुरु
र्यदिलभ्यते तदासाक्षाद्गुरोर्लब्ध्वाजन्मसाफल्यमाप्नु
यात् चतुर्वर्गकरेहस्तगतोपरत्रेहचमोदते सधन्यःसकृ
तार्थश्चसकृतीसचधार्मिकः सस्नातःसर्वतीर्थेषु
सर्वयज्ञेषुदीक्षितः सर्वशास्त्रेषुनिष्णातः सर्वलो।
कप्रतिष्ठितः यस्यकर्णपथोपांतप्राप्तोमंत्रमहा।
मणिः धन्यामातापितातस्यपवित्रंतत्कुलंशिवे पि
तरस्तस्यसंतुष्टामोदंतेत्रिदशैःसह गायंतिगाय
नीगाथांपुलकांकितविग्रहाः अस्मिन्कुलेकुलश्रे।
ष्ठोजातोब्रह्मोपदेशिकः किमस्माकंगयापिंडैः किं
तीर्थश्राद्धतर्पणैः किंदानैःकिंजपैर्होमैःकिमन्यै।
र्बहुसाधनैः वयमक्षय्यतृप्ताःस्मः सत्पुत्रस्यास्यसाध
नात् शृणुदेविजगद्वंद्येसत्यंसत्यंमयोच्यते परब्रह्मो
पासकानांकिमन्यैःसाधनांतरैः मंत्रग्रहणमात्रेण
देहीब्रह्ममयोभवेत् ब्रह्मभूतस्यदेवेशिकिमसा
ध्यंजगत्त्रये किंकुर्वंतिग्रहाःरुष्टावेतालश्चेटुकादयः
पिशाचागुह्यकाभूताडाकिन्योमातृकादयः तस्य।

दर्शनमात्रेणपलायंतेपराङ्मुखाः रक्षितोब्रह्ममंत्रेण
प्राप्नोतिब्रह्मतेजसा किंबिभेतिग्रहादिभ्योमार्तंडइवचा
परः तेदृष्ट्वाभयमापन्नाःसिंहंदृष्ट्वायथागजाः विद्र
वंतिवनंयांतिपतंगाइवपावके नतस्यदुरितंकिंचि
द्रस्तिनिष्टस्यदेहिनः सत्यव्रतस्यशुद्धस्यसर्वप्राणि
हितस्यच कोवोपद्रवमन्विच्छेदात्मापघातकंविना
यज्ञहंतिखलाःपापाःपरब्रह्मोपदेशिनं स्वद्रोहा
तेप्रकुर्वंतिनात्रिविकारायतःसतः सत्वसर्वहितःसा
धुःसर्वेषांप्रियकारकः तस्यानिष्टकृतेदेविकोवा
स्यान्निरुपद्रवः मंत्रार्थंमंत्रचैतन्यंयोनजानातिसाध
कः शतलक्षप्रजप्तोपिनस्यमंत्रोनसिद्ध्यति अतोस्या
र्थंचचैतन्यंकथयामिशृणुप्रिये अकारेणजगत्पाता
संहर्तास्यादुकारतः मकारेणजगत्स्रष्टाप्रणवार्थउ
दाहृतः सद्धृदेनमदाख्यापिविचैतन्यप्रकीर्तितं
पकमद्वैतमीशानिहृदत्वाद्धृह्मगीयते मंत्रार्थःका
थितोदेविसाधकाभीष्टसिद्धिदः मंत्रचैतन्यमेतद्धि
तदधिष्ठातृदेवता तज्ज्ञानेपरमेशानिभक्तानांसि
द्धिदायकं तस्याधिष्ठातृदेवेशिसर्वव्यापिसनातनं
अवितर्क्यंनिराकारंवाचातीतंनिरंजनं वाङ्मयाकम
लाद्येनतारहीनेनपार्वति दीयतेविविधाविद्यामा

म. नि. याष्टौ: सर्ववतोमुखी तारेणतारहीनेन प्रत्येकं सक
तं. लं पदं युग्मयुग्मक्रमेणापि मंत्रोयं विविधो भवेत्
८ ऋषिः सदाशिवोयस्य छंदोनुष्टुबुदाहृते देवतापरम
8 ब्रह्म सर्वांतर्यामि निर्गुणं चतुर्वर्गफलावाप्तये विनि।
योगः प्रकीर्तितः अंगन्यासकरन्यासौ कथयामि शृणु
प्रिये तारेसच्चिदेकमिति ब्रह्मेति सकलं ततः अंगु
ष्ठतर्जनीमध्यानामिकासु महेश्वरि कनिष्ठयोः करत
लपृष्ठयोः स्वरं विदिते नमः स्वाहा वषट् हुं वौषट् फडं
ते [illegible] यथाक्रमं न्यसेन्न्यासौ कविधिना साधकः सुस
माहितः हृदादिकरपर्यंतमेवमेव विधीयते प्राणा
यामं ततः कुर्यान्मूलेन प्रणवेन वा मध्यमानामिका
भ्यां च दक्षहस्तस्य पार्वति वामनासापुटं धृत्वा दक्षना
सापुटेन च पूरयेत्पवनं मंत्री मूलमष्टमितं जपन्
अंगुष्ठेन दक्षनासां धृत्वा कुंभकयोगतः जपेद्द्वा।
त्रिंशतान्हत्वा ततो दक्षिणनासया शनैः शनैस्त्यजेद्वा
युं जपन् षोडशधा यामं तु वामनासापुटेप्येवं स्रकुंभक
रेचकं पुनर्दक्षिणतः कुर्यात्सर्वं तन्त्रारसज्जिते प्राणा
यामविधिः प्रोक्तो ब्रह्ममंत्रस्य साधने ततो ध्यानं प्रक
वीतं साधकाभीष्टसाधनं हृदयकमलमध्ये निर्विशे
षं निरीहं हरिहरविधिवेद्यं योगिभिर्ध्यानगम्यं जा।

ननमरणभीतिभ्रंशिसच्चित्स्वरूपं सकलभुवनबी
जंब्रह्मचैतन्यमीडे ध्यात्वैवंपरमंब्रह्ममानसैरुपचा
रकैः पूजयेत्परयाभक्त्याब्रह्मसायुज्यहेतवे गंधंदद्या
न्महीतत्त्वंपुष्पमाकाशमेवच धूपंदद्याद्वायुतत्त्वंदी
पंतेजःसमर्पयेत् नैवेद्यंतोयतत्त्वेनप्रदद्यात्परमात्म
ने ततोजप्त्वामहामंत्रंमनसासाधकोत्तमः समर्प्य
ब्रह्मणेपश्चाद्बहिःपूजांसमारभेत् उपस्थितानिद्र
व्याणिगंधपुष्पादिकानिच वस्त्रालंकरणादीनिभ
क्ष्यपेयानियानिच मंत्रेणानेनसंशोध्यध्यात्वाब्रह्म
सनातनं निमील्यनेत्रेमंत्रीतानर्पयेत्परमात्मने ब्र
ह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ब्रह्मैवतेन
गंतव्यंब्रह्मकर्मसमाधिना ततोनेत्रेसमुन्मील्यजपे
न्मूलंस्वशक्तितः तज्जपंब्रह्मसात्कृत्वास्तोत्रंचकवचं
पठेत् स्तोत्रंशृणुमहेशानिब्रह्मणःपरमात्मनः य
च्छ्रुत्वासाधकोदेविब्रह्मसायुज्यमश्नुते । ॐनमस्ते
सतेसर्वलोकाश्रयायनमस्तेचितेविश्वरूपात्मकाय
नमोऽद्वैततत्त्वायमुक्तिप्रदायनमोब्रह्मणेव्यापिनेनि
र्गुणाय त्वमेकंशरण्यंत्वमेकंवरेण्यंत्वमेकंजगत्का
रणंविश्वरूपं त्वमेकंजगत्कर्तृपातृप्रहर्तृत्वमेकंप
रंनिश्चलंनिर्विकल्पं भयानांभयंभीषणंभीषणानां

गतिः प्राणिनां पावनं पावनानां महोच्चैः पदानां नियं
तृत्वमेकं परेषां परं रक्षकं रक्षकानां परेशं प्रभो सर्वरू
पाविनाशिन् अनिर्देश्य सर्वेन्द्रियागम्य सत्य अचिन्ता
क्षराव्यापकाव्यक्ततत्त्व जगद्भासकाधीश पायादपाया
त् तदेकं स्मरामस्तदेकं जपामस्तदेकं जगत्साक्षिरूपं
नमामः सदेकं निधानं निरालम्बमीशं भवाम्भोधिपो
तं शरण्यं व्रजामः। पंचरत्नमिदं स्तोत्रं ब्रह्मणः परमा
त्मनः यः पठेत्प्रयतो भूत्वा ब्रह्मसायुज्यमाप्नुयात्
प्रदोषेऽदः पठेन्नित्यं सोमवारे विशेषतः श्रावयेद्बोधये
त्प्राज्ञो ब्रह्मनिष्ठान्स्वबान्धवान् इति ते कथितं देवि पं
चरत्नं महेशितुः कवचं शृणु चार्वंगि जगन्मंगलना
मकं पठनाद्धारणाद्यस्य ब्रह्मज्ञो जायते ध्रुवं परमा
त्मा शिरः पातु हृदयं परमेश्वरः कंठं पातु जगत्पाता
वदनं सर्वदृग्विभुः करौ मे पातु विश्वात्मा पादौ रक्षतु
चिन्मयः सर्वांगं सर्वदा पातु परब्रह्म सनातनं श्री।
जगन्मंगलस्यास्य कवचस्य सदाशिवः ऋषिश्छंदोऽनु
ष्टुबिति परमब्रह्म देवता चतुर्वर्गफलावाप्त्यै विनि
योगः प्रकीर्तितः यः पठेद्ब्रह्मकवचं ऋषिन्यासपुरः
सरं स ब्रह्मज्ञानमासाद्य साक्षाद्ब्रह्ममयो भवेत् भूर्जे।
विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि कंठे वा दक्षिणे

वाहौ सर्वसिद्धिप्रदो भवेत् इत्येतत्परमब्रह्मकवचं
ते प्रकाशितं दद्यात्प्रियाय शिष्याय गुरुभक्ताय धी
मते पठित्वा स्तोत्रकवचं प्रणमेत्साधकाग्रणीः ॐ न
मस्ते परमं ब्रह्म नमस्ते परमात्मने निर्गुणाय नमस्तु
भ्यं सद्रूपाय नमो नमः वाचिकं कायिकं वापि मानसं।
वा यथामति आराधने परेशस्य भावशुद्धिर्विधीयते
एवं संपूज्य मतिमान् स्वजनैर्बान्धवैः सह ॥ महाप्रसाद
स्वीकुर्याद्ब्रह्मणः परमात्मनः पूजने परमेशस्य ना।
वाहनविसर्जने सर्वत्र कर्मकालेषु साधयेद्ब्रह्मसाध
ने स्नातो वाकृतस्नातो भुक्तो वापि बुभुक्षितः पूज
येत्परमात्मानं सदा निर्मलमानसः अनेन ब्रह्ममंत्रे
ण भक्ष्यपेयादिकं च यत् दीयते परमेशाय तद्देवपा
वनं महत् गंगातोये शिलादौ च स्पृष्टदोषोपि वर्तते
परब्रह्मार्पिते द्रव्ये स्पृष्टास्पृष्टं न विद्यते पक्वं वापि न
पक्वं वा मंत्रेणानेन मंत्रितं साधको ब्रह्मसात्कृत्वा भुं
जीयात्स्वजनैः सह नात्र वर्णविचारोस्ति नोच्छिष्टादि
विवेचनं न कालनियमोप्यत्र शौचाशौचं तथैव च
यथाकालं यथादेशं यथायोगेन लभ्यते ब्रह्मसात्कृ।
तं नैवेद्यमश्नीयाद्विचारयेत् आनीतं श्वपचेनापि शु
नोवक्त्रादपि निःसृतं तदन्नं पावनं दिव्यं देवानामपि दुर्लभं

म. नि.
तं.
१०

किंपुनर्मनुजादीनां वक्तव्यं देववंदिते महापातकयु
क्तो वा युक्तो वाप्युपपातकैः सकृत्प्रसादग्रहणान्मुच्य
ते नात्र संशयः परमेशस्य नैवेद्यसेवनाद्यत्फलं भवेत्
सार्द्धत्रिकोटितीर्थेषु स्नानदानेन यत्फलं तत्फलं लभ
ते मर्त्यो ब्रह्मार्पितनिषेवणात् अश्वमेधादिभिर्यज्ञैरि
ष्ट्वा यत्फलमश्नुते भक्त्या तेब्रह्मदत्तनैवेद्येन तस्मात्कोटिगु
णं लभेत् जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि म
हाप्रसादमाहात्म्यं वर्णितुं नैव शक्यते यत्र कुत्र स्थितो
वापि प्राप्य ब्रह्मार्पितान्नकं गृहीत्वा कीकसो वापि ब्रह्म
साक्षात्समाप्नुयात् यदि स्यान्नीचजातीयमन्त्रः ब्रह्मणि
भावितं तदन्नं ब्राह्मणो ग्राह्यमपि वेदान्तपारगैः जाति
भेदो न कर्तव्यः प्रसादे परमात्मनः योऽशुद्धबुद्धिं कुरुते
स महापातकी भवेत् वरं पापशतं कुर्यान्नद्वेषं विप्र वा।
यत्प्रिये परब्रह्मार्पिते ह्यन्ने न कुर्यादवहेलनं यस्तज्ज
ति नराधमः महामन्त्रेण संस्कृतं अन्नतोयादिकं मदे
पितं स्वे पातयेत्पथः स्वयमप्य पतामिश्रपतत्या भृत
सं लवं ब्रह्मसात्कृतं नैवेद्यद्रुहाणां नास्ति निष्कृतिः
पुण्यायन्ते क्रियाः सर्वाः सद्भिः सत्कृतायते स्वेच्छाचा
रोत्र विहितो महामन्त्रस्य साधने किं तस्य वैदिकाचारैः स्मा
र्तैर्वापि तस्य किं ब्रह्मनिष्ठस्य विदुषः स्वेच्छाचारो वि

यिस्यतः कृतेनास्य फलं नास्ति नाकृतेनापि किल्बिषं
न विघ्नः प्रत्यवायो स्य ब्रह्ममंत्रस्य साधनात् तस्मिन्न्य
मैं महेशि स्यात्सत्यवादी जितेंद्रियः परोपकारनिरतो
निर्विकारः सदाशयः मात्सर्य्यहीनो दंभी च दयावान्
शुद्धमानसः यतात्मा हृष्टबुद्धिः स्यात्साहाद्ब्रह्मेति भाव
यन् न मिथ्याभाषणं कुर्यान्न परानिष्टचिंतनं परस्त्रीग
मनं चैव ब्रह्ममंत्री विवर्जयेत् तत्सदिति वदेद्देवि विश्रांते
मे सर्वकर्मणि ब्रह्मार्पणमस्त्विवं पानभोजनकर्म
णः येनोपायेन मर्त्यानां लोकयात्रा प्रसिद्ध्यति तदे।
व कार्यं ब्रह्मज्ञैरिदं धर्मं सनातनं । अथ संध्याविधिं
वक्ष्ये ब्रह्ममंत्रस्य शांभवि यां कृत्वा ब्रह्मसंपत्तिं लभंते
भुवि मानवाः प्रातर्मध्याह्नसायाह्ने यथादेशं यथासम
ये एवं तत्परब्रह्मध्यानाराधकसत्तमः अष्टोत्तरश
तं देवि गायत्रीजपमाचरेत् जपं समर्प्य विधिवत्स्वे
वत्मणमेत्सुधीः एषा संध्या मया प्रोक्ता सर्वेषां ब्रह्मसा
धने यदनुष्ठानतो मंत्री शुद्धांतःकरणो भवेत् गाय।
त्रीं शृणु चार्वंगि सर्वपापप्रणाशिनी परमेश्वरं तत्सका ॐ
विद्महे तदनंतरं परतत्त्वाय यदतो धीमहीति वै देवि त्रि
ये तदनंतरमीशानि तन्नो ब्रह्म प्रचोदयात् इयं श्रीब्र।
ह्मगायत्री चतुर्वर्गप्रदायिनी पूजने यजने चैव ध्याने पा

नैवभोजनं यद्यत्कर्मप्रकुर्वीतब्रह्ममंत्रेणसाधयेत् ब्रा
ह्मेमुहूर्तेचोत्थायप्रणम्यब्रह्मदंगुरुं ध्यात्वाचपरमंब्रह्म
यथाशक्तिमनुंस्मरेत् एवंवत्सणेमहब्रह्मप्रातःकृत्यमिदं
स्मृतं द्वात्रिंशतासहस्रेणजपेनास्यपुरस्क्रिया तद्दशांशे
नहवनंतर्पणंतद्दशांशतः सेचनंतद्दशांशेनतद्दशां
शेनसुंदरि ब्राह्मणान्भोजयेन्मंत्रीपुरश्चरणकर्मणि
भक्ष्याभक्ष्यविचारोऽत्रनास्त्यग्राह्यंनविद्यते नकालशुद्धिनि
यमोनवाप्यानिरूपणं अभुक्तोवापिभुक्तोवास्नातो
वास्नातएववा साधयेत्परमंमंत्रंस्वेच्छाचारेणसाधकः
विनायासंविनाक्लेशंस्तोत्रंवकवचंविना विनान्यासंवि
नामुद्रांविनासेचनंवराननेविनाचोरगणेशादिजपंवलु
ह्लकंविना अकस्मात्परमंब्रह्मसाक्षात्कारोभवेद्ध्रुवं सं
कल्पोस्मिन्महामंत्रमानसःपरिकीर्तितः साधनेब्रह्ममंत्र
स्यनावक्लुप्तिर्विधीयते सर्वंब्रह्ममयंदेविभावयेद्ब्रह्म-
साधकः नवास्यप्रत्यवायोस्तिनांगवैगुण्यमेवच महा
मनोःसाधनेत्र्यंगंसांगायतेध्रुवं कलौपापयुगेघोरे
तपोहीनेतिदुस्तरे निस्तारबीजमेतावद्ब्रह्ममंत्रस्यसा
धनं साधनानिबहूकानिनानातंत्रागमादिषु कलौतु
र्बलजीवानामसाध्यानिमहेश्वरि अल्पायुषःस्वल्पस
त्वाअन्नाधीनासवःप्रिये लब्धाधनार्जनेव्यग्राःसदाचव

लमानसाः समाधावस्थिरधियोयोगक्लेशासहिष्णवः
तेषांहितायमोक्षायब्रह्ममार्गोयमीरितः कलौनास्त्येव
नास्त्येवसंसंसत्यमयोच्यते ब्रह्मदीक्षांविनादेविकैव
ल्यायमुक्तयेयच प्रातःकृत्यंप्रातरेवसंध्यांकुर्यात्त्रिका
लतः मध्याह्नेपूजनंकुर्यात्सर्वतंत्रेष्वयंविधिः परब्र
ह्मोपासनेनैवसाधकेच्छाविधिःशिवे विधयःकिंकरायं
त्रनिषेधःप्रभवोपिवा स्वेच्छाचारेणेष्टसिद्धिर्लहिना
कोन्ममाश्रयेत् ब्रह्मज्ञानीगुरुंप्राप्यशांतेनिश्चलमान
से प्रणतानस्वरणांभोजेप्रार्थयेद्भक्तिभावतः करुणाम
यदीनेशनवाहंशरणागतः त्वत्पदांभोरुहच्छायांदेहि
मूर्ध्नियशोधन इतिप्रार्थ्यगुरुंपश्चात्पूजयित्वास्वशक्ति
तः कृतांजलिपुटोभूत्वातूष्णींतिष्ठेद्गुरोःपुरः गुरुर्वि
चार्यविधिवद्यत्नेनशिष्यलक्षणं प्राहूयकृपयादया
लुर्भक्तिशिष्यायमहामंत्रं उपविष्टमनेज्ञानीप्राङ्मुखो
वाप्युदङ्मुखः स्ववामेशिष्यमानीयकारुण्येनावलो
कयेत् ततःशिष्यस्यशिरसिऋषिन्यासपूर्वःमंत्रं जपे
दष्टशतंमंत्रंसाधकस्येष्टसिद्धये दत्वाकर्णेब्राह्मण
नामितंरेषांचवामतः समग्राश्रावयेन्मंत्रंसगुरुःक
रुणानिधिः उपदेशविधिःप्रोक्तोब्रह्ममंत्रस्यकालि
के नात्रपूजाद्यपेक्षास्तिसंकल्पमात्रंसंचरेत् ततःश्री

म॰ नि॰ तं॰ १२ गुरुपादाब्जे दंडवत्पतितं शिष्यं उत्थापयेद्गुरुः स्नेहादिमं
मंत्रमुच्चारयन् उत्तिष्ठ वत्स मुक्तोसि ब्रह्मज्ञानपरो भव
जितेन्द्रियः सत्यवादी बलारोग्यं सदास्तु ते ततउत्थाय
गुरवे यथाशक्त्या समाहितः दक्षिणां सफलं वापि दद्या
त्साधकसत्तमः गुरोराज्ञावशीभूय विहरेद्देववद्भु
वि मंत्रग्रहणमात्रेण तदात्मा तन्मयो भवेत् ब्रह्मभू
तस्य देवेशि किमन्यैर्बहुसाधनैः इति संक्षेपतो ब्रह्म
दीक्षा ते कथिता प्रिये गुरुकारुण्यमात्रेण ब्रह्मदीक्षां
समाचरेत् शाक्ताः शैवा वैष्णवाश्च सौरा गाणपतास्त
था विप्रा विप्रेतराश्चैव सर्वेप्यत्राधिकारिणः ग्रहेस्व
संजयो देवि विदेवदेवो जगद्गुरुः स्वेच्छाचारी निर्विक
ल्पो मंत्रस्यास्य प्रसादतः प्रागेमव ब्रह्ममंत्रेमतः एवे
मुपासितः ब्रह्मा ब्रह्मर्षयश्चापि देवा देवर्षयस्तथा
देवर्षिवज्ञान्मुनयस्तेभ्यो राजर्षयः प्रिये उपासितोत्र ब्रह्ममंत्र
स्मृताः परमात्मनः ब्राह्मे मनो महेशानि विचारो
नास्ति कुत्रचित् सोयं मंत्रगुरुर्देयाच्छुद्धबोधात् वि
चारयन् पितापि दीक्षयेत्पुत्रान् भ्राता भ्रातृन्पतिः स्त्रि
यं मातुलो भागिनेयांश्च नप्तृन्मातामहोपि च स्वमं
त्रदाने यो दोषस्तथापि पित्रादिदीक्षया सिद्धब्रह्ममहा
मंत्रेन दोषो नैव विद्यते ब्रह्मज्ञानिमुखाच्छ्रुत्वा यन

केनविधानतः ब्रह्मभूतोनरःपूतः सर्वपापैर्नलि।
प्यते ब्रह्ममंत्रोपासिनोयेगृहस्थाब्राह्मणादयः स्व
स्ववर्णोत्तमास्तेतुपूज्यामान्याविशेषतः ब्राह्मणाय
तयःसाक्षादितरेब्राह्मणैःसमाः तस्मात्सर्वैःपूजयेत्त
ब्रह्मज्ञान्ब्रह्मदीक्षितान् येचतानवमन्यंतेतेनराब्र।
ह्मघातिनः पतंतिघोरनरकेयावच्चन्द्रार्कतारकौ।
यत्पापंस्त्रीवधेप्रोक्तंयत्पापंभ्रूणघातने तस्मात्कोटि
गुणंपापंब्रह्मोपासकनिंदनात् यथाब्रह्मोपदेशे
नविमुक्तःसर्वपातकैः गच्छतिब्रह्मसायुज्यंतथैव
तवसाधनात् इतिश्रीमहानिर्वाणतंत्रेसर्वतंत्रोत्त
मोत्तमेसर्वधर्मनिर्णयसारेश्रीमदाद्यासदाशिव।
संवादेजीवनिस्तारोपायप्रश्नेपरब्रह्मोपदेशकथ
नंनामद्वितीयोल्लासः २ श्रीदेव्युवाच श्रुत्वासम
कंपरंब्रह्मोपासनंपरमेश्वरी परमानंदसंपन्नाशं
करंपरिपृच्छति श्रीदेव्युवाच कथितंयत्त्वयानाथ
ब्रह्मोपासनमुत्तमं सर्वलोकप्रियकरंसाक्षाद्ब्रह्मप
दप्रदं तेजोबुद्धिबलैश्वर्यदायकंसुखसाधनं त्वमा
स्मिञ्जगदीशानतववाक्यामृतंस्मृता यदुक्तंकरु
णासिंधोयथाब्रह्मनिषेवणात् गच्छतिब्रह्मसायुज्यं
तथैवममसाधनं एतद्वेदितुमिच्छामिमदीयसाध

म. नि. नेपरं ब्रह्मसायुज्यजननं यत्त्वयाकथितंप्रभो विद्यायं
तं. कीदृशंतस्यसाधनंकेनवर्त्मना मंत्रःकोवात्रविहितो
१२ ध्यानंस्नानादिकंचकिम् सविशेषंसावशेषंमाबला
13 हक्तुमर्हसि ममप्रीतिकरंदेवलोकानांहितकारकं
कोऽस्यमन्त्रस्यतेशंभोभवव्याधिभिषग्गुरुः इतिदेव्या
वचःश्रुत्वादेवदेवोमहेश्वरः उवाचपरयाप्रीत्यापार्व-
तींपार्वतीपतिः श्रीसदाशिवउवाच शृणुदेविमहा
भागेतवाराधनकारणं तवसाधनतोयेनब्रह्मसा-
युज्यमश्नुते त्वंपराप्रकृतिःसाक्षाद्ब्रह्मणःपरमात्मनः
त्वत्तोजातंजगत्सर्वंत्वंजगज्जननीशिवे महदाद्यणु
पर्यन्तंयदेतत्सचराचरं त्वयैवोत्पादितंभद्रेत्वदधी
नमिदंजगत् त्वमाद्यासर्वविद्यानामस्माकमपिज
न्मभूः त्वंजानासिजगत्सर्वंनत्वांजानातिकश्चन त्वं
कालीतारिणीदुर्गाषोडशीभुवनेश्वरी धूमावतीत्वं
बगलाभैरवीछिन्नमस्तका त्वमन्नपूर्णावाग्देवीत्वंदे
वीकमलालया सर्वशक्तिस्वरूपात्वंसर्वदेवमयीतनु
त्वमेवसूक्ष्मास्थूलात्वंव्यक्ताव्यक्तस्वरूपिणी निराका
रापिसाकाराकस्त्वांवेदितुमर्हति उपासकानांकार्या
र्थंश्रेयसेजगतामपि दानवानांविनाशायधत्सेनानावि
धास्तनूः चतुर्भुजात्वंद्विभुजाषड्भुजाष्टभुजातथा

त्वमेवविस्तरतार्थंनानाशास्त्रस्वरूपधारिणी तत्तद्रूपविभे
देनमंत्रयंत्रादिसाधनं कथितंसर्वतंत्रेषुभावाश्चक
थितास्त्रयः पशुभावःकलौनास्तिदिव्यभावोपिदुर्लभ
वीरसाधनकर्माणिप्रत्यक्षाणिकलौयुगे कुलाचारंवि
नादेविकलौसिद्धिर्नजायते तस्मात्सर्वप्रयत्नेनसाध
येत्कुलसाधनं कुलाचारेणदेवेशिब्रह्मज्ञानंप्रजाय
ते ब्रह्मज्ञानयुतोमर्त्योजीवन्मुक्तोनसंशयः ज्ञानेन
मोक्षमखिलममेयंज्ञानतोभवेत् ब्रह्मज्ञानेसमुत्प
न्नेमेध्यामेध्यंनविद्यते योजानातिपरंब्रह्मसर्वव्यापिस
नातनं किमस्यमेध्यंतस्याग्रेसर्वंब्रह्मेतिजानतः त्वं
सर्वरूपिणीदेवीसर्वेषांजननीपरा तुष्टायांत्वयिदेवे
शिसर्वेषांतोषणंभवेत् सृष्टेरादौत्वमेकासीस्तमोरू
पमगोचरं त्वत्तोजातंजगत्सर्वंपरब्रह्मसिसृक्षया म
हत्तत्वादिभूतांतंत्वयासृष्टमिदंजगत् निमित्तमात्रं
तद्ब्रह्मसर्वकारणकारणं सद्रूपंसर्वतोव्यापिसर्वमा
वृत्यतिष्ठति सदैकरूपंचिन्मात्रंनिर्लिप्तंसर्ववस्तुषु न
करोतिनचाश्नातिनगच्छतिनतिष्ठति सत्यंज्ञानमना
द्यंतमवाङ्मनसगोचरं तस्येच्छामात्रमालंब्यत्वंमहायो
गिनीपरा करोषिपासिहंस्यंतेजगदेतच्चराचरं तवरूपं
महाकालोजगत्संहारकारकः महासंहारसमयेकाल

म॰ नि॰ तं॰ १५

15

सर्वं ग्रसिष्यति कलनात्सर्वभूतानांमहाकालः प्रकीर्ति
तः महाकालस्यकलनात्त्वमाद्याकालिकापरा काल
संग्रसनात्कालीसर्वेषामादिरूपिणी कालत्वादादि
त्वादाद्याकालीतिगीयते पुनःस्वरूपमासाद्यतमोरू
पंनिराकृतिः वाचातीतंमनोगम्यंत्वमेकैवावशिष्यते
साकारापिनिराकारामाययाबहुरूपिणी त्वंसर्वादिरना
दिस्त्वंकर्त्रीहर्त्रीचपालिका अतस्तेकथितंभद्रेब्रह्ममन्त्रे
णदीक्षितः यत्फलंसमवाप्नोतितथैवत्वत्साधनात्
नानाचारेणभावेनदेशकालादिकारिणी विभेदात्क
थितंदेविकुत्रचिद्गुह्यसाधनं येयत्राधिकृतामर्त्यास्ते
तत्रफलभागिनः भविष्यन्तिनरिष्यन्तिमानुषागतकि
ल्बिषाः बहुजन्मार्जितैःपुण्यैःकुलाचारेमतिर्भवेत्
कुलाचारेणपूतात्मासाक्षाच्छिवमयोभवेत् यत्रास्ति
भोगबाहुल्यंतत्रयोगस्यकाकथा योगेपिभोगविरहः
कौलंमुभयमश्नुते एकस्मिन्कुलतत्त्वज्ञःपूजितोयेन।
सिध्यते सर्वेदेवाश्चदेव्याश्चपूजितानात्रसंशयः पृथि
वीहेमसम्पूर्णांदत्वायत्फलमाप्नुयात् तस्मात्कोटिगु
णंपुण्यंलभतेकौलिकार्चनात् श्वपचोपिकुलज्ञानी।
ब्राह्मणादतिरिच्यते कुलाचारविहीनस्तुब्राह्मणःश्व।
पचाधमः कौलधर्मात्परोधर्मोनास्तिज्ञानेन्तुमामके य

स्यानुष्ठानमात्रेण ब्रह्मज्ञानी नरो भवेत् सत्यं ब्रवीमि
ते देवि हृदि कृत्वावधारय सर्वधर्मोत्तमात्कौलात्परं
धर्मो न विद्यते अयं तु परमो मार्गो गुप्तोस्ति पशुसंक
टे प्रकटो भविष्यति वीरान्संहृते प्रबले कलौ कलिका
ले प्रवृद्धे तु सत्यं सत्यं मयोच्यते नश्यास्यन्ति विना कौ
लान्पशवो मानवा भुवि यदा तु वैदिकी दीक्षा दीक्षा पौ
राणिकी तथा नश्यास्यन्ति वरारोहे तदैव प्रबलः का
लिः यदा तु पुण्यपापानां परीक्षा वेदसंभवा नश्यास्य
न्ति शिवे घोरे तदैव प्रबलः कलिः क्वचिच्छिन्ना क्वचि
च्छिन्ना यदा स्युस्तरंगिणी भविष्यति क्लेशानि तदैव
प्रबलः कलिः यदा तु म्लेच्छजातीया राजानो धनलो
लुपाः भविष्यन्ति महाप्राज्ञे तदैव प्रबलः कलिः य
दा स्त्रियो निष्ठुरा हीनाः कर्कशाः कलहे रताः गर्हिष्यन्ति
भर्तारं तदैव प्रबलः कलिः यदा तु मानवा भूमौ स्त्री
जिताः कामकिंकराः द्रुह्यन्ति गुरुमित्रादीन्तदैव प्र
बलः कलिः यदा तु क्षोणी स्वल्पफला तोयदाः स्तोक
वर्षिणः असम्यक्फलिनो वृक्षास्तदैव प्रबलः कलि :
भ्रातरः स्वजनं मात्या यदा धनकारणाद्धया मिथः संप्र
हरिष्यन्ति तदैव प्रबलः कलिः प्रकटे मद्यमांसादौ
निंदा दंडविवर्जिते गुप्तपाने चरिष्यन्ति तदैव प्रबा।

म॰नि॰
तं॰
१५

लःकलिः सत्यत्रेताद्वापरेषु यथा मद्यादिसेवनं क
लावपि तथा कुर्यात्कुलधर्मानुसारतः येकुर्वंतिकु
लाचारंसत्यसत्ताजितेंद्रियाः व्यक्ताचारादयाशीला
नहितान्बाधतेकलिः गुरुशुश्रूषणेयुक्ताभक्तामा
त्पदांबुजे अनुरक्ताःस्वदारेषुनहितान्बाधतेकलिः
कुलमार्गेणतत्वानिशोधितानिचयोगिने येदद्युःस
सत्वभावेनहितान्बाधतेकलिः हिंसामात्सर्यरहिता
दंभद्वेषविवर्जिताः कुलधर्मेषुनिष्ठायेनहितान्बा
धतेकलिः कौलिकैःसहसंसर्गंवसंतिकुलसाधवः
कुर्वंतिकौलसेवांयेनहितान्बाधतेकलिः नानावेशा
धराःकौलाकुलाचारेषुनिश्चलाः सेवंतेतांकुला
चारैर्नहितान्बाधतेकलिः स्नानदानेतपस्तीर्थव्र
तेतर्पणमेवच येकुर्वंतिकुलाचारैर्नहितान्बाधते
कलिः जीवसेकादिसंस्काराःपितृश्राद्धादिकाः
क्रियाः येकुर्वंतिकुलाचारैर्नहितान्बाधतेकलिः
कुलतत्वंकुलद्रव्यंकुलयोगिनमेवच नमस्कुर्वंति
येभक्त्यानहितान्बाधतेकलिः कौटिल्यानृतहीना
नांस्वच्छानांकुलमार्गिणां परोपकारनिरतानांसाध
नांकिंकरःकलिः कलेर्दोषसमूहस्यमहानेकोगुणः
प्रिये सत्यप्रतिज्ञंकौलानांप्रियःसंकल्पमात्रतः श्र

पैरत्त्रयुगे देवि विशुद्धं पंचमानसं त्यणमासीत्कलौ
शुद्धं केवलन तदुच्यते कुलाचारैर्विहीनायेसता।
नामसत्यभाषिणः परद्रोहपरायेचतेनराःकलिकिं।
कराः कुलवर्त्मसुभक्तायेपरयोषित्सकामुकाः द्वेष्टा
रःकुलनिष्ठानांतेज्ञेयाःकलिकिंकराः युगाचारप्रसं
गेनकलेःप्राबल्यलक्षणं संक्षेपात्कथितंभद्रेप्रीतये
तवपार्वति प्रकटेचकलौदेविसर्वेधर्माश्चदुर्बलाः
स्थास्यत्येकं सत्यमात्रंतस्मात्सत्यमयोभवेत् सत्यध
र्मंसमाश्रित्ययत्कर्मकुरुतेनरः तदेवसफलंकर्म।
सत्यंजानीहिसुव्रते नहिसत्यात्परोधर्मोनपापम।
नृतात्परं तस्मात्सर्वात्मनामर्त्यःसत्यमेकंसमाश्र
येत् सत्यहीनावृथापूजासत्यहीनोवृथाजपः सत्य
हीनंतपोव्यर्थंसूषरेवपनंयथा सत्यरूपंपरंब्रह्मस
त्यंहिपरमंतपः सत्यमूलाःक्रियाःसर्वाःसत्यात्परत
रोनहि एतत्पूर्वंमयाप्रोक्तंदुच्यतेप्रबलेकलौ कुला
चारेपिसत्येनकर्त्तव्योभक्तभावनः गोपनाद्धीयतेस
त्यंनगुप्तिरनृतंविना तस्मात्प्रकाशतःकुर्यात्कौलिक :
कुलसाधनं कुलधर्मस्यगुप्त्यर्थंनानृतंस्याज्जगुप्सितं
यदुक्तंकुलतंत्रेषुनस्यात्तत्प्रबलेकलौ कृतेधर्मश्चतु।
ष्पादःत्रेतायांपादहीनकः द्विपादोद्वापरेदेविपाद।

म॰ नि॰ मात्रेकलौयुगे तत्रापिसत्संबलवत्तपेः धर्मंदयापिव
तं॰ सत्यपादेकृतेलोपेधर्मलोपःप्रजायते तस्मात्सत्संस
१९ माश्रित्यसर्वकर्माणिसाधयेत् कुलाचारंविनायत्रना
16 स्त्युपायःकुलेश्वरि तत्रान्तःप्रवेशश्चकृतोनिःश्रेय
संभवेत् सर्वथासत्सहतात्मासत्संसेवितवर्त्मना स
र्वकर्मनरःकुर्यात्स्वस्ववर्णाश्रमोदिते दीक्षांस्वजाज
पंहोमंपुरश्चरणतर्पणे अनोढाहौपुंसवनंसीमन्तो
न्नयनंतथा जातकर्मतथानामचूडाकरणमेवच
मृतक्रियांपितुःश्राद्धंकुर्यादागमसंमते तीर्थश्रा
द्धंवृषोत्सर्गंशारदोत्सवमेवच यात्रांगृहप्रवेशंचन
ववस्त्रादिधारणे वापीकूपतडागानांसंस्कारंतिथि
कर्मच गृहारंभप्रतिष्ठांचदेवानांस्थापनंतथा दि
वाकृत्यंनिशाकृत्यंपक्षकृत्यंतथैवच ऋतुमासवर्ष
कृत्यंनित्यंनैमित्तिकंचयत् कर्तव्यंयदकर्तव्यंत्याज्यं
ग्राह्यंचयद्भवेत् मयोक्तेनविधानेनतत्सर्वंसाधयेन्न
रः नकुर्याद्यदिमोहेनतुमेतच्छ्रद्धयापिवा विनष्टःस
र्वकर्मभ्योविष्ठायांसभवेत्कृमिः यदिमन्मतमुल्लंघ्यम
हेशिप्रबलेकलौ यद्यत्क्रियतेकर्मविपरीतायत
द्भवेत् ममतासमतादीनांसाधकप्राणघातिनी ए
जापिविफलादेविकृतेभस्मार्पणंयथा देवताकृपि

नातस्यविघ्नस्तस्यपदेपदे कलिकालेप्रवृत्तेतत्त्वात्वा
मच्छास्त्रमंत्रके योन्यमार्गैःक्रियाकुर्यात्समहापातकी
भवेत् वर्णोद्वाहोपकुर्वाणोयोन्यमार्गेणमानवः सया
तिनरकंघोरंयावच्चंद्रदिवाकरौ वर्णेत्रस्तवधःप्रोक्तः।
व्रात्योमानवकोभवेत् केवलंस्वत्रवाहोमौचोउत्सलादय
मोपिसः उद्वाहितापियानारीजानीयात्सातुगर्हिता
उद्वोढापिभवेत्पापीसंसर्गात्कुलनायिके वेश्यागमनजं
पापंनस्यंडुमोदिनेदिने तद्धलादन्नतोयादिनैवगृह्णं
न्तिदेवताः पितरोपिनवाश्नंतियतस्तन्मलसंभवात् त
योरपत्यंकानीनःसर्वधर्मबहिष्कृतः दैवेपित्र्येकुलाचा
रेनैवाधिकारोस्यजायते अशांभवेनमार्गेणदेवतास्था
पनंचरेत् नसान्निध्यंभवेत्तत्रदेवतायाःकथंचन इ
हामुत्रफलंनास्तिकायक्लेशोधनव्ययः आगमोक्तवि
धिंहित्वायःश्राद्धंकुरुतेनरः श्राद्धंतन्निष्फलंसोपिपि
तृभिर्नरकंव्रजेत् ततोयंशोणितंसमं पिंडोमलमयो
भवेत् तस्मात्सर्वप्रयत्नेन शांकरंमतमाश्रयेत् ब
हुनात्रकिमुक्तेन सत्यंसत्यंमयोच्यते अशांभवंकृतं।
कर्मसर्वंदेविनिरर्थकं अस्त्रावतारोयमःएवधर्मोपि
नश्यति शांभवाचारहीनस्यनरकान्नैवनिष्कृतिः मदु
दीरितमार्गेणनित्यनैमित्तकर्मणां साधनेयन्महेशानि

म॰ नि तं॰ १८ तदेवं तव साधनं विशेषाराधनं तत्र मंत्रयंत्रादिसंयुतं
भेषजं कलिरोगाणां सूचयतो गदतो मम इति श्रीमहा
निर्वाणतंत्रे सर्वतंत्रोत्तमे सर्वधर्मनिर्णयसारे श्रीम
दाद्यासदाशिवसंवादे जीवनिस्तारोपायप्रश्नपराप्र
कृतिसाधनोपक्रमो नाम चतुर्थोल्लासः ४ श्रीसदाशि
व उवाच त्वमाद्या परमा शक्तिः सर्वशक्तिस्वरूपिणी त
व शक्त्यावयं शक्ताः सृष्टिस्थितिलयादिषु तव रूपाण्य
नंतानि नानावर्णाकृतीनि च नानाप्रयाससाध्यानि व
र्णितुं केन शक्यते तव कारुण्यलेशेन कुलतंत्रागमा
दिषु तेषां सद्धीसाधनानि कथितानि यथामति गुप्तसा
धनमेतत्तु न कुत्रापि प्रकाशितं अस्य प्रसादात्कल्याणि
मयि ते करुणा दृशी त्वया पृष्टमिदानीं तन्नाहं गोपयि
तुं क्षमः कथयामि तव प्रीत्यै मम प्राणाधिके प्रिये स
र्वदुःखप्रशमनं सर्वापद्विनिवारकं त्वत्प्रीतिमूलमचि
रात्तव संतोषकारणं कलिकल्मषदीनानां त्राणा स्वल्पा
युषां प्रिये बहुप्रयासाशक्तानामेतदेव परं धनं न चा
त्र न्यासबाहुल्यं नोपवासादिसंयमः सुखसाध्यमबाहु
ल्यं भक्तानां फलदं महत् तत्रादौ शृणु देवेशि मंत्रोद्धार
क्रमं शिवे यस्य श्रवणमात्रेण जीवन्मुक्तः प्रजायते प्राणे
शस्तेजसारूढो भेरुंडाख्योमविंदुमान् बीजमेतत्समुद्धृत

द्वितीयमुद्धरेत्प्रिये संध्यारक्तसमारूढा वामनेत्रेंदुसं
युता तृतीयं शृणु कल्याणि दीपसंस्थः प्रजापतिः गो
विंदविंदुसंयुक्तः साधकानां सुखावहः बीजत्रयांते प
रमेश्वरि संबोधनपदं वह्निकांतावधिप्रोक्तो दशार्णो
यमनुः शिवे सर्वविद्यामयी देवी विद्येयं परमेश्वरि आ
द्यत्रयाणां बीजानां प्रत्येकं त्रयमेव वा प्रजपेत्साधका
धीशः सर्वकामार्थसिद्धये बीजमाद्यत्रयं हित्वा सप्ता
र्णापि दशाक्षरी कामवाग्भवताराद्या सप्तार्णाष्टाक्ष
री विद्या दशार्णा मंत्रमणपदात्कालिकेपदमुद्धरेत् पुन
राद्यत्रयं बीजं वह्निजायांततो वदेत् षोडशीयं समा
ख्याता सर्वमंत्रेषु गोपिता वधाद्यात्र्यर्णवाद्यावेदषा
सप्तदशी द्विधा नवमंत्राः समाख्याताः कोटिकोसर्वदा
त्वया संक्षेपात्तव कथितानां मंत्राणां द्वादश प्रिये येषु
येषु च तंत्रेषु ये ये मंत्राः प्रकीर्तिताः ते सर्वे नवमंत्राः
सुसमाद्याः प्रकृतिर्यतः एतेषां सर्वमंत्राणामेकमेव
हि साधनं कथयामि तव प्रीत्या तथा लोकहिताय च
कुलाचारं विना देवि शक्तिमंत्रो न सिद्धिदः तस्मात्कु
लाचाररतः साधयेच्छक्तिसाधनं मद्यं मांसं तथा म
त्स्यं मुद्रा मैथुनमेव च शक्तिपूजाविधावाद्ये पंचतत्त्वं
प्रकीर्तितं पंचतत्त्वं विना पूजा अभिचाराय कल्पते

म॰नि नेष्टसिद्धिर्भवेत्तस्य विघ्नस्तस्य पदे पदे शिलायां सस्य
तं॰ वापे च यथा नैवांकुरो भवेत् एवंतत्त्वविहीनायां यागज्ञा
१८ यानफलोद्भवः प्रातःकृत्यं विना देवि नाधिकारी न
18 कर्मसु तस्मादादौ प्रवक्ष्यामि प्रातःकृत्यं यथोचितं रज
नीशेषयामस्य शेषार्द्धमरुणोदयः तदा साधक उत्था
य शुक्लस्वापः कृतासनः ध्यायेच्छिरसि शुक्लाब्जे द्वि
त्रे द्विभुजं गुरुं श्वेताम्बरपरीधानं श्वेतमाल्यानुलेपनं
वराभयकरं शान्तं करुणामयविग्रहं वामेनोत्पलधा
रिण्या शक्त्यालिंगितविग्रहं स्मेराननं सुप्रसन्नं साध
काभीष्टदायकं एवं ध्यात्वा कुलेशानि मानसैरुपचार
कैः पूजयित्वा जपेन्मंत्री वाग्भवं बीजमुत्तमं यथाश
क्ति जपं कृत्वा समर्प्य दक्षिणे करे ततस्तु प्रणमेद्धीमा
न्मंत्रेणानेन सद्गुरुं भवपाशविनाशाय ज्ञानदृष्टिप्रद
र्शिने नमः सद्गुरवे तुभ्यं भुक्तिमुक्तिप्रदायिने नरा
कृति परंब्रह्मरूपायाज्ञानहारिणे कुलधर्मप्रकाशाय
तस्मै श्रीगुरवे नमः प्रणम्यैवं गुरुं तत्र चिंतयेन्निजदेव
तां एवं संपूजयित्वा तां मूलमंत्रं जपेच्चरेत् यथाशक्ति
जपं कृत्वा देव्या वामकरेर्पयेत् मंत्रेणानेन मतिमान्प्र
णमेदिष्टदेवतां नमः सर्वस्वरूपिण्यै जगद्धात्र्यै नमो
नमः आद्यायै कालिकायै तेकर्त्र्यै हर्त्र्यै नमो नमः

नमस्कृत्यबहिर्गच्छेद्वामपादपुरःसरं सत्कामप्रपूरी
षवदंतधावनमाचरेत् ततोगत्वाजलाभ्याशे स्नाने।
कृत्वायथाविधि आदावपउपस्पृश्यप्रविशेत्सलिले
ततः नाभिमात्रजलेस्थित्वामलानामपनुत्तये सकृ
स्नात्वातथोक्तमन्त्रमाचमनेचरेत् आत्मविद्याशि
वैस्तत्वैःस्वाहान्तैःसाधकाग्रणीः त्रिःप्राश्यापोहिकृत्व
स्पर्शावैसकृत्साधकः कुलयंत्रंमंत्रगर्भंविलिख्यस
लिलेसुधीः मूलमंत्रंद्वादशधातस्योपरिजपेत्प्रिये
तेजोरूपंजलंध्यात्वासूर्यमुद्दिश्यदेशिकः ततोयं।
स्तोजलीन्दत्वातेनैवपाथसाविद्या अभिषिच्यस्वमू
र्द्धानंसप्तच्छिद्राणिरोधयेत् ततस्तुदेवताप्रीत्यैत्रिनि
मज्ज्यजलांतरे उत्थायगात्रंसमार्ज्यपरिदध्याच्छुद्धवास
सी भस्मयाभस्मनावापित्रिपुंड्रंबिंदुसंयुतं ललाटे
तिलकंकुर्यात्स्नायमावद्धकुंतलः वैदिकींतांत्रिकींचै
वयथानुक्रमयोगतः संध्यांसमाचरेन्मंत्रीतांत्रिकीं।
शृणुकथ्यते आचम्यपूर्ववत्तोयेतीर्थान्यावाहयेच्छि
वे गंगेचयमुनेचैवगोदावरिसरस्वति नर्मदेसिंधु
कावेरिजलेस्मिन्सन्निधिंकुरु मंत्रेणानेनमतिमान्
मुद्रयांकुशसंज्ञया आवाह्यतीर्थंसलिलेमूलंद्वादशधा
जपेत् ततस्तत्तोयतोबिंदूंस्त्रिधाभूमौविनिक्षिपेत्

म. नि. मध्यमानामिकायोगान्मूलोच्चारणपूर्वकं सप्तवारंस्वमू
तं. र्द्धानमभिषिच्यततोजलं वामहस्तेसमादायछादयेद
१५ न्यपाणिना ईशानवायुवरुणवह्नीन्द्रबीजपंचकं प्र
जप्यविदध्यात्तोयंदक्षहस्तेसमानयेत् वीक्ष्यतेजोमयंध्या
19 त्वाचेडयाकृष्यसाधकः देहान्तःकल्मषंतेनरेचयेत्पिंग
लाख्यया निष्कृष्यपुरतोवज्रशिलायमंत्रमुच्चरन् शिवा
यतांडयन्मंत्री हस्तौप्रक्षालयेत्ततः आचम्याकेनमंत्रे।
णसूर्यायार्घ्यंनिवेदयेत् नारमायाहंसइतिहृणिस
र्यततःपरं इदमर्घ्यंतथाप्युक्त्वादद्यात्स्वाहेत्युदीरयन्
ततोध्यायेन्महादेवींगायत्रींपरदेवतां प्रातर्मध्याह्न
सायाह्नेत्रिरूपांगुणभेदतः प्रातर्ब्राह्मीरक्तवर्णांद्विभु
जांचकुमारिकां कमण्डलुंतीर्थपूर्णांमक्षमालांचबिभ्र
तीं कृष्णाजिनांबरधरांहंसारूढांशुचिस्मितां मध्याह्ने
तां श्यामवर्णांवैष्णवींचचतुर्भुजां शंखचक्रगदापद्म
धारिणींगरुडासनां पीनोत्तुंगकुचद्वन्द्वांवनमालावि
भूषितां युवतींसततंध्यायेन्मध्येमार्तण्डमण्डले साया
ह्नेवरदांदेवींगायत्रींसंस्मरेद्बुधः शुक्लांशुक्लाम्बरधरां
वृषासनकृताश्रयां त्रिनेत्रांवरदांपाशंशूलंचनृकरो
टिकां बिभ्रतींकरपद्मैश्चवृद्धांगलितयौवनां एवंध्या
त्वामहादेव्यैजलान्नामंजलित्रयं दत्वाजपेत्तुगायत्रीं

गायाशतं जपित्वा गायत्रीं शृणु देवेशि वदामि त
त्वभावतः आद्यायै पदगुह्यायै विद्महे तदनंतरं पर
मेश्वर्यै धीमहि तन्नः काली प्रचोदयात् पश्चात्तव
गायत्री महापापप्रणाशिनी त्रिसंध्यमेतां प्रजपन् सं
ध्यायाः फलमाप्नुयात् ततस्तर्पयेद्देवि देवर्षिपि
तृदेवताः प्रणवं सहितीयां त्वां तर्पयामि नमः पदं
शक्तौ तु प्रणवं मायां नमः स्थाने ह्रिठं वदेत् मूलांते
सर्वभूतांते निवासिन्यै पदं वदेत् सर्वस्वरूपां ङेयु
क्तां स्वाहा पूर्वापितृत्वां पठेत् सावरणां सवर्णीयीं तद्द
देवपरायणे आद्यायै कालिकायै ते इदमर्घ्यं ततो हि
ठः अनेनार्घ्यं महादेव्यै दत्वा मूलं जपेत् सुधीः यथाश
क्ति जपं कृत्वा देव्या वामकरे र्पयेत् प्रणम्य देवीं रजा
र्थं जलमादाय साधकः नत्वा तीर्थं पठन् स्तोत्रं देवता
ध्यानतत्परः यागमंडपमागत्य पाणिपादौ विशोध
येत् ततो द्वारस्य पुरतः सामान्यार्घ्यं प्रकल्पयेत् त्रि
कोणवृत्तभूबिंबमंडलं रचयेत् सुधीः आधारशक्तिं
संपूज्य तत्राधारं नियोजयेत् अस्त्रेण पात्रं प्रक्षाल्य
मंत्रेण प्रपूर्य च निक्षिप्य गंधपुष्पं च तीर्थान्यावाह।
येत्ततः आधारपात्रतोयेषु वह्न्यर्कशशिमंडलं पूज
यित्वा तदा धाम मायाबीजेन मंत्रयेत् प्रदर्शयेद्धेनुं।

म॰ नि॰ योनिसामान्यार्थमिदंस्मृतं ततस्तज्जलपुष्पैश्चपूज
तं॰ येद्द्वारदेवताः गणेशंक्षेत्रपालंचवटुकंयोगिनीस्त
२॰ था गंगांचयमुनांचैवलक्ष्मींवाणींततोयजेत् किं
चित्स्पृशन्वामशाखांवामपादपुरःसरं स्मरन्देव्याःप
दांभोजंमंडपंप्रविशेत्सुधीः नैरृत्यांदिशिवास्तोषं
ब्रह्माणंचसमर्चयेत् सामान्यार्घ्यस्ततोयेनप्रोक्षयेद्या
गमंदिरं अनंतरंसमायकैर्ज्ञोदिव्यदृष्ट्यावलोकनैः दि
व्यान्तस्नारयेद्विघ्नानस्त्राद्भिश्चांतरिक्षगान् पार्ष्णिघा
तत्रिभिर्भौमान्निति विघ्नान्निवारयेत् चंदनागुरुक
स्तूरीकर्पूरैर्यागमंडपं धूपयेत्स्वोपवेशार्थं चतुर
स्त्रंत्रिकोणकं विलिख्यपूजयेत्तत्रकामरूपायहुन्न
मः ततआसनेसमासीतयैकाममायारशक्तितः कम
लासनायनमोमंत्रेणैवासनेयजेत् उपविश्यासने
विद्वान्प्राङ्मुखोवाप्युदङ्मुखः बद्धवीरासनोमंत्रीवि
जयांपरिशोधयेत् तारंमायांसमुच्चार्य अमृते अमृ
तोद्भवे अमृतवर्षिणीततोमृतमाकर्षयद्विया सि
द्धिंदेहिततोरूपाकालिकांमेततःपरं वशमानय
ठःठःस्वाहेतिविजयांशोधयेन्मनुः मूलमंत्रंसप्तवारंप्रजप्य
विजयोपरि आवाहनादिमुद्राश्चदर्शयेत्तुयोनिंप्रदर्श
येत् धेनुंपद्ममहामारोयथासंकेतमुद्रया त्रिधैव।

तर्पयेद्देवीं हृदि मूलं समुच्चरन् वाग्भवं वदवद्ग्मेव
वाग्वादिनि पदं ततः मम जिह्वाग्रे स्थिरो भव सर्वस
त्ववशंकरि स्वाहान्तेनैव मनुनाज्जुह्या कुंडलीमुखे
स्वीकृत्य संविदं वामकर्णे हूं श्रीगुरुं नमेत् दक्षिणे
च गणेशानमाघ्यामध्ये सनातनीं कृताञ्जलिपुटो भू
त्वा देवीध्यानपरायणः पूजाद्रव्याणि सर्वाणि दक्षि
णे स्थापयेत्सुधीः वामे सुवासितं तोयं कुलद्रव्या
णि यानि च अस्त्रान्तमूलमन्त्रेण सामामार्घ्योदकेन प
संप्रोक्ष्य सर्ववस्तूनि वेष्टयेज्जलधारया वह्निबीजेन
देवेशि वह्नेः प्राकारमाचरेत् पुष्पं चंदनसंयुक्तमादा
य करयोर्द्वयोः अस्त्रेण घर्षयित्वा तत्क्षिपेत्करस्थ
ह्ये तर्जनीमध्यमाभ्यां च वामपाणितले शिवे उ
र्द्ध्वैर्हतालत्रितयं दत्वा दिग्बंधयेत्ततः अस्त्रेणच्छोटि
काभिश्च भूतशुद्धिमथाचरेत् स्वांके निधाय च करौ
उत्तानौ साधकोत्तमः मनो निवेश्य मूलचक्रे कार
णं च कुंडली उत्थाप्य हंसमन्त्रेण पृथिव्या सहितां त
तो स्वाधिष्ठाने समानीय तत्त्वं तत्त्वे नियोजयेत् गं
धादिघ्राणसंयुक्तां पृथिवीमप्सु संहरेत् रसादि
जिह्वया सार्द्धं जलमग्नौ विलापयेत् रूपादिचक्षुषा
सार्द्धमग्निं वायौ विलायच स्पर्शादित्वग्युतं वायुमा

म· नि· कंर्षं च विलापयेत् अहंकारे हरेस्थो मम स शहृतन्महत्त्व
तं· पि महत्तत्त्वं च प्रकृतौ तां ब्रह्मणि विलापयेत् इत्थं वि
२१ लाप्य मतिमान्वामकुक्षौ विचिन्तयेत् पुरुषं कृष्णवर्णं
५१ प्र च रक्तश्मश्रुविलोचनं खड्गचर्मधरं क्रुद्धमंगुष्ठपरि
माणकं सर्वपापस्वरूपं च सर्वदाधोमुखस्थितं तत
स्तु वामनासायां यं बीजं धूम्रवर्णकं संचिन्त्य पूरये
तेन वायुं षोडशमात्रया तेन पापात्मकं देहं शोषये
त्साधकाग्रणीः नाभौ रं रक्तवर्णं च ध्यात्वा तज्जातव
ह्निना चतुःषष्ट्या कौम्भकेन दहेत्तं पापरं ततस्तु ललाटे
वारुणं बीजं शुक्लवर्णं विचिन्त्य च द्वात्रिंशत्या रेचके
न लावयेद्भस्म तोयेन सा आपादशीर्षपर्यन्तमाप्लव
नदेहेन तं उत्पन्नं भावयेद्देहं नवीनं देवतामयं पृथ्वी
बीजं पीतवर्णं मूलाधारे विचिन्तयन् तेन दृष्ट्यावलोके
न दृढीकुर्यात्त्रिजांततनु हृदये हस्तमादाय आं ह्रीं क्रों
हंस उच्चरन् सोहं मंत्रेण तद्देहे देव्याः प्राणान्निधापये
त् भूतशुद्धिं विधायेत्थं देवीभावपरायणः समाहि
तमनाः कुर्यान्मातृकान्यासमम्बिके मातृकाया ऋषि
र्ब्रह्मा गायत्रीछंद ईरितं देवता मातृकादेवी बीजं व्यं
जनसंज्ञकं स्वराश्च शक्तयः सर्गः कीलकं परिकी
र्तितं लिपिन्यासे महादेवि विनियोगप्रयोगिता २

षिन्यासं विधायैवं करांगन्यासं समाचरेत् अं आं मध्येक
वर्गं च इं ईं मध्ये चवर्गकं उं ऊं मध्ये टवर्गं त एं ऐं मध्ये त
वर्गकं ओं औं मध्ये पवर्गं च यादिहांतं वर्णानेन विंदुस
र्गांतराले च षडंगे मंत्र ईरितः विन्यस्य न्यासविधिना
ध्यायेन्मातृसरस्वतीं पंचाशल्लिपिभिर्विभक्तमुखदो
पन्मध्यवक्षस्थलां भास्वन्मौलिनिबद्धचंद्रशकलां
मापीनतुंगस्तनीं मुद्रामक्षगुणं सुधाढ्यकलशं वि
द्यां च हस्तांबुजैः बिभ्राणां विशदप्रभां त्रिनयनां वाग्दे
वतामाश्रये ध्यात्वैवं मातृकां देवीं षट्स्वचक्रेषु विन्य
सेत् हं क्षं भ्रूमध्यगे पद्मे कंठे च षोडशस्वरान् हृदे
ककादिठांतान् विन्यस्य कुलसाधकः डादिफांतान्ना
भिदेशे वादिलांतांश्च लिंगके मूलाधारे चतुःपत्रे वा
दिसांतांश्च विन्यसेत् इत्यंतर्मनसा न्यस्य मातृकार्णान्
बहिर्न्यसेत् ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गंडयोः
ओष्ठदंतोत्तमांगास्ये दोःपत्संध्यग्रकेषु च पार्श्वयोः पृ
ष्ठतो नाभौ जठरे हृदयांसयोः ककुद्यंसे च हृत्पूर्वं पा
णिपादयुगे ततः जठराननयोर्न्यसेन्मातृकार्णान् य
थाक्रमं इत्थं लिपिं प्रविन्यस्य प्राणायामं समाचरेत्
मायाबीजं षोडशधा जप्त्वा वामेन वायुना पूरयेदात्म
नो देहं चतुःषष्ट्या तु कुंभयेत् कनिष्ठानामिकांगुष्ठै

म॰ नि॰ ईत्यानामाहृदयंसुधीः द्वात्रिंशताजपन्बीजंवायुंदक्षे
तं॰ णरेचयेत् पुनःपुनस्त्रिराहृत्याप्राणायामइतिस्मृतः
२१ प्राणायामंविधायेत्थमृष्यान्यासंसमाचरेत् अस्यमंत्र
स्यब्रह्मर्षयोब्रह्माब्रह्मर्षयस्तथा गायत्र्यादीनिछंदांसि
आद्याकालीतुदेवता आद्याबीजंबीजमितिशक्तिर्मा
याप्रकीर्तिता कमलाकीलकंप्रोक्तंस्थानेष्वेतेषुविन्य
सेत् शिरोवदनहृद्गुह्यपादसर्वांगकेषुच मूलमंत्रेण
हस्ताभ्यामापादमस्तकावधि मस्तकात्पादपर्यंतंस
प्तधाव्यापकन्यसेत् अयंतुव्यापकन्यासोयथोक्तफ
लसिद्धिदः यद्बीजाद्याभवेद्विद्यातद्बीजेनांगकल्पना
अथवामूलमंत्रेणषड्दीर्घेणविनाप्रिये अंगुष्ठाभ्यां
कनिष्ठाभ्यांकरयोस्तलपृष्ठयोः नमःस्वाहावषट्हुंच
वौषट्फट्क्रमशःसुधीः हृदयायनमःपूर्वंशिरसेव
ह्निवल्लभा शिखायैवषडित्युक्तंकवचायहुमीरितं
नेत्रत्रयायवौषट्चअस्त्रायफडितिक्रमात् षडंगानि
विधायेत्थंपीठन्यासंसमाचरेत् आधारशक्तिंकूर्मंच
शेषंपृथ्वींतथैवच सुधांबुधिंमणिद्वीपंपारिजात
तरुंततः चिंतामणिगृहंचैवमणिमाणिक्यवेदिकां
तत्रपद्मासनंदेवीन्यसेद्धृदयांबुजे दक्षवामांसयो
र्वामकट्योर्दक्षकट्योस्तथा धर्मंज्ञानंतथैश्वर्यंवैराग्यं

क्रमतोन्यसेत् सव्यपार्श्वेनाभिदक्षपार्श्वेसाधक
सत्तमः कण्ठदेशेपाणिचनाभेवधर्मादीनियथाक्रम
मानंदकंदंहृदयेसूर्यसोमेंद्रनाशनं सत्वंरजस्त
मश्चैवविंद्वमुकारादिमात्रैः केशवाककर्णिकांचैव
पत्रेष्ठपीठनायिकाः मंगलाविजयाभद्राजयंती।
चापराजिता नंदिनीनारसिंहीचवैष्णवीत्यष्टनायि
काः असितांगोरुरुश्चंडः क्रोधोमत्तोभयंकरः क
पालीभीषणश्चैवसंहारीत्यष्टभैरवाः दलाग्रेषुस
मेदेनाम्नाप्राणायामेनतनयेत् गंधपुष्पेसमादाय
करकच्छपमुद्रया हृदिहंसीसमाधायध्यायेद्दे
वींसनातनीं ध्यानंतद्द्विविधंप्रोक्तंस्वरूपारूपभेदतः
अरूपंतत्ववध्यानमवाङ्मनसगोचरं अव्यक्तंसर्व
तोव्याप्तमिदमित्थंविवर्जितं अगम्यंयोगिभिर्गी।
म्यंकृच्छ्रैर्बहुसमाधिभिः मनसोधारणार्थायशीघ्र
स्वाभीष्टसिद्धये सूक्ष्मध्यानप्रबोधायस्थूलध्यानंव
दाम्यहं अरूपायाःकालिकायाःकालमातुर्महाद्युतेः
गुणक्रियानुसारेणक्रियतेरूपकल्पना। मेघांगी
शशिशेखरांत्रिनयनांरक्तांबरंबिभ्रतीं पाणिभ्या
जयेत् तमोक्तापराधश्चेत्प्रार्थयेद्यत्नतःप्रभोः
रागलोभप्रौढवादंचसाम्याचारंविवर्जयेत् सर्वेव
र्णाःसमस्तवर्णौब्राह्मसोद्वाहेतथाशने ऊर्ध्वीरम्भैरा
वीचक्रान्तंचक्राहतेशिवे उभयत्वमहेशानिशि
वोद्वाहःप्रकीर्तितः तथादानेचपानेचवर्णाभेदो
नविद्यते श्रीदेव्युवाच किमिदंभैरवीचक्रंतत्वंच
केचकीदृशं तत्सर्वंश्रोतुमिच्छामिकृपयावक्तु
मर्हसि श्रीसदाशिवउवाच कुलपूजाविधौदेवि
चक्रानुष्ठानमीरितं विशेषपूजासमयेतत्कार्य्यं
साधकोत्तमैः भैरवीचक्रविषयेनतादृङ्नियमः
प्रिये यथासमयमासाद्यकुर्य्याच्चक्रमिदंशुभे वि
धानमस्यवक्ष्यामिसाधकानांसुभावहं आराधिता
येनदेवीतूर्णंयच्छतिवाञ्छितं कुलाचार्य्योरम्यभू
मावासीर्णासनमुत्तमं कामाद्येनास्त्रबीजेनसंप्रो

ध्योपविशेत्ततः सिंदूरेण कुशीदेन केवलेन जले
नवा त्रिकोणं वृत्तरस्रं च मंडलं चरयेत्सुधीः विचि
त्रघटमानीय दध्यक्षतविभूषिते फलपल्लवसंयु
क्ते सिंदूरतिलकान्विते सुवासितजलैः पूर्णे मंड
ले तत्र साधकः प्रणवेन तु संस्थाप्य धूपदीपौ प्रद
र्शयेत् संपूज्य गंधपुष्पाभ्यां चिंतयेदिष्टदेवतां
संतेपपूजाविधिना तत्पूजां समाचरेत् विशेषमं
त्रं वक्ष्यामि शृणुष्वामरवंदिते गंधादिनवपात्रा।
णां नात्र स्थापनमिष्यते यथेष्टं तत्समादाय संस्था
प्य पुरतो वृत्ती शोधयेदस्त्रमंत्रेण दिव्यदृष्ट्यावलो
कयेत् अलियंत्रेण गंधपुष्पं दत्वा तत्र विचिंतयेत्
आनंदभैरवीं देवीमानंदभैरवं तथा नवयौवनसं
पन्नौ तरुणारुणविग्रहौ चारुहासामृताभासोल्ल
सद्वदनपंकजौ नृत्यगीतकृतामोदौ नानाभरण
भूषितौ विचित्रवसनौ ध्यायेद्वराभयकरांबुजौ इ
मानंदमयौ ध्यात्वा स्मरेदानंदभैरवं। कर्पूरध
वलं कमलायताक्षं दिव्यांबराभरणभूषितदेहकां
तिं वामेन पाणिकमलेन सुधाढ्यपात्रं दक्षेण शु
द्धिगुटिकं दधतं स्मरामि। ध्यात्वैवमुभयं तत्र सामरस्यं
विचिंतयन् प्रणवादिनमोंतेन नाममंत्रेण देशिकः

संपूज्य गंधपुष्पाभ्यां शोधयेत्कारणं ततः पाशादि
त्रिकबीजेन स्वाहांतेन कुलार्चकः अष्टोत्तरशता
हृन्माजपन्देत्तेविशोधयेत् गृहकामैकचित्तानां
गृहाणिप्रज्वलेकलौ आयतत्वप्रतिनिधौ विधेयंम
धुत्रयं दुग्धं सितामाक्षिकं च विहितं यमधुत्रयं सु
लिप्तमिदं मत्वा देवतायै निवेदयेत् स्वभावात्क
लिजन्मानः कामविध्वंतचेतसः तद्रूपेण न जानं
ति शक्तिं स्वामान्मबुद्धयः एतत्तेषां प्रतिनिधौ शोध
नत्वस्य पार्वति ध्यानेद्ध्याः परांभोजे स्वेष्टमेव ज।
पलस्या ततस्तु शामनत्वानि पललादीनि यानि
च प्रत्येकशतयातेन मन्त्रेणाभिमंत्रयेत् संवेद्य
स्तमयं ध्यानान्निमील्य नयनद्वयं निवेद्य पूर्ववत्का
लेपानभोजनमाचरेत् इदं तु भैरवीचक्रे सर्वतंत्रे
षु गोपितं न वाग्रे कथितं भद्रे स्मारात्स्मारपरात्परे
विवाहो भैरवीचक्रे तत्त्वचक्रेपि पार्वति सर्वथा स्वा
यत्तैद्रेणकर्तव्यः शैववर्त्मना विना परिणयं वीरः
शक्तिसेवां समाचरन् परस्त्रीगामिनां पापं प्राप्नुया
न्नात्र संशयः संप्राप्ते भैरवीचक्रे सर्वे वर्णाः पृथक्पृथ
क् नात्र जातिविचारोस्ति नोच्छिष्टादि विवेचनं चक्र
मध्यगता वीरा मद्यपानं चान्यथा न देशकाल।

म॰नि॰ नियमो न वा पात्रविचारणं। येनाकेनाहृतं द्रव्यं चक्रे
तं॰ स्मिन्विनियोजयेत् दूरदेशात्समानीतं पक्वं वापक्व
४९ मेव वा वीरेण पशुना वापि चक्रमध्यगतं शुचिः च
क्रारंभे महेशानि विघ्नाः सर्वे भयाकुलाः विभीता
स्ते पलायन्ते वीराणां ब्रह्मतेजसा पिशाचा गुह्यका
यक्षा वेतालाः क्रूरजातयः श्रुत्वा च भैरवीचक्रं दूरंग
च्छंति साधके तत्र तीर्थानि सर्वाणि महातीर्थादिका
नि च सेन्द्रामरगणाः सर्वे तत्रागच्छंति सादरं चक्र
स्यानेन महातीर्थं सर्वतीर्थादिकं शिवे त्रिदशा यत्र वां
छंति तत्र नैवेद्यमुत्तमं म्लेच्छेन श्वपचेनापि किरातेन
नापि हूणेन वा शुभे पक्वं यदानीतं वीरहस्तार्पितं शु
चि दृष्ट्वा तु भैरवीचक्रे मम रूपांश्च साधकान् मुच्य
न्ते पापपाशेभ्यः कलिकल्मषदूषिताः प्रबले कलि
कालेऽत्र न कुर्याच्चक्रगोपनं सर्वत्र सर्वदा वीरः साध
येत्कुलसाधनं चक्रमध्ये वृथालापं चांचल्यं बहुभा
षणं निष्ठीवनमधोवायुं वर्णभेदं विवर्जयेत् क्रूरा
न्खलान्पशून्पापान्नास्तिकान्कुलदूषकान् निंदका
न्कुलशास्त्राणां चक्राद्दूरतरं त्यजेत् स्नेहाद्भयाद
नुरक्त्या पशुं चक्रे प्रवेशयन् कुलधर्मात्परिभ्रष्टो वी
रोऽपि नरकं व्रजेत् ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः सामा

46

सजातयः कुलधर्माश्रितायेवैह्यग्रास्ते देववत्सदा
वर्णाभिमानाद्यश्चैतद्वर्णभेदं करोति यः सयाति घो
रनिरयमपि वेदान्तपारगः चक्रान्तर्गतकौलानां सा
धूनां शूद्रवेत्सौ साक्षाच्छिवस्वरूपाणां पापशाकाभ
वेन्नतः यावद्वसंति चक्रेषु विप्राद्याः शैवमार्गिणः
तावत्तेशांभवाचाराः श्रेयुः शिवशासनात् चक्राद्वि
निःसृताः सर्वे स्वस्ववर्णाश्रमोदिते लोकयात्राप्रसि
द्ध्यर्थं कुर्युः कर्म पृथक्पृथक् पुरश्चरणशतेनापि श
वश्चैरविता स्तनात् चक्रमध्ये सकृज्जप्वा तत्फलल
भते सुधीः भैरवीचक्रमाहात्म्यं को वा वक्तुं क्षमो भ
वेत् सकृद्देतत्त्वचक्रवीणः सर्वपापैः प्रमुच्यते प
णमासं भूमिपालः सार्द्धेषि स्वेजयः स्वयं निर्मसा
माचरन्मर्त्यो ब्रह्मनिर्वाणमाप्नुयात् बहुनाकिमि
होक्तेन सत्यं जानीहि कालिके इहामुत्र सुखावा
प्त्यै कुलमार्गो हि नापरः कालेः प्राबल्यसमये सर्वध
र्मविवर्जिते गोपनात्कुलधर्मस्य कौलोपि नारकी भ
वेत् कथिते भैरवीचक्रे भोगमोक्षैकसाधने तत्त्वच
क्रं कुलेशानि सांप्रतं वच्मि तल्लक्षणं तत्त्वचक्रं चक्रा
जे दिव्यचक्रं तदुच्यते नात्राधिकारः सर्वेषां ब्रह्मज्ञान्सा
धकान्विना परब्रह्मोपासका ये ब्रह्मज्ञा ब्रह्मतत्पराः

म·नि·
तं·
५७
47

शुद्धान्तःकरणाःशान्ताःसर्वप्राणिहितेरताः निर्व्विकारा
निर्विकल्पादयाशीलादृढव्रताः सत्यसंकल्पकाब्रा
ह्मास्तएवात्राधिकारिणः ब्रह्मभावेनतत्त्वज्ञेयेपश्यं।
तिचराचरं तेषांतत्त्वविदांपुंसांतत्त्वचक्रेधिकारिता
सर्वंब्रह्ममयंभावश्चक्रेस्मिंस्तत्त्वसंज्ञके येषामुत्पद्य
तेदेवितएवतत्त्वचक्रिणः नघटस्थापनात्रास्तिनबा
हुल्येनपूजनं सर्वत्रब्रह्मभावेनसाधयेत्तत्त्वसाधनं ब्र
ह्ममन्त्रीब्रह्मनिष्ठोभवेच्चक्रेश्वरःप्रिये ब्रह्मज्ञैःसाधकैः
सार्द्धंतत्त्वचक्रंसमारभेत् रम्येसुविमलेदेशेसाधका
नांसुखावहे विचित्रासनमानीयकल्पयेद्विमलास।
नं तत्रोपविश्यचक्रेशःसहितोब्रह्मसाधकैः आसा।
दयेत्तत्त्वानिस्थापयेदग्रतःशिवे तारादिप्राणबी
जांतंपात्राद्दृष्ट्वाजपेन्मनुम् सर्वतत्त्वेषुचक्रेशःस्वमेम
न्त्रमुदीरयेत् ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहु
तं ब्रह्मैवतेनगन्तव्यंब्रह्मकर्मसमाधिना सप्तधावा
त्रिधाजप्तानिसर्वाणिशोधयेत् ततोब्राह्मेणम।
न्त्रेणसमर्प्यपरमात्मनि ब्रह्मज्ञैःसाधकैःसार्द्धंविद
ध्यात्पानभोजनं ब्रह्मचक्रेमहेशानिवर्णभेदंविवर्ज
येत् नदेशकालनियमोनपात्रनियमस्तथा येकु।
र्वन्तिनराःमूढादिव्यचक्रेप्रमादतः कुलभेदंवर्णभे

देहांते गच्छंत्य परमां गतिं अतः सर्वप्रयत्नेन ब्रह्मज्ञैः सा
धकोत्तमैः तत्त्वक्रमतोष्ठेयं धर्मकामार्थसिद्धये
श्रीदेव्युवाच गृहस्थानामशेषेण धर्मानकथयत्प्रभो
संन्यासविहितान्धर्मान्कृपयावक्तुमर्हसि श्रीसदा
शिव उवाच अवधूताश्रमो देवि कलौ संन्यास उच्यते
विधिना येन कर्तव्यस्तत्सर्वं शृणु सांप्रतं ब्रह्मज्ञाने स
मुत्पन्ने विरते सर्वकर्मणि अध्यात्मविद्यानिपुणः सं
न्यासाश्रममाश्रयेत् विहाय वृद्धौ पितरौ शिशुं भा
र्यां पतिव्रतां त्यक्त्वासमर्थान्बंधून्प्रव्रजन्नारकी भ
वेत् ब्राह्मणः क्षत्रियो वैश्यः शूद्रः सामान्य एव च कु
लावधूतसंस्कारे पंचानामधिकारिता संपाद्य गृह
कर्माणि परितोष्य परानपि निर्ममो निलयाकांक्षी।
निष्कामो विजितेंद्रियः आहूय स्वजनान्बंधून्ग्राम।
स्थानन्यनिवासिनः प्रीत्यातुमतिमन्विद्वेद्गृहान्निग
मिषुर्नरः तेषामनुज्ञामादाय प्रणम्य परदेवतां
ग्रामं प्रदक्षिणीकृत्य निरपेक्षो गृहाद्व्रजेत् मुक्तः सं
सारपाशेभ्यः परमानंदनिर्वृतः कुलावधूतं ब्रह्मज्ञं
गत्वा संप्रार्थयेदिदं गृहाश्रमे परब्रह्मन्मयैतद्धिग
तं वयः प्रसादं कुरु मे नाथ संन्यासग्रहणं प्रति नि
शेषेन गृहकर्माणि विचार्य विधिवद्गुरुः पंचतत्त्वैर्विवेकि

म॰ त्रि॰ नैवेद्यं द्वितीयाश्रममादिशेत् ततः पिण्डाः कृतस्ना
तं॰ तोयतात्मा विहितान्हिकः ऋणत्रयविमुक्त्यर्थं देव
४८ र्षींश्चार्चयेत्पितॄन् देवा ब्रह्मा च विष्णुश्च रुद्रश्च सगणैः
48
सह ऋषयः सनकाद्याश्च देवब्रह्मर्षयस्तथा अत्रये
पितरः स्युर्वसामिश्रगुणतानपि पितापितामहः।
श्चैव प्रपितामह एव च मातापितामही देवी तथैव प्र
पितामही मातामहादयोप्येवं मातामह्यादयोपि च
प्राच्यां दिशि यजेद्देवान्दक्षिणस्यां पितॄन्यजेत् माता
महान्प्रतीच्यां वै यजेत् आत्मकर्मणि एवं दिक्क्रमतो
दद्यादासनानि द्वयं द्वयं देवादीन्क्रमतस्तथा बाह्य।
पूजां समाचरेत् समस्तेभ्यो विधिवत्तेभ्यः पिण्डान्दद्यात्पृ
थक्पृथक् पिण्डप्रदानविधिना दत्वा पिण्डं यथाक्रमं
कृताञ्जलिपुटो भूत्वा प्रार्थयेत्पितृदेवताः त्वमेव पि
तरो देवा देवर्षिमातृकागणाः गुणातीतपदस्थस्य
मन्दाणीकृतताचिरात् इत्यान्नृणमर्थयित्वा प्रणम्य
च पुनः पुनः ऋणत्रयविनिर्मुक्त्यात्मश्राद्धं प्रक।
ल्पयेत् पितामहात्मैव सर्वेषां तत्पिता प्रपितामहः
आत्मन्यात्मार्पणार्थाय कुर्यादात्मक्रियां सुधीः उ
मराभिस्त्रलोभत्वा एवं च कल्पितासने आवाह्यात्म
पितॄन् विदद्यात्पिंडं समर्चयेत् प्रागग्रान्दक्षिणाग्रा

स्वपस्मिमाग्रान्यथाक्रमात् पिंडार्थमात्मरेहमीत्व
दगयान्यकर्मणि समाप्यश्राद्धकर्माणि गुरुदक्षि
नवर्त्मना युयुत्तस्थिरशुद्ध्यर्थमिमं मंत्रशतं जपेत्
ह्रीं मंत्रकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुकमि
वबंधनान्मृत्योर्मुक्षीयमामृतात् उपासनान्तुसारे
णदेवोमंडलपूर्वके संस्थाप्यकलशं तत्र गुरुः स्वे
समारभेत् ततस्तपरमंब्रह्मध्यानाद्यंनवर्त्मना
विधायपूजांब्रह्मणोवह्निस्थापनमाचरेत् प्राणुक्तेस
ह्नेनवह्नौस्वकल्पोक्ताहुतिगुरुः दत्वाशिष्यंसमा
हूयसाकल्पद्वावयेत्ततः प्रादेशमाहृतिभिर्द्धन्वाप्रा
णहोमंप्रकल्पयेत् प्राणापानौसमानश्चोदानव्या
नौचवायवः ततहोमंततःकुर्याद्देहात्माध्यासमु
क्तये पृथिवीसलिलंवह्निर्वायुराकाशमेवच गंधो
रसश्चरूपंचस्पर्शःशब्दोयथाक्रमात् ततोवाक्पाणि
पादश्चपायूपस्थौततःपरं श्रोत्रंत्वक्नयनेजिह्वा
घ्राणंबुद्धीन्द्रियाणिच मनोबुद्धिश्चचित्तंवाहंकारो
देहजाःक्रियाः सर्वाणीन्द्रियकर्माणि प्राणकर्मा
णियानिच पंचानिमेषदोनेवस्तुद्धौतापदसुचरेत्
ह्रींमेतिरदेविरजाविपाप्मान्भूयासंसहिठःस्वाहा च
नविंशतितत्त्वानिकर्माणिदैहिकानिच हुत्वाग्नौ

निष्क्रियो देहं स्मृतत्वं चिंतयेत्ततः विभाव्य स्मृतत्वका
यरहितं सर्वकर्मणा स्मरेत्तस्मरमंत्रस्य यत्नसूत्रं समु
द्धरेत् ऐं क्लीं हूं स्मरंति मंत्रेण स्रुक्पाउत्तार्य मंत्रवित्
यत्नसूत्रं करे कृत्वा पठित्वा आहुतित्रयं वह्निजायां
समुच्चार्य हुत्वा तमनले क्षिपेत् हुत्वैवमुपवीतं च
कामबीजं समुच्चरन् छित्वा शिखां करे कृत्वा हुत्वा।
मध्ये नियोजयेत् ब्रह्मपुत्रि शिखे त्वं हि बालरूपा त
पस्विनी दीयते पावके स्थाने गच्छ देवि नमोस्तु ते
कामं मायां कूर्चमस्त्रं वह्निजायामुदीरयन् तस्मिन्
संस्कृते वह्नौ शिखाहोमं समाचरेत् शिखामाश्रित्य
पितरो देवा देवर्षयस्तथा सर्वाण्याश्रमकर्माणि नि
वसंति शिखोपरि अतः संतर्पिताः सर्वा देवर्षिपितृ
देवताः शिखासूत्रपरित्यागाद्देही ब्रह्ममयो भवे
त् यत्नसूत्रशिखात्यागात्संन्यासः स्याद्द्विजन्मनां पु
त्राणां मित्ररेषां च शिखां हुत्वैवमस्त्रक्रिया ततोमुक्त
शिखासूत्रः प्रणमेद्दंडवद्गुरुं गुरुस्तस्याप्यते शिष्य
दक्षकर्णे वदेदिदं तत्त्वमसि महाप्राते हंसः सोहं वि
भावय निर्ममो निरहंकारः स्वभावेन सुखेचर त
तोहं देव वह्निं च विसृज्य ब्रह्मतत्त्ववित् आत्मसूत्र
पतन्मत्वा प्रणमेच्छिरसा गुरुं नमस्तुभ्यं नमो मम।

शान्तंभंमहःशान्तंनमोनमः त्वमेवतत्त्वंत्वमेवविश्वरूप
नमोस्तुते ब्रह्ममंत्रेणोपासकानांतत्त्वज्ञानांजितात्म
नां स्वमंत्रेणशिखाच्छेदात्संन्यासग्रहणंभवेत् ब्र
ह्मज्ञानविशुद्धानांक्रियतेःश्राद्धपूजनैः स्वेच्छाचा
रपराणांतुप्रत्यवायोनविद्यते ततोनिर्द्वंद्वरूपोमौनि
क्षामस्थिरमानसः विहरेत्स्वेच्छयाशिष्यैःसानन्दा।
त्मयोगवि आब्रह्मस्तंबपर्यंतंसद्रूपेणविभावय
न् विस्मरेन्नामरूपाणिध्यायन्नात्मानमात्मनि श्रुति
केतःतस्मादतोनिःशोकःसंगवर्जितः निर्ममोनिरहं
कारःसंन्यासीविहरेत्त्रितो मुक्तोविधिनिषेधेभ्योनिर्यो
गक्षेमआत्मवित् स्वस्थःसमोधीरोजितात्माविग
तस्पृहः स्थिरात्माप्रशान्तःसोपिसर्वेष्वपिनिस्पृ
हः सदानंदसुखिःशांतोनिरपेक्षोनिराकुलः नोद्वेग
कःस्याज्जीवानांसदाप्राणिहितेरतः विगतामर्षभी
र्दीनोनिःसंकल्पोनिरुद्यमः शोकद्वेषविमुक्तःस्याच्छ
त्रौमित्रेसमोभवेत् शीतवातातपसहःसमोमानापमा
नयोः समःशुभाशुभेतुष्टोयदृच्छाप्राप्तवस्तुना निस्त्रै
गुण्योनिर्विकल्पोनिर्लोभःस्यादसंचयी यथासत्सु
पाश्रितसृष्टाविश्वस्थितिस्थिते आत्माश्रितस्तथादेहोज्ञा
नेत्रेवंसाक्षीभवेत् इंद्रियाण्येवकुर्वंतिसर्वंतुकर्मसर्वथा

म· नि कस्यचित् आत्मात्मानो विनिर्लिप्तो ज्ञात्वैवं मोक्षभाग्भवे
तं· त् यतः प्रतिग्रहं निंदामसत्यं क्रीडनं स्त्रिया रेतस्त्याग
५· ममसूयां च संन्यासी परिवर्जयेत् सर्वत्र समदृष्टिः स्यात्की
50 टे देवे तथा नरे सर्वं ब्रह्मेति जानीयात् परिव्राट् सर्वक
र्मसु विप्राद्वा श्वपचाद्वापि यस्मात्तस्मात् समागतं देश
कालं तथा पात्रमश्नीयादविचारयन् अध्यात्मशास्त्रा
ध्ययनैः सदा तत्त्वविचारणैः प्रवृत्तो न ये कालं स्वा
च्छाचारपरायणः संन्यासिनामन्तकाले दाहयेन्न क यं
दाचन संपूज्य गंधपुष्पाद्यैर्निखनेद्वाप्सु मज्जयेत् अ
प्रसक्तयोगमर्त्यानां सदा कामाभिलाषिणां स्वभावाज्जा
यते देवि प्रवृत्तिः कर्मसंकुले तत्रापि तेषां तन्त्रकाया
नाबीजपसाध्येन श्रेयसे देवजातं तत्तेवंवह्निस्पृ
याः अतः कर्मविधानानि प्रोक्तानि विविधानि ते नाम
रूपं च बहुविधं तदर्थं कल्पितं मया ब्रह्मज्ञानोदये दे
वि कर्मसंन्यसनेन विना ऊर्ध्वकल्पशतेनापि कर्मणे न भवेन्मु।
क्तिभाजनः कृत्वा ब्रह्मतत्त्वज्ञो जीवन्मुक्तो नराकृतिः।
तिः मान्नारायणं मत्वा गृहस्थो न परित्यजेत् यतेर्द।
र्शनमात्रेण विमुक्तः सर्वपातकान् तीर्थव्रततपोदान
सर्वयज्ञफलं लभेत् इति श्रीमहानिर्वाणतंत्रे सर्वतंत्रो
त्तमोत्तमे सर्वधर्मनिर्णयसारे श्रीमदाद्यासदाशिवसं

वादेवर्णाश्रमाचारधर्मकथनंनामाष्टमोध्यायः ८
महाशिवउवाच वर्णाश्रमाचारधर्माःकथितास्त
वसुव्रते संस्कारान्सर्ववर्णानां शृणुष्वगदतोमम
संस्कारेणविनादेवि देहशुद्धिर्नजायते नासंस्कृतो
धिकारीस्याद्दैवेपित्र्येचकर्मणि अतोविप्रादिभिर्वर्णै
स्वस्ववर्णोक्तसंस्क्रिया। कर्तव्यासर्वथायत्नैरिहामु
त्रहितेप्सुभिः जीवसेकः पुंसवनं सीमंतोन्नयनंतथा
था जातनामनी निष्क्रमणमन्नाशनमतःपरं चूडोप
नयनोद्वाहाः संस्काराःकथितादश शूद्राणांशूद्रभि
न्नानामुपवीतंनविद्यते तेषांनवैवसंस्काराद्विजा
तीनांदशस्मृताः नित्यानिसर्वकर्माणितथानैमि
त्तिकानिच काम्यान्यपिवरारोहे कुर्यात्स्वकामवर्त्म
ना यानियानिविधानानियेषुयेषुचकर्मसु पुरै
वब्रह्मरूपेणतान्युक्तानिमयाप्रिये संध्यानेषुच
सर्वेषुतन्त्रेष्वन्येषुकर्मसु विप्रादिवर्णभेदेषुक्र
मान्मंत्रश्चदर्शिताः सत्यत्रेताद्वापरेषुतत्तत्कर्मसु
कालिके प्रणवाद्यास्तुतान्मंत्रान्प्रयोगेषुनियोज
येत् कलौतुपरमेशानितैरेवमंत्रभिर्नराः माया
द्यैः सर्वकर्माणिकुर्याच्छंकरशासनात् निगमाग
मतंत्रेषुवेदेषुसंहितासुच सर्वेमंत्रामयैवोक्ताः

म. नि.
तं.
५१

५१

प्रयोगोयुगभेदतः कलावन्नगतप्राणाः मानवाः
हीनतेजसः तेषांहितायकल्याणिकुलधर्मोनिरूपि
तः कलिदुर्बलजीवानांप्रयासाशक्तचेतसां संस्कारा
दिक्रियास्तेषांसंक्षेपेणापिवक्ष्यते सर्वेषांशुभकार्या
णामादिभूताकुशण्डिका तस्मात्तांप्रवक्ष्यामि शृणु
एतांदेववंदिते रम्येपरिष्कृतेदेशेतुषांगारादिवर्जि
ते हस्तमात्रप्रमाणेनस्थंडिलंरचयेत्सुधीः त्रिरे
खाविधायतत्रप्रागग्रास्त्रिमंडले कूर्चेनाभ्युक्षिताः
सर्वावह्निनावह्निमाहरेत् आनीयवह्निंतत्रास्थेस्था
पयेद्वाग्भवंस्मरन् ततस्तस्मात्ज्वलद्दारुगृहीत्वादक्ष
पाणिना ह्रींक्रव्यादेभ्योनमःस्वाहाक्रव्यादांशंपरित्य
जेत् इत्थंप्रतिष्ठितंवह्निंपाणिभ्यामात्मसंमुखं उद्धृ
त्यतास्त्रेरक्षोमायाबीजंहृदिस्मरन् संस्थाप्यतृण
दारुभ्यांप्रबलीकृत्यपावकं समिधेद्देहनाकेचकृत्वा
तस्मिन्हुताशने स्वकर्मविहितंनामकृत्वाध्यायेद्धनं
जयं बालार्कारुणसंकाशंसप्तजिह्वंद्विमस्तकं त्रि
नेत्रंचशक्तिधरंजटामुकुटमंडितं ध्यात्वैवंप्रांजलि
र्भूत्वावाहयेद्धव्यवाहनं मायापूर्वाहिपदतःसर्वाम
रवदेतिच हव्यवाहपदांतेचमुनिभिःसगणैःसह अ
ध्वरंरक्षरक्षेतिनमःस्वाहाततोवदेत् इमावाद्यहव्यवाह

मयंतेयोनिरुद्धरन् यथोपचारैः संपूज्य सप्तजिह्वाः प्र
पूजयेत्। कालीकपालीच मनोजवा च सुलोहिता चैव
सु सुधूम्रवर्णा स्फुलिंगिनी विश्वनिरूपिणी च लोलाय।
मानेति च सप्तजिह्वाः। ततोग्रे पूर्वमारभ्य सहकीला
लपाणिना उत्तरान्तमहेशानि त्रिधा प्रोक्षणमाचरेत् त
थैव याम्यमारभ्य कौबेरान्तः कृतासिनः त्रिधा पर्युक्षणं
कुर्यात्ततो यज्ञीयवस्त्रेन परिस्तरेत्ततो दर्भैः पूर्वस्मादु
त्तरावधि उदक्संस्थैः कृतराग्रैः प्रागग्रैश्च दिक्स्थितैः
अग्नेर्दक्षिणतः कृत्वा गत्वा ब्रह्मासनान्तिके वामांगुष्ठक
निष्ठाभ्यां ब्रह्माणीकल्पितासनात् गृहीत्वा कुशपत्रकं
हौ निरस्तः परावसुः इत्युक्त्वाग्रे दक्षिणस्यां निक्षिपेदुक
रादिना सीद यज्ञपते ब्रह्मन्निदं ते कल्पितासनं सीदा
मीति वदन् ब्रह्मा विशेत्तत्रोत्तराभिमुखः संपूज्य गंधपुष्पा
द्यैर्ब्रह्माणं प्रार्थयेदिदं गोपाय यज्ञं यज्ञेश यज्ञं पाहि बृ
हस्पते मां च यज्ञपतिं पाहि कर्मसाक्षिन्नमोस्तु ते गो
पयामि वदेद्ब्रह्मा ब्रह्माभावे स्वयं वदेत् तत्र दर्भमयं
विप्रं कल्पयेद्यज्ञसिद्धये ततो ब्रह्मन्निहागच्छागच्छे
त्यावाह्य साधकः पाद्यादिभिश्च संपूज्य यावद्यज्ञसमा
प्ते तावद्भव द्विजः स्थातव्यमिति प्रार्थ्य नमेत्ततः सोद
केन करेणाग्नेरीशानाद्ब्रह्मणोन्तिकं त्रिधा [illegible] पर्युक्ष्य।

म. नि. वह्निं च त्रिः प्रोक्ष्य तदनंतरं आगतस्य वर्त्मना तेन समुप
तं. विश्य निजासने स्थंडिलस्योत्तरे दर्भांस्तूदगग्रान्परि
५२ स्तरेत् तेषूत्तरीयवस्तूनि सर्वाणि सादयेत्तथोः
58 सोदकं प्रोक्षणीपात्रमाज्यस्थालीं समित्कुशान् आसा
द्य स्रुक्स्रुवादीनि ह्रां ह्रीं ह्रूमिति मंत्रकैः द्विरष्टसा
प्रोक्षणेन संस्कृत्य तदनंतरं इध्यंबांदक्षिणंजानुपा
तयित्वा स्रुवेस्रुचा घृतमादाय मतिमांश्चिंतयन्हितमा
त्मनः ह्रीं विंववेहिठं तेन प्रदद्यादाहुतित्रयं तथैव
घृतमादाय ध्यायन्देवं प्रजापतिं वायव्यादग्निकोणां
तं जुहुयादाज्यधारया पुनर्घृतं समादाय ध्यायन्देवं
पुरंदरं नैर्ऋतादीशकोणांतं जुहुयादाज्यधारया तता
ग्रेरुत्तरे याम्ये मध्ये च परमेष्ठिनि अग्निः सोमं च अग्नीसोमौ
समुद्दिश्य यथाक्रमात् सचतुर्थीनमोंतेन मायादीना
हुतित्रयं हुत्वा विधेयकर्मांके होमं कुर्याद्विचक्षणः
आहुतित्रयदानांते यागहोमं प्रवक्ष्यते यद्युद्दिष्टाहु
तिं दद्यात् दद्याद्देशोपि तत्कृते समाप्य प्रकृते कर्मस्वि
ष्टिकृद्धोममाचरेत् प्रायश्चित्तात्मको होमः कलौ ना
स्तिवरानने स्विष्टिकृतान्त्याहुतिभिः प्रायश्चित्तं विधीय
ते पूर्ववद्धविरादाय ब्रह्माणं मनसा स्मरन् अस्मिन्कर्म
णि दैवात्प्रमादाद्वा मनसापि वा न्यूनाधिकं कृतं यच्च म

वैस्विष्टिकृतंकुरु मायाघेनाग्नेनादेविस्वाहातेनाहुतिंहु
नेन त्वमग्ने सर्वलोकानांपावनःस्विष्टिकृत्प्रभुः यत्तस्मा
त्तीहोमकर्तासर्वान्कामान्प्राप्नुय अनेनहवनंकुर्यान्मा
ययावह्निजायया इत्थंस्विष्टिकृतंहोमःसमाप्यक्रमसा
धकः कर्मणोस्यपरब्रह्मत्रपुकंविहितंचयत् तत्कुर्यात्
यत्तंसंपन्नेव्याहृत्याहूयतेविभो मायादिवह्निजायांतै
र्भूर्भुवःस्वरितित्रिभिः आहुतित्रितयंदद्यात्त्रितयेनतत्।
थैवच हुत्वाग्नौयजमानेनदद्यात्पूर्णाहुतिंत्रयः स्वयं
वैकमेकर्तास्यान्स्वयमेवाहुतिंक्षिपेत् अभिषेकविधा
नानामेवमेवविधिःस्मृतः आदौमायांसमुच्चार्यततोय
जपतेवदेत् पूर्णंभवतुयत्तोमेलक्ष्मीत्वयत्तदेवताः फ
लानिसमग्रयत्कुत्वबह्निकांतावधिर्मंत्रः मंत्रेणानेनम
तिमानुत्थायसहसमाहितः फलतांबूलसहिताहुतिंद
द्यात्तुताशने दत्वपूर्णाहुतिंविद्वान्शांतिकर्मसमाचरे
त् श्रीवर्णीपात्रतोयेनकुशैःसंमार्जयेच्छिरः आपःस्व
मित्रियाःसंतुभवंतौषधयोमम आपोरक्षंतुमामित्या
मापोनारायणःस्वयं आपोहिष्ठामयोभुवस्तानऊर्जे
दधातनः इत्याभ्यांमार्जनंकृत्वाभूमौबिंदूनिविनिक्षिपेत्
येहिषंतिचमांनित्यंयांश्चद्विष्मोनराल्वयं आपोदुर्मि
त्रियास्तेषांसंतुभवंतुतानपि अनेनेशानदिग्भागे।

म.नि. विहृत्य निष्पतान्कुशान् हित्वा कृतांजलिर्भूत्वा प्रार्थयेद्ध
तं. व्यवाहनं श्रद्धां विद्यां बलं मेधां प्रज्ञां पुष्टिं यशः श्रियं आ
५३ रोग्यं तेज आयुष्यं देहि मे हव्यवाहन इति प्रार्थ्य वीतिहोत्रं
विसृजेदनेनाशिवे यज्ञ यज्ञपतिं गच्छ यज्ञं गच्छ हुताशन
57 स्वां योनिं गच्छ यज्ञेश हरयास्मन्मनोरथं अग्नेत्तमसवस्वा
हेति मंत्रेणाग्नेरुदग्दिशि दत्वा दत्वाहुतिं वह्निं दक्षिणस्या
विचालयेत् ब्रह्माणं दक्षिणां दत्वा भक्त्या नत्वा विसर्जयेत्
ततस्तु तिलकं कुर्यात्स्रुवमूलस्थभस्मना मायाकामं स
मुच्चार्य सर्वशांतिकरो भव ललाटे तिलकं कुर्यान्मंत्रेणा
नेन याज्ञिकः शांतिरस्तु शिवं चास्तु वासवाग्निप्रसादतः
मरुतां ब्रह्मणश्चैव वसुरुद्रप्रजापतेः अनेन मन्त्रेणायुष्यं
धारयन्मस्तकोपरि स्वशक्त्या दक्षिणां दद्याद्धोमप्रकृत
कर्मणः इति ते कथिता देवि सर्वकर्म कुशंडिका प्रयो
ज्या शुभकर्मादौ यत्नतः कुलसाधकैः प्रकृते कर्मणि शि
वे च कुर्यात् कुलागमः सिद्ध्यर्थं कर्मणां तेषां चरुकर्म नि
गद्यते चरुस्थाली प्रकर्तव्या ताम्री वा मृत्तिकोद्भवा कुशं
डिकोक्तविधिना द्रव्यसंस्करणावधि कृत्वा कर्म चरुस्था
लीमानयेदात्मसंमुखे अनंतनामपर्णं दृष्ट्वा प्रादेशपरि
माणकं पवित्रकुशमेकं च स्थालीमध्ये नियोजयेत् आ
नीय तंडुलांस्तत्र संस्थाप्य स्थंडिलांतिके यस्मिन्कर्मणि

येदेवाःपूजनीयाःस्मार्त्तास्ते ततन्नामचतुर्थ्यंतमुक्त्वा
ताश्चषष्ठमीरयन् गृह्णामिनिर्वपामीतिप्रोक्तयामिक्रमा
द्वदन् गृहीतानिर्वपेत्स्थाल्यांप्रोक्षयेज्जलबिंदुना प्रत्ये
कंचतुरोमुष्टीन्देवमुद्दिश्यतंडुलान् ततोदुग्धंसिताचै
वदत्वापाकविधानतः स्रुपचेत्संस्कृतेवह्नौसावधानेन
स्रुवेन स्रुपक्वंकोमलंतानादघानत्वच्युतस्करे ऽग्नेरुत्त
रतःपात्रंविनिधायकुशोपरि घृतस्त्रियाहुतंदत्वास्था
लीमाच्छादयेत्कुशैः ततःस्रुवेचकस्थाल्याच्युताधारण
एवंकं किंचिन्नकंसमादायजातहोमंसमाचरेत् धारा
होमंततःकृत्वाप्रधानीभूतकर्मणि यत्रयेविहितादेवा
तन्मंत्रैराहुतिंहुनेत् समाप्यप्रकृतंहोमंस्विष्टिकृद्धोम
एवंकं प्रायश्चित्तात्मकंकृत्वाकुर्यात्कर्मसमापनं संस्का
रेषुप्रतिष्ठासुविधिरेषप्रकीर्तितः विधेयःशुभकर्मादौ
कर्मसंसिद्धिहेतवे अथोच्यतेमहामायेदर्भाधानोदिता
क्रियाः तत्रादौवृतसंस्कारःकथ्यतेक्रमतःशृणु कृत्वा
नित्यक्रियाःशुद्धःपंचदेवान्समर्चयेत् ब्रह्मादुर्गागणे।
शाश्चग्रहादिकानयसत्वथा स्थंडिलस्यदक्षिभागेचैतेषु
तान्प्रपूजयेत् ततस्तुमातृकाःपूज्यागौर्याद्याःषोडश
क्रमात् गौरीपद्माशचीमेधासावित्रीविजयाजया दे
वसेनास्वधास्वाहाशांतिपुष्टिधृतिःक्षमा आत्मनोदेवता

वैवतथैवकुलदेवताः आयांतु मातरः सर्वास्त्रिदशा।
नंदकारिकाः विवाहव्रतयज्ञानां सर्वाभीष्टप्रकल्पने।
यानशक्तिसमारूढाः सौम्यमूर्तिधराः सदा आयांतु मा
तरः सर्वा यज्ञोत्सवसमृद्धये इत्यावाह्य मातृगणान् स्था
पनायपरिस्तृणुपद देहल्यां नाभिमात्रायां प्रादेशपरिमा
णतः समं वा पंच वा बिंदून्दद्या[illegible]द्वयं वेदैः प्रत्येकवि स्नि
डुमतिमान्कामं मायारमां स्मरन् घृतधारामविच्छिन्नां
दद्यात्तत्र च संयजेत् वसुधाराप्रकल्प्यैवं मयोक्तेनैव व
र्त्मना विरच्य स्थंडिले धीरो वह्निस्थापनपूर्वकं होमद्र
व्याणि संस्कृत्य पचेच्चरुं मन्त्रनमं प्राजापत्यं चरुं स्थाप्य वा
युनामा हुताशनः समाध्यायाहोमांतं कृत्स्नमानेवमा
ये रमेत् ह्रीं प्रजापते स्वाहा वरुणौ वाहुतित्रयं प्रदापये।
काहुतिं दद्यादिमं मंत्रमुदीरयन् विष्णुर्योनिं कल्पयतु
त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं द
धातु ते आद्येन वरुणं वापि साद्येन वरुणापि वा स्वयं
प्रजापतिं विसृज्याथ त्र्याहुतिमुत्सृजेत् गर्भं धेहि सि
नीवाली गर्भं धेहि सरस्वति गर्भं ते अश्विनौ देवावाधत्तां
पुष्करस्रजौ ध्यात्वा देवीं सिनीवालीं सरस्वतीमश्विनौ तथा
स्वाहांतमन्त्रनामेन दद्यादाहुतिमुत्तमां ततः कामबीजं
मायारमां कूर्चं मन्त्रमुच्चरन् अमुष्यै पुत्रकामायै गर्भमा

येहि सद्विठं उक्त्वा ध्यात्वा रविं विलोक्य हृदयात्संस्कृतेनले
यथेयं पृथिवी देवी सम्मानं गर्भमादधे तथाहं गर्भमा
येहि दशमे मासि सूतये स्वाहा तेनाम्भसा विलोक्य ध्याय
त्वाहुतिमाचरेत् पुनः संसमाधाय ध्यात्वा विलोक्य परात्प
रं विश्लेऽश्रेष्ठेन रूपेणानार्यामस्यां वरीवसं सुतमा
येहि ठं ठं स्मृत्वा वक्त्रे ह विसृजेत् कामेन पूरितां मा
यां मायया पूरितां वक्ष्ये पुनः कामं च मायां च पठित्वा सा
शिरः स्पृशेत् पतिव्रतवतीभिश्च नारीभिः परिवेष्टितः
शिरश्चालभ्य हस्ताभ्यां वध्वाः क्रोडावलेपनैः विलोक्य
गोविदं सूर्यं ध्यात्वा दद्यात्फलत्रयं ततः स्विष्टिकृतं हु
त्वा प्रायश्चित्तमासमापयेत् यदा च देवसमये गौरीशंक
रपूजनात् भास्करार्घ्यप्रदानाच्च दंपत्योः शोधनं भवेत्
शान्तिं वै कथितं कर्म गर्भाधानमथोच्यते तद्रात्रावस्मरा
शैवाङ्गमायां निशि भार्यया सदनाभ्यन्तरं गत्वा ध्यात्वा
देवं प्रजापतिं स्मृत्वा स्त्रीपठेद्रत्नां मायावीजपुरःसरं
भावयोः सुप्रजायै त्वं शय्यें शुभकरी भव आरुह्य भार्य
यासा शय्यां आशङ्कुतो वा प्युदङ्मुखः उपविश्य स्त्रियं प्रप
न्नां मायायमस्तके वामेन पाणिना लिंगं स्थाने स्था
नेमन्त्रं जपेत् पीठिकामंशतं जप्त्वा विन्दुके वाग्भवं शतं
केठं रमां विंशतिया स्तनं द्वंद्वे शतं प्राणं हृदये दशधा

म. नि. मायां नाभौ तां पंचविंशतिं जप्त्वा योनौ करं दत्वा कामेन
तं. कामेन सह त्वाग्भवं शतमष्टोत्तरं जप्त्वा लिंगे ध्येवं समा
५५ चरेत् विकाश्य मायया योनिं स्त्रियं गच्छेत्तस्मिन् समये रे
55 तः सम्पातसमये ध्यात्वा विसृष्टं तं पतिः नाभेरधस्तात्त्रि
कोंडे रक्तिकायां प्रपातयेत् शुक्रसेकान्तरे विद्वानिमं मंत्र
मुदीरयेत् यथाग्निना सगर्भा स्युर्धीर्यथा वज्रधारिणा
वायुना दिग्गर्भवती तथा गर्भवती भव जाते गर्भे स्त्रैयात
स्त्रित्रयमस्मिन्वा महेश्वरि तृतीये गर्भमासे तु चरेत्पुंसवनं
गृही कृतनित्यक्रियो भर्ता पंचदेवान्समर्चयेत् गौर्यादि
प्राद्दं॰ मातृकाश्चैव वसोर्धारां प्रकल्पयेत् वृद्धिं ततः कृत्वा ए
कोक्तविधिना सुधीः धाताहोमं समापाद्य कुर्यात्पुंसवन
क्रियां प्राजापत्यश्चरुस्तत्र चेन्दुनामा हुताशनः गर्भेद
धियवं चैकं होमावापि निक्षिपेत् पतिः पृच्छेत् स्त्रियं
भद्रे किं त्वं पिबसीति कृते ततः सीमन्तिनी ब्रूयात्मा या
पुंसवनं त्रिधा प्रसन्ती स्त्री त्रिः पिबेत् त्वारी एवमाषष्ठेन दधि
जीवन्तं तानि भिवत्ति तां यागस्थाने समानयेत् संस्थाप्य
वामभागे तां च रुहोमं समाचरेत् एवं वह्निमादाय मा
यां कृत्वं समुच्चरेत् ये गर्भविघ्नकर्तारो ये च गर्भविनाश
काः भूताः प्रेताः पिशाचाश्च वेताला बालघातकाः तान्स
र्वान्नाशय हं हं गर्भं रक्ष कुरु स्वाहा मंत्रेणानेन रक्षां त्वा

विंतयित्वा हुताशनं रुद्रं प्रजापतिं ध्यायन्नुद्द्याद्द्वाद
शाहुतीः ततो मायावेद्दमसे स्वाहेत्याहुतिपंचकं द
त्वा भार्याहृदि स्पृष्ट्वा मायां लक्ष्मीं शतं जपेत् ततः स्विष्टि
कृतं हुत्वा प्रायश्चित्तं समापयेत् ततस्तु पंचमे मासि द
द्यात् पंचामृतं स्त्रियै शर्करामधुदुग्धं च घृतं दधि समांश
कं पंचामृतमिदं प्रोक्तं देहशुद्धौ विधीयते वाग्भवं मद
नं लक्ष्मीं मायां कूर्चं पुरंदरं पंचकं जप्त्वोपरि शिवे प्रजप्य
च पंचधा एकीकृत्यामृतान्यत्र प्राशयेद्दयितां पतिः सीमं
तोन्नयनं कुर्यान्मासि षष्ठेऽष्टमेऽपि वा यावन्न जायते पुत्र
स्तावत्सीमंतनक्रिया सर्वां कथां राहोमांतकर्म कृत्वा स्त्रि
या सह उपविश्यासने प्राज्ञः प्रदद्याद्वाहुतित्रयं विश्व
वे भास्वते धात्रे वह्निजायां समुच्चरन् ततश्चंद्रमसं ध्या
त्वा शिवनाम्नि हुताशने सप्तधा हवनं कुर्यात् सोममु
द्दिश्य मानवः अश्विनौ वासवं विष्णुं शिवं दुर्गां प्रजाप
तिं ध्यात्वा प्रत्येकतो दद्यादाहुतीः पंचधा शिवे स्वर्णकं
कनिकां भर्ता गृहीत्वा दक्षिणे करे सीमंतं ढंढंके शांत
केशपाशे निवेशयेत् शिवं विष्णुं विधिं ध्यायं मायावी
जं समुच्चरन् भार्यैकल्याणि सुभगे दशमे मासि सुव्रते
सुपुत्रं तु नाभवप्रीत्या प्रसादाद्दिष्टकर्मणः आयुष्मती
ं कंकतिकां वर्द्धस्वीतेषु भं कुरु ततः समापयेत्कर्म स्त्रि

म. नि. छिकुहवनादिभिः जातमात्रेस्तनंदृष्ट्वादत्वास्वर्णंगृहं
तं. ते पूर्वोक्तविधिनाधीरोधाराद्धोमंसमापयेत् ततःपं
५६ चाहुतीर्दद्यात्अग्निमिंद्रंप्रजापतिं विश्वान्देवांश्चब्रह्मा
56
णमुद्दिश्यतदनंतरं मधुसर्पिःकांस्यपात्रेसमानीयस
मांशकं वाग्भवंशततयाजप्त्वाप्राशयेत्तनयंपिता दत्तह
स्तानामिकायामंत्रमेनंसमुच्चरन् आयुर्वर्चोबलंमेधां
वर्द्धतांतेसदाशिशो इत्यायुर्जननंकृत्वागुह्यनामप्रक
ल्पयेत् कृतोपनयनेपुत्रेतेननाम्नासमाह्वयेत् प्रायश्चि
त्तादिकंकृत्वाजातकर्मसमापयेत् नालच्छेदंततोधा
त्रीकुर्यादुत्साहपूर्वकं यावन्नछिद्यतेनालंतावच्छावं
नवाप्नते प्रागेवनाडिकाच्छेदाद्देवीपित्रीक्रियांचरेत्
कुमार्याश्चापिकर्तव्यमेवमेवममंत्रकं षष्ठेवाचाष्टमे
मासिनामकुर्यात्प्रकाशतः स्नापयित्वाशिशुंमातापरि
धायांबरेशुभे भर्तुःपार्श्वेसमागत्यप्राङ्मुखंस्थापये
त्सुतं अभिषिंचेच्छिशोर्मूर्ध्निसहिरण्यकुशोदकैः जा
ह्नवीयमुनारेवासपवित्रासरस्वती नर्मदावरदाकुंतीसा
गराश्चसरांसिच एतेत्वामभिषिंचंतुधर्मकामार्थसिद्धये
ॐह्रींआपोहिष्ठामयोभुवस्तानऊर्जेदधातन महेरणाय
चक्षसे ॐयोवःशिवतमोरसस्तस्यभाजयतेहनः उशती
रिवमातरः ॐतस्माअरंगमामवोयस्यक्षयायजिन्वथ

आपोजनयथाचनः। अभिषिच्य त्रिभिर्मंत्रैः पूर्ववद्वह्नि
संस्क्रिया कृत्वा संपाद्य चारं तं दद्यात्पंचाहुतीः स्वधीः
अग्नये प्रथमां दत्वा वासवाय ततः परं ततः प्रजापतये
विश्वेदेवेभ्य एव च ब्रह्मणे चाहुतिं दद्याद्धोमपार्थिवसं
ज्ञके ततो केशत्रमादाय आवयेद्दक्षिणे श्रुतौ स्वस्यात्तं
सर्वो वा यं शुभं नाम विचक्षणः आवयित्वा त्रियानाम
ब्राह्मणेभ्यो निवेद्य च ततः समापयेत्कर्म कृत्वा स्विष्टकृ
दादिकं कन्याया निष्क्रमो नास्ति हृष्टि आहुन विद्यते ना
मान्नप्राशने चैव कुर्याद्धोमान मंत्रकं चतुर्थे मासि षष्टे वा
कुर्यान्निष्क्रमणं शिशोः कृतनित्यक्रियः स्नातः संपूज्य
गणनायकं स्नापयित्वा ततनयं वस्त्रालंकारभूषितं स
स्याथ पुरतो विद्वानिमं मंत्रमुदीरयेत् ब्रह्मा विष्णुः शिवोऽ
गोगणेशो भास्करस्तथा इंद्रो वायुः कुबेरश्च वरुणोग्निर्बृ
हस्पतिः शिशोः शुभं प्रकुर्वंतु रक्षंतु पथि सर्वदा इत्युक्त्वा
केसमादाय गीतवाद्यपुरःसरं वह्निनिष्क्रामयेद्बालं स्वानं
दः स्वजनैः सह गत्वाध्वनि किंचिद्दूरं शिशुं सूर्यं निरीक्षयेत्
ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः
शतं जीवेम शरदः शतं। इत्यादित्यं दर्शयित्वा समागत्य।
निजालयं अर्घ्यं दत्वा दिनेशाय स्वजनान्भोजयेत्पिता ष
ष्टेमासि कुमारस्य मासि वाष्टमे शिवे पितृभ्राता पिता वा

सं.नि. पिकुर्यादन्नप्राशनक्रियां पूर्ववद्देवपूजादि वह्निसंस्क
ते. रणं तथा पंचवारुणकर्माणि संपाद्य विधिवन्मिता
५२ दद्यात्सवाहुतीस्तत्र शुचिनाग्निहुताशने अग्निशुद्धहविष
57 प्रथमां द्वितीयां वा सर्वं स्मरन् ततः प्रजापतिं देवं विष्णु
देवान्ततः परं ब्रह्माणं च समुद्दिश्य पंचमीमाहुतिं यजे
त् ततो ग्रावच्छन्दांस्यान्तादन्नपंचाहुतिः पिता तत्राथ वा
गृहेऽस्मिन्वस्त्रालंकारशोभितं क्रोडे निधाय तनयं प्रा
शयेत्पायसान्नं तं पंचप्राणाहुतेर्मंत्रैर्भोजयित्वा तथैव
या ततो लक्ष्मजनादीनां दत्वा किंचिद्विच्छिशोर्ध्वे शं वे
त्वर्थ्यादिदोषेण प्रायश्चित्तं समापयेत् अन्नप्राशने
प्रोक्तं चूडाविधिमतः शृणु तृतीये पंचमे वर्षे कुलाचारा
नुसारतः चूडाकर्म शिशोः कुर्याद्बालसंस्कारसिद्धये
पुरा देवपूजाविधारंभं निष्पाद्य साधकः सत्याग्रेऽन्तरे देशाद्
ष्टगोमयपूरितं तिलगोधूममसूरकं शरावं स्थापयेद्बुधः
कवोष्णसलिलं वापि चरमेकं सशाणितं प्राग्यस्य तनयं
तत्र जनकः स्वीयवामतः संस्थाप्य जननीक्रोडे कवोष्ण
सलिलैः स्नातैः वारुणं दशाया जन्मासं मार्त्य शिशुमूर्ध्न जान्
मायया कुशपत्राभ्यां त्रुटिमेकां प्रकल्पयेत् मायां लक्ष्मी
विद्यां जप्त्वा शुद्धीनालोहजेनारं छित्वा तत्त्रुटिकामूलं मा
तृहस्ते निवेशयेत् कुमारमाता हस्ताभ्यामादाय गोमयी

विते शरावे स्थापयेज्जुष्टिं नापिताय पित्रा वदेत् त्वर
मुंडिंच्छिशोः क्षौरं स्वलंमायय उद्धयं पठित्वा नापितं
पश्यन्स्वस्य नाम त्रिपावके प्रजापतिं समुद्दिश्य प्रद।
द्यादाहुतित्रयं नापितेन कृते क्षौरे स्नापयित्वा शिशुं
ततः वस्त्रालंकारमाल्येन भूषयित्वाग्निसन्निधौ स्व
वामभागे संस्थाप्य स्विष्टिकृद्धोममाचरेत् प्रायश्चित्ते
ततः कृत्वा दद्यात्पूर्णाहुतिं पिता मायाशिशो ते कुश
ले कुरुतेतो विष्णुकृद्धिभुः पठित्वैनं शिशोः कर्णौ स्वर्ण
मय्याशलाकया राजताले लोहमय्या वा कर्णवेधं प्रक
ल्पयेत् आपोहिष्ठेति मंत्रेण अभिषिच्य स्नातं ततः शा
न्त्यादि दक्षिणां कृत्वा चूडाकर्म समापयेत् गर्भाधानादि
चूडांतं समानं सर्व जातिषु शूद्रसामान्य जातीनां सर्व
मेतदमंत्रकं जातकर्मादि चूडांतं कुमार्यास्त्वमंत्रकं
कर्तव्यं पंचभिर्वाणैरेकं निष्क्रमणं विना अथोच्यते द्वि
जातीनामुपवीतक्रियाविधिः यस्मिन्कृते द्विजन्मानो
दैवपैत्र्याधिकारिणः गर्भाष्टमेऽष्टमे वाब्दे कुर्यादुपनयं
शिशोः षोडशाब्दाधिको नोपनेतव्यो निष्क्रियोपि सः
कृतनित्यक्रियो विद्वान्स चदेवान्समर्चयेत् गौर्यादिमा
तृकाश्चैव वसुधारां प्रकल्पयेत् वृद्धिश्राद्धं ततः कुर्याद्दे
वतापितृन्समेये कुशंडिकोक्तविधिना धारा होमांतमा।

मं.नि. चरेत् प्रातःकृताशनंबालंसुस्नातंसमलंकृतं शिखां।
तं. विनाकृतचौरंचौमांबरविभूषितं छायामंडपमानी
५८ यसमुद्रवह्नताशितः समीपेचात्मनोवामेसंस्थाप्य
58 विमलासने शिष्यंवदेद्ब्रह्मचर्य्यंकुरुवत्सततःशिष्य :
ब्रह्मचर्यंकरोमीतिगुरवेविनिवेदयेत् ततोगुरुःप्र
सन्नात्माशिशवेशांतचेतसे काषायवाससीदद्याद्दी।
र्घायुष्यायवर्चसे मौंजीकुशमयींवापित्रिवृतांग्रंथिसं।
युतां तस्मैचमेखलांदद्यात्कार्ष्यायार्च्यपावित्री माया थ
युष्यार्थस्सुभगामेखलासाक्षुभप्रदा रक्षकामेखलाब
द्धामौनीतिष्ठेद्गुरोःपुरः यज्ञोपवीतंपरमंपवित्रंप्रजाप
तेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञो
पवीतंबलमस्तुतेजः मंत्रेणानेनशिशवेदद्यात्कृष्णाजि
नान्वितं यज्ञोपवीतंदंडंचवैणवंखादिरंचवा पालाश
मथवादद्यात्क्षीरवृक्षसमुद्भवं आपोहिष्ठेतिमंत्रेणमा।
ययापुरितेनच त्रिराहृत्याकुशांभोभिर्दंडोपवीति
नं अभिषिच्यततस्तोयैःस्थापयेद्बालकांजलिं तदंजलि
दिनेशायददातारंब्रह्मचारिणं तच्चक्षुरितिमंत्रेणदर्शये
द्भास्करंगुरुः दृष्ट्वाभास्करमाचार्योवदेन्माणवकंततः
ममव्रतेमनोपेहिममचित्तंददामिते जुषस्वैकमनावा।
ममवाचोस्तुतेशिवं हरिस्त्वांप्रत्यपादिष्टवेनंकिन्नामा।

सीतिंत्वंवदेत् शिष्यस्त्वमुकशर्माहं भवंतमभिवादये
कस्यत्वंब्रह्मचारीति गुरोः पृच्छति पार्वति शिष्यः साव
हितो ब्रूयाद्भवतो ब्रह्मचार्यहं इंद्रस्य ब्रह्मचारी त्वमा।
चार्यस्ते हुताशनः इत्युक्त्वासगुरुः पश्चाद्देवेभ्यस्तं सम
र्पयेत् त्वां प्रजापतये वत्स सवित्रे वरुणाय च पृथिव्यै
विश्वेदेवेभ्यः सर्वदेवेभ्य एव च समर्पयामि तेनैवं रक्षं
त्वं त्वां निरंतरं ततो माणवको वह्निं दक्षिणावर्तयोग
तः गुरुं प्रदक्षिणीकृत्य स्वासने पुनराविशेत् गुरुः शि
ष्येण संस्पृष्टः समुद्रवहुताशने पंचदेवान्समुद्दिश्य।
दद्यात्संवाहुतीः प्रिये प्रजापतिस्तथा सूर्यो विश्वेब्र
ह्मा शिवस्तथा मायादिवह्निजायांतैर्जुहुयात्स्वस्वना
मभिः अष्टकमंत्रे सर्वत्र विधिरेष प्रकीर्तितः ततो दु
र्गा महालक्ष्मीः सुंदरी भुवनेश्वरी इंद्रादिदशदिक्पाला
भास्करादिनवग्रहाः प्रत्येकनाम्नाहुत्वैतान्वासमस्ताच्छा
यवालकं पृच्छन्माणवकं शान्तो ब्रह्मचर्याभिमानि।
ने कोवाश्रमस्तेतनय ब्रूहि किं ते मनोगतं ततः शिष्यः
सावहितो नत्वा गुरुपदद्वयं करोतु मामाश्रमिणं ब्र
ह्मविद्योपदेशतः एवं प्रार्थ्यमानस्य दक्षकर्णे शिष्यो
स्तदा श्रावयित्वात्रियातारं सर्वं मंत्रमयं शिवे व्याहृति
त्रयमुच्चार्य सावित्रीं श्रावयेद्गुरुः ऋषिः सदाशिवः प्रो।

मं. नि. कण्ठं दक्षिणहस्तेनुदाहृतं अथि छन्दःशीतसा विश्वामित्रो न्नार्थे
तं. विनियोगिता आदौतत्सवितुःपश्चाद्वरेण्यपदमुच्चे
५९ त् गर्भःपदान्तेदेवस्यधीमहीतिपदंवदेत् ततस्तु
परमेशानिधियोयोनःप्रचोदयात् पुनःप्रणवमुच्चा।
येत्सावित्र्यर्थंगुरुर्वदेत् अष्टगात्मकतोरेणपरेशःप्र
तिपाद्यते पाताहर्ताचसंस्रष्टायोदेवःप्रकृतेःपरः अ।
सौदेवस्त्रिलोकात्मात्रिगुणेव्याप्यतिष्ठति अतोविश्व।
मयंब्रह्मवाच्यव्याहृतिभिस्त्रिभिः नारव्याहृतिवाचो
यःसावित्र्यात्नेयप्रवस्तः जगद्रूपस्यसवितुःसंस्र।
ष्टुर्दीव्यतोविभो अंतर्गतंमहद्दीवरेणीयंयनात्म
भिः ध्यायमतत्परंसंम सर्वव्यापिसनातनं योग।
भिःसर्वसाक्षीशोमनोबुद्धीन्द्रियाणिनः धर्मार्थकाम
मोक्षेषुप्रेरयेद्धिनियोजयेत् इत्यर्थयुतांब्रह्मवि।
द्यामादिश्यसद्गुरुः शिष्यंनियोजयेद्देवि गृहस्थाश्र
मकर्मसु ब्रह्मचर्योचितंवेषंवल्कदानीयरित्यज
णंमवोदितमार्गेणदेवान्पितृन्समर्चय ब्रह्मविद्यो
पदेशेनपवित्रेनकलेवरं गामागृहस्थाश्रमितान्।
उक्तंकर्मकल्पय उपवीतद्वयेदिव्यंवस्त्रालंकारेण
निच गृहाणपादुकाछत्रंगंधमाल्यानुलेपनं ततः
काषायवसनंकृष्णाजिनसमन्वितं यज्ञसूत्रंसे[illegible]ला
व

वदंडंभिक्षाकरंडकं आचारादजिनोभिक्षांसमर्प्यगु
रवेपिवे स्नातोपवीतयुगलंपरिधायांबरेशुभे गंधमा
ल्यधरस्तस्मीतिष्ठेदाचार्यसन्निधौ ततोगृहस्थाश्रमिणं
शिष्यमेतद्वदेद्गुरुः जितेंद्रियःसत्यवादीब्रह्मज्ञानपरो
भव स्वाध्यायाश्रमकर्माणियथाधर्मेणसाधय इत्या
दिश्यहितंजपध्यानसमुद्भवकृतापाने मायादिप्राणवांते
न भूर्भुवःस्वस्त्र्येणच हारयित्वाद्वियाचार्यःस्विष्टकृद्धो
ममाचरेत् दत्वापूर्णाहुतिंभद्रेव्रतकर्मसमापयेत्
जीवसेकादिसंस्कारोव्रतांताःपित्रतोनव उद्वाहःपित्र
तोवापिस्वतोपिसिध्यतिप्रिये विवाहाह्निकृतस्नानः
कृतनित्यक्रियःकृती पंचदेवान्समभ्यर्च्यगौर्यादिमातॄ
कास्तथा वसोर्धारांकल्पयित्वावृद्धिश्राद्धंसमाचरेत्
रात्रौप्रतिश्रुतंपात्रंगीतवाद्यपुरःसरं छायामंडपमा
नीयउपवेश्यवराननेवासवाभिमुखंवेदातापश्चिमा
भिमुखोविशेत् आचम्यस्वस्तिवृद्धिंचकथयेद्ब्राह्म
णैःसह साधुप्रश्नंवरंपृच्छेदर्चनायअस्मेवच वास्य
ध्यानंरत्नीतापाद्यार्घैर्वरमर्चयेत् समर्पयामिवाक्ये
नदेयद्रव्यंसमर्पयेत् पादयोरर्पयेत्पाद्यंशिरस्य
र्घ्यंनिवेदयेत् आचामंवदनेदद्याद्गंधमाल्यस्रजा
सभौ दिव्याभरणरत्नानियत्नस्तंत्रसमर्पयेत् तत

मं. नि. त्वभाजनेकांस्येकृत्वादधिघृतंमधु समर्पयामिवाक्ये
तं. नमधुपर्कंकरेर्पयेत् वरोपिपात्रमादायवामेपाणौनि
६. धायच दक्षांगुष्ठानामिकाभ्यांप्राणाहुत्युक्तमंत्रकः
60 पंचधाघ्रायतत्पात्रमुदीच्यांदिशिधारयेत् मधुप
र्कंसमर्प्यैवंपुनराचामयेद्वरं हर्वान्तताभ्यांजामात
विष्टरजानुदक्षिणे स्थित्वाविस्तृतस्मदितिमासप
क्षतिथौसतः समुल्लिख्यनिमित्तानिवृणुयाद्वरसु
तंमे गोत्रप्रवरनामानिप्रत्येकंप्रपितामहात् प्र
भृतानिसमुच्चार्यवरस्यजनकावधि द्वितीयांतव
रंब्रूयाद्गोत्रप्रवरनामभिः तथैवकन्यामुल्लिख्य
ब्रह्मोद्वाहेनपंडितः दातंभवंतमित्यस्याविवाह
कर्मकुर्वंति वरोब्रूयाद्यथाज्ञानंकरवाणितदुत्त
रं वरोस्मीतिवरोब्रूयात्ततोदातावदेद्वरं यथावि
हितमित्यस्याहृणीयमितिकीर्तयेत् ततःकन्यांस
मानीयवस्त्रालंकारभूषितां वस्त्रांतरेणसंछाद्यस्था
पयेद्वरसंमुखे पुनर्वरंसमभ्यर्च्यवासोलंकरणा
दिभिः वरस्यदक्षिणेपाणौकन्यापाणिंनियोजये
त् तन्मध्येपंचरत्नानिफलंताम्बूलमेववा दत्वा
वेष्टितांतनयांवरायविज्ञोर्पयेत् प्राग्वत्त्रिपुरु
षाख्यानेननिमित्ताख्यानमेवच आत्मनःकाम।

सुहृद्दिशपचतस्थंतंवरंवदेत् कन्याभिधांद्वितीयां
नामर्चितांसमलंकृतां साच्छादनांप्रजापा-
तिदेवताकामुदीरयन् तुभ्यमहमितिप्रो-
च्यदद्यात्संप्रदद्देवदन् वरःस्वस्तीतिस्त्रीकुर्यां
त्संप्रदातावरंवदेत् धर्मेचार्थेचकामेचभव
ताभार्ययासह वर्तितव्यंवरोवाढमस्त्वाका
मस्त्वितिपठेत् दाताकामोगृहीतापिकामाया
दाचकामिनी कामेनत्वांप्रगृह्णामिकामःपूर्णो
स्तुचावयोः ततोवदेत्संप्रदाताकन्यांजामात
रंप्रति प्रजापतिप्रसादेनयुवयोरभिवांछि
ते पूर्णमस्तुशिवंचास्तुधर्मंपालयतंयुवाम्
ततश्चाच्छाद्यवस्त्रेणसंप्रदातासुमंगलैः पर
स्परस्यभालोकंकारयेद्वरकन्ययोः ततोहि
रण्यरत्नानियथाशक्त्यनुसारतः जामात्रेद-
क्षिणांदद्याद्छिद्रमवधारयेत् वरस्तुभार्य
यासार्द्धंनक्तंरात्रौदिवसेपिवा ऊर्ध्वघाडिकोक्तवि
धिनावह्निस्थापनमाचरेत् योजकाख्यःपावको
त्रप्राजापत्यश्चऋषिःस्मृतः धारांतकर्मसंपाद्य।
दद्यात्पंचाहुतीर्वरः शिवंदुर्गांतथाविघ्नं ब्र
ह्माणंवज्रधारिणं ध्यात्वैकैकंसमुद्दिश्यजु।

मं·नि· कुर्यात्संस्कृतेनले भार्य्यायाः पाणियुगलंगृ
तं· ह्णीयादित्युदीरयन् पाणिंगृह्णामिसुभगे
६८ गुरुदेवरतामव गार्हस्थ्यकर्मधर्मेणया।
61 थावदनुशीलय इत्येतेनस्वामिदत्तेनला
जैश्चीज्ञाख्यैः शिवे प्रजापतिंसमुद्दिश्य
दद्याद्देवाहुतीर्वधूः प्रदक्षिणीकृत्यवह्नि
मुत्थायभार्य्ययासह दुर्गांशिवंरमांविष्णु
ब्राह्मींब्रह्माणमेवच युग्मंयुग्मंसमुद्दिश।
प्रपत्रिंशिंयाहवनेचरेत् अथमंडलिका
समारोहंकुर्य्यादमंत्रकं निशायांचतदा।
स्त्रीभिः पश्येद्ध्रुवमरुन्धतीम् अत्राहत्या
सनेसम्यगुपविश्यवरस्तदा स्विष्टिकृद्धो
शि^ मतः एवं तेनसमापयेत् ब्राह्मोविवाहो
विहितोदोषहीनः सवर्णया कुलधर्मानु
सारेणगोत्रभिन्नासपिंडया ब्राह्मोद्वाहे।
नयाग्राह्या सैवपत्नीगृहेश्वरी तदनु।
तांविनाब्रह्मविवाहंनाचरेत्पुनः तस्या
अपत्येतद्वंशेविद्यमानेकुलेश्वरि पौ।
त्रोऽथवा नापत्यानिदायार्हाणिभवन्ति
नः शैवातदन्वयाश्चैवलभेरन्धनम्।

जिनः यथाविभवमाच्छाद्यग्रासंवपरमेश्वरि
शैवोविवाहोहिविधः कुलचक्रेविधीयते
चक्रस्थनियमेनैकोद्वितीयोजीवनावधिः
चक्रानुष्ठानसमयेस्वगणैः शक्तिसाधकैः
परस्परेच्छयोद्वाहंकुर्याद्वीरः समाहितः
भैरवीवीरहृंदेषस्वाभिप्रायंनिवेदयेत् श्रा
वयेः शांभवोद्वाहेभवद्भिरनुमन्यताम् ते
षामनुज्ञामादायजप्त्वासमाहारमनुं अष्टोत्तर
शताहुत्यापूर्णमेतत्कालिकोपरि ततोवदेत्ता
मरंणीकौलानांसन्निधौशिव अकैतवेनचित्ते
नपतिभावेनमांगृहाण गंयघ्व्याहृतैर्हुत्वासा
कौलाद्दयितात्ततः स्वग्रहयानादेवेशिकैरा
दध्यात्करोपरि ततोभिषिंचेच्चक्रेशोमंत्रेणानेन
दम्पती तदाचक्रस्थिताः कौलाब्रूयुः स्वस्ती
तिसादरम् राजराजेश्वरीकालीतारिणीभु
वनेश्वरी वगलाकमलानित्याश्चवीरहत्तभैर
वी अभिषिंचेद्वादशायामभ्युनावार्घ्यपाथसा
ततस्तौप्रणतौविद्वान्श्रावयेद्वाग्भवंरमाम्

यद्यदंगीकृतं तत्र नाभ्यां शास्त्रप्रयत्नतः । शां
भवोक्तविधानेन कुलीनाभ्यां कुलेश्वरि । वा
ह्योवर्णविचारोत्र शैवोद्वाहे न विद्यते । असपिं
डां भर्तृहीनां सुद्वहेच्छैववासनात् । परिणीता
शैवधर्मे चक्रनिर्धारणेन या । अपत्यार्थी स्वतंत्र
स्त्रीवर्जतीतिं तां न त्यजेत् । शैवभार्योद्भवापत्य
मनुलोमेन मातृवत् । एषां संस्कारजातीनां सर्वत्र
पितृकर्मसु । भोज्यप्रदानं कौलानां भोजनं ।
विहितं भवेत् । नृणां स्वभावजं देवि प्रियं भो
जनमैथुनं । संक्षेपाय हितार्थाय शैवधर्मे ।
निरूपितम् । अत एव महेशानि शैवध
र्मनिषेवणात् । धर्मार्थकाममोक्षाणां प्रा
प्तिर्भवति नान्यथा । इति श्रीमहानिर्वाण
तंत्रे सर्वतंत्रोत्तमोत्तमे सर्वधर्मनिर्णय
सारे श्रीमदाद्यासदाशिवसंवादे कुशं
डिकादशविधासंस्कारविधिर्नाम न
वमोल्लासः ९ ॥ ९

ॐ श्रीदेव्युवाच कुष्माण्डिकाविधिर्नोघस्तं
स्काराश्चदशश्रुताः वृद्धिश्राद्धविधिंदेवक्लृ
पयामेप्रकाशय कस्मिन्कस्मिंश्चसंस्का
रेप्रतिष्ठासुचकास्वपि कुष्माण्डिकाविधा
नेचवृद्धिश्राद्धंचशंकर कर्त्तव्यंवानकर्त्त
व्यंतत्समाचक्ष्वतत्वतः मत्प्रीतयेमहेशा
नजीवानांमंगलायच श्रीसदाशिवउवाच
जीवसेकाद्विवाहान्तदशसंस्कारकर्मसु।
यत्रयद्विहितंभद्रेसविशेषंप्रकीर्त्तितं तदे
वकार्य्यमनुजैस्तत्वज्ञैर्हितमिच्छुभिः अ
न्यत्रयद्विधातव्यंतत्शृणुष्ववरानने वा
पीकूपतडागानांदेवप्रतिकृतेस्तथा गृहा
रामव्रतादीनांप्रतिष्ठाकर्मसुप्रिये सर्वत्रा
पंचदेवानांमातृणांमपिपूजनं वसोर्धारा
चकर्त्तव्याहवृद्धिश्राद्धकु^ण्डिके स्त्रीणांविधे ष्मा^
यकृत्येषुवृद्धिश्राद्धंनविद्यते देवतापितृ

मं.

६३

63

त्स्मार्घ्यभोज्यमेकं समन्तत्सृजेत् देवताश्चार्चितं
तत्रैव सृष्ट्या राकुशं डिका भक्त्या स्त्रिया विधातव्या
ज्यट्विजा कमलानने श्रुत्रश्रद्धैये ज्ञोदो हिशोत्तात ।
यो भगिनीसुतः जामातर्विग् देवपित्रेशाखाः
प्रतिनिधेयो शिवे वृद्धिश्राद्धं प्रवक्ष्यामि तत्वतः स्व
एककालिके कृत्वा नित्योदितं कर्म मानवः स्व ।
समाहितः गंगायज्ञेष्वं विलेवा स्त्रीशं भूप ।
तिं भजेत् ततो दर्भमयान् विप्रान् कल्पयेत् प्र
णवं स्मरन् पंचाभिर्नवभिर्वापि सप्तभिस्त्रिभिरे
व वा तिर्गर्भैश्च कुशैः सार्धैर्दक्षिणावर्तयोग
तः सार्द्धं ह्यावर्तनेन ऊर्ध्वाग्रैश्चर्चयेद्द्विजान् ।
वृद्धिश्राद्धे पार्वणादौ षड् विप्राः परिकीर्तिताः
एकोद्दिष्टे तु कथितः एक एव द्विजः शिवे ततो
विप्रान् कुशमयानेकस्मिन्नेव भाजने कौबेरा
भिमुखान् कृत्वा स्थापयेत् मन्त्रतः सुधीः ह्रीं श
न्नो देवीरभीष्टये शन्नो भवन्तु पीतये शंयोरभि
स्रवंतु नः ततस्तु गंधपुष्पाभ्यां पूजयेत् कुशा ।
न् स्त्रगान् पश्चिमे दक्षिणे चैव पूर्वमग्रमक

मातृस्तथोः षट्पात्राणि सदर्भाणि स्थापयेत्तुल
सीतिलैः पात्रद्वयं पश्चिमायां याम्ये पात्रचतुष्टयं
पूर्वस्मान्नरस्त्वावान् षड्विप्रानुपवेशयेत् देवप
क्षे पश्चिमायां [illegible] दक्षिणे वामयाम्ययोः पितृमाताम
हस्यापि पक्षौ द्वौ विद्धि पार्वति नांदीमुखाश्च पितरो
नांदीमुख्यश्च मातरः मातामहादयोप्येवं माताम
ह्यादयोपि च श्राद्धे नान्दाभ्युदयिके समुल्लेख्या वा
नते दक्षावर्तेनोत्तरास्यो देवं कर्म समाचरेत् वामा
वर्तेन दक्षास्यः पितृकर्माणि साधयेत् सर्वकर्म प्र
कुर्वीत देवादिक्रमतः शिवे लंघ्य[illegible] मातृसु
श्राद्धं तद्धि फलं भवेत् कौवेराभिमुखो नत्वा वाक्यं
दैवे प्रकल्पयेत् याम्यास्यः कल्पयेद्वाक्यं पित्रे माता
महे पि च तत्रादौ देवपक्षे तु वाक्यं शृणु शुचिस्मि
ते कालादीनि निमित्तानि समुल्लिख्य ततः परं त
त्तत्कर्माभ्युदयार्थमुक्त्वा साधकसत्तमः पित्रादी
नां त्रयाणां तु मात्रादीनां तथैव च मातामहानां च मा
तामह्यादीनामपि प्रिये षष्ठ्यन्तं कीर्तयेन्नामगोत्रो
च्चारणपूर्वकं विश्वेषां चैव देवानां श्राद्धं पदमुदीर
येत् कुशनिर्मितयोः पश्चात् विप्रयोरर्हमित्यपि
करिष्ये परमेशानीत्युक्त्वा वाक्यमीरितं विश्वा

न्देवान्परिपूज्य पितृपक्षे तु पार्वति तथामा
तामहस्यापि पक्षेऽन्नजाद्यकीर्त्तिता ततो जपे।
द्ब्रह्मविद्यां गायत्रीं दशधा शिवे देवताभ्यः पितृ
भ्यश्च महायोगिभ्य एव च नमोस्तु स्वधायै स्वाहायै
नित्यमेव भवन्त्विति पठित्वैनं त्रिधा हस्ते जलमा
दाय सनमः वं हूं फडिति मंत्रेण श्राद्धद्रव्याणि।
शोधयेत् आग्नेय्यां पात्रमेकं तु संस्थाप्य कुलना
यिके रक्षोघ्नमस्त्रे प्रोच्य यत्नाद्रक्षां कुरुष्वेम रक्षु
का भाजने तस्मिंस्तुलसीदलसंयुते निधाय सलि
ले देविदेवादिक्रमतः सुधीः विप्रेभ्यो जलगण्डू
षं दद्याद्दद्यात्कुशासनं ततश्चावाहयेद्विद्वान्वि
श्वान्देवान्पितॄंस्तथा मातॄन्मातामहांश्चापि।
तथा मातामहीः शिवे आवाह्य पूजयेदादौ विश्वा
न्ततो यजेत् पितृत्रयं तथा मातृत्रयं मातामह
त्रयं मातामहीत्रयं चापि पाद्यार्घ्याचमनादिभिः
धूपैर्दीपैश्च वासोभिः पूजयित्वा वरानने पात्राणां
पातनमग्रे कुर्याद्देवक्रमात् शिवे मण्डलं च वा।
येदेकं माययाचतुरस्रकं द्वे द्वे च मण्डले कुर्या
त्ततस्तत्पक्षद्वयोरपि वारुणप्रोक्षितेषु पात्रा
णि साध्यसाधकः तेन क्षालितपात्रेषु सर्वोपक

र्योः सह पानार्घ्यपाद्यमान्नानि क्रमेण परिवेशयेत्
ततो मधु घृतान् दत्वा ह्रां ह्रूं फडिति मंत्रकैः संप्रोक्ष्य
न्नानि सर्वाणि विश्वान् देवांस्तथा पितॄन् मातॄर्माता
महान् मातामहीः फलिव्यततत्ववित् निवेद्य देवीगा
यत्रीदेवताभ्यस्त्रिधा पठेत् शेषान्न पिण्डयोः प्रश्नःकु
र्यादापयेत्ततः परं दत्तशेषैरन्नाद्यैर्मीलनफलसन्नि
भात् द्विजान्तप्राप्तोन्तरः पिण्डान् रचयेद्द्वादशापि ।
ये अन्यं न कल्पयेदेकं पिण्डं तत्समममन्त्रिके श्रा
स्तरैर्नैर्टे ते दर्भान् मण्डले यवसंयुतान् ये मे कु
लुप्तपिण्डाः पुत्रदारविवर्जिताः अग्निदग्धाश्च ये के
पि व्यालव्याघ्रहताश्च ये ये बान्धवा बान्धवा ये न्यज । ये
न्मनि बान्धवाः मद्दत्तपिण्डतोयाभ्यां ते यान्तु तृप्तिमा ।
नयां दत्वा पिण्डमपिण्डेभ्यो मंत्राभ्यां स्वरवंदिते प्र
क्षाल्य हस्तावाचान्तः सावित्रीं प्रजपेत्ततः देवताभ्य
स्त्रिधा जप्त्वा मण्डलानि प्रकल्पयेत् उच्छिष्टपात्रपु
रतः पूर्वोक्तविधिना बुधः द्वे द्वे च मण्डले देवि रचये
त् पितॄन् क्रमात् पूर्वमंत्रेण संप्रोक्ष्य कुशांस्तेषां स्त
रेत् कृती अभ्युक्ष्य वायुना दर्भान् पितृदर्भं क्रमात् शि
वे मूले मूले च मध्ये च त्रीं स्त्रीन् पिण्डान्निवेदयेत् ।
श्रामंत्रेण प्रत्येकं नामोच्चार्य महेश्वरि स्वधया वि

म॰ नि॰
ते
६५
65

तेरेतत्पिण्डं यवमाध्वीकसंयुतं पिण्डांते पिण्डशे
षं च विकीर्य लेपभाजिनः प्रीणयेत्करलेपेन तै
कोद्दिष्टे ह्ययं विधि देवतापितृतृप्त्यर्थं गा विप्रो द।
शगाथा जपेत् देवताभ्यस्त्रिधा जप्त्वा पिण्डान्संपूज
येत्ततः प्रज्वाल्य धूपं दीपं च निमील्य नयने हृदये।
दिव्यदेहधरान्पितॄन्ध्यातः कव्यमधरे विभाव्य
प्रणमेद्धीमानिमं मंत्रमुदीरयेत् पिता मे परमो ध
र्मः पिता मे परमं तपः स्वर्गः पिता मे तत्तुष्टौ तुष्टम
स्त्यखिलं जगत् ततो निर्माल्यमादाय प्रार्थयेदा।
शिषः पितॄन् आशिषो मे प्रदीयन्तां पितरः करुणा
मयाः वेदाः संततयो नित्यं वर्द्धतां बांधवा मम दा
तारो मे विवर्द्धतां बहुत्वं यान्ति संतु मे याचितारः स
दा संतु मा च याचामि कंचन देवादितो द्विजान्पि
तॄन्विसृजेत्तदनंतरं तथैव दक्षिणां कुर्यात्पदे
षु त्रिषु तत्ववित् गायत्रीं दशधा जप्त्वा देवताभ्योपि
पंचधा हुत्वा वह्नौ विविधमिदं पृच्छेत्कृतांजलिः
इदं श्राद्धमसन्नस्वार्थ्यं सांगं जातमुदीरयेत् द्विजो वदे
त्सम्यगेव सांगं जातं विधानतः अंगवैगुण्यशांत्य
र्थं प्रणवं दशधा जपेत् अच्छिद्राभिविधानेन कुर्या
त्कर्मसमापनं पात्रे पात्राणि पिण्डांश्च ब्राह्मणा।

हृ॰

यतिवेदयेत् विप्राभावे गवाजेऽप्सु सलिले वा विनि
क्षिपेत् वृद्धिश्राद्धमिदं प्रोक्तं नित्यसंस्कारकर्मणि ।
श्राद्धे पार्वणिकर्त्तव्ये पार्वणत्वेन कीर्त्तयेत् देवतादि ।
प्रतिष्ठास्तु तीर्थयात्राप्रवेशयोः पार्वणेन विधानेन
श्राद्धमेतदुदीरयेत् नैतेषु श्राद्धकृत्येषु पितृन्नांदी ।
मुखान्वदेत् नमोस्तु पुष्टादित्यत्र स्वधायै पदमुच्च
रेत् पित्रादित्रयमध्ये तु यो जीवति वरानने तस्योर्ध्वतन
मुल्लिख्य श्राद्धं कुर्याद्विचक्षणः जनकादिषु जीवत् ।
त्रिषु श्राद्धं विवर्जयेत् तेषु प्रीतेषु देवेशि श्राद्धय
ज्ञफलं लभेत् जीवत्पितृविकल्पानि नान्यश्राद्धा ।
धिकारिता मातुः श्राद्धं विना पत्यास्तथा नांदीमुखं वि
ना एकोद्दिष्टं तु कोलेशि विश्वेदेवान्न पूजयेत् एक
मेवमुद्दिश्य पात्रं वावाकं प्रकल्पयेत् दक्षिणाभि ।
मुखो दद्यादन्नं पिण्डं च मानवः यवस्थाने तिला देयाः
सर्वमन्यत्तु पूर्ववत् प्रेतश्राद्धे विशेषोऽयं गंधायद्वौ विव
र्जयेत् स्वतं समुल्लिखेत् प्रेतं वाक्ये दाने च पिण्डयोः
एकमुद्दिश्य यत् श्राद्धमेकोद्दिष्टं तदुच्यते प्रेतस्यान्नं
च पिण्डं च मतस्यं मासं नियोजयेत् अशौचान्तं द्विती
येह्नि श्राद्धं यत् कुरुते नरः प्रेतश्राद्धं विजानीहि तदेव
कुलनायिके गर्भस्रावाजातमृतादन्यत्र मृतजात

योः कुलाचारानुसारेण मानवोऽशौचमाचरेत् द्विजा
तीनां दशाहेन द्वादहेन पञ्चतः षड्मासायोर्द्विमा
सेनाशौचकल्पना असपिण्डमृते ज्ञातौ त्रिरात्राशौच
मिष्यते मृ एवतो पितराशौचे सपिण्डस्य मृते निशिवे
अशुचिर्नाधिकारी स्यात् दैवे पैत्र्ये च कर्मणि मृते कु
लार्णवाद्दाहयेत् तथा प्रारब्धकर्मणः पंचवर्षाधिकान्
मर्त्यान्दाहयेत् पितृकानने भर्त्रा सह कुलेशानि
न दहेत् कुलकामिनी नवस्वरूपा रमणी जगत्या
छन्नविग्रहा मोहा भर्तृश्रिता रोहात्तु भवेन्नरकगामि
नी ब्रह्ममंत्रोपासकास्तु तेषामाज्ञानुसारतः प्रवाह
येद्वा तिरवनेद्वा हयेद्वापि कालिके श्मशाने क्षेत्रे च तीर्थे
वा देव्याः पार्श्वविशेषतः कुलीनानां समीपे वा मरणं
श्मशाने विके विभावयन् सत्यमेकं विस्मरन् जगतो त्र
यं परित्यजति यः प्राणान् स स्वरूपे प्रतिष्ठति प्रेतम्
मौ प्रावंनीत्वा स्नापयित्वा हूतो द्विते उत्तराभिमुखं कृ
त्वा शाययेच्चितोपरि संबोधनान्तं तन्नाम प्रेताख्यान्त
मनुस्मरन् दत्वा पिण्डं प्रेतमुखे दहेद्वह्निमन्त्रं स्मरन् ॥
पिण्डं तत्र चयेत्तत्र सिद्धान्नैस्तण्डुलैश्च वा यवगोधूमचू
र्णैर्वा धात्रीफलसमं प्रिये स्थिते श्च प्रेतपुत्रे श्च ज्येष्ठेऽश्राद्धा
धिकारिता तदभावेन्यपुत्रादौ ज्येष्ठानुक्रमतो भवेत् ॥

अशौचांतात्तदिवसे कृतस्नानो नरः शुचिः मृतप्रेत
त्वमुक्त्यर्थमुत्सृजेत्तिलकांचनं गांभूमिं वस्त्रं तथा
नेपात्रं धातुविनिर्मितं भोज्यं बहुविधं दद्यात् प्रेतस्व
र्गायतत्सुतः गंधमाल्यफलं तोयं शय्यां प्रियकरी
तथा यद्यत्प्रेतप्रियं द्रव्यं तत्तत्स्वर्गायमुत्सृ
जेत् तत्सुतवृषभं चैकं त्रिशूलांकेन लांछितं स्व
र्णेनालंकृतं कृत्वा त्यजेत् ततस्स्वर्वामये प्रेतश्राद्धो
क्तविधिना श्राद्धं कृत्वातिभक्तितः ब्रह्मज्ञान् ब्राह्मणा
न्कौलान् तत्त्वार्थितानपि भोजयेत् दानेषु शक्तो मनु
जः कुर्वन् श्राद्धं स्वशक्तितः बुभुक्षितान् भोजयित्वा प्रे
तत्वं मोचयेत् पितुः श्राद्धैकोद्दिष्टमेतत्तु प्रेतत्वमुक्ति
कारणं वर्षे वर्षे मृततिथौ दद्यादन्नं गतासवे बहुभि
र्विधिभिः किं वा कर्मभिर्बहुभिश्च किं सर्वसिद्धिम
वाप्नोति मानवः कौलिकार्चनात् विना होमाज्जपा
त् श्राद्धात् संस्कारेषु च कर्मसु संपूर्णकार्यसिद्धिः
स्यादेकया कौलिकार्चया शुक्लां चतुर्थीमारभ्य शु
भकर्माणि कारयेत् असितां पंचमीं यावत् विधिरे
ष शिवोदितः अन्यत्रापि विरुद्धे हि शर्वर्त्विक कौलि
काज्ञया कर्माण्यपरिहार्याणि कर्मार्थी कर्तुमर्ह
ति गृहारंभः प्रवेशश्च यात्रा रत्नादिधारणं संकल्पा

म·नि·
तं
६७
67

यां पंचतत्वैः कुर्य्यादेतानि कौलिकः संक्षेपयात्रामथवा कुर्यात् साधकसत्तमः ध्यायन् देवीं जपन् मंत्रं नत्वा गच्छेद् यथामति। सर्वासु देवतार्चासु शारदाद्युत्सवादिषु तत्तत्कल्पोक्तविधिना ध्यानपूजां समाचरेत् यात्रापूजोक्तविधिना बलिहोमं प्रयोजयेत् कौलार्चनं दक्षिणां च कृत्वा कर्म समापयेत् गंगाविल्वशिवं सूर्यं ब्राह्मणं परिपूज्य च उद्दिश्य वार्चयेद् देवं सामान्यो विधिरीरितः कौलिकः परमो धर्मः कौलिकः परदेवता कौलिकः परमं तीर्थं तस्मात् कौलं सदार्चयेत् सार्द्ध त्रिकोटितीर्थानि ब्रह्माद्याः सर्वदेवताः वसंति कौलिके देहे किन्न स्यात् कौलिकार्चनात् पूर्णाभिषिक्तः सत्कौलो यस्मिन् देशे विराजते धन्यो मान्यः पुण्यतमः स देशः प्रार्थ्यते सुरैः कृतपूर्णाभिषेकस्य साधकस्य शिवात्मनः पुण्यपापविहीनस्य प्रभावं वेत्ति को भुवि केवलं नररूपेण तारयन्नखिलं जगत् शिक्षयन् लोकयात्रां च कौलो विहरति क्षितौ देव्युवाच॥ पूर्णाभिषिक्त। कौलस्य महात्म्यं कथितं प्रभो विधानमभिषेकस्य कृपया श्रावयस्व मां सदाशिव उवाच॥ विधानमेतत् परमं गुप्तमासीद् युगत्रये गुप्तभावेन कुर्वा।

त्मोनरामोत्तंसगुरुः श्रुता प्रबलेकलिकालेतुप्रका।
शेकुलवर्त्तिनः नक्तंवादिवसेऊर्ध्वातस्प्रकाशाभि
षेचनं नाभिषेकंविनाकौलःकेवलेमद्यसेवनात्
पूर्णाभिषेकात्कौलस्यात्चक्राधीशःकुलार्चकः
तत्राभिषेकपूर्वेह्निसर्वविघ्नोपशांतये यथाशक्त्यु
पचारेणविघ्नेशंपूजयेद्गुरुः गुरुर्नाधिकारीस्यात् १
शुभपूर्णाभिषेचने तदाभिषिक्तकौलेनसंस्कारं
साधयेत्प्रिये स्वात्मार्णोविंदुसंयुक्तंवीजमस्यप्र
कीर्त्तितं गणकोस्यऋषिश्छंदोनिचृद्विघ्नेशदे २
वता कर्तव्यकर्मणोविघ्नशांत्यर्थेविनियोगिता
षड्दीर्घमन्त्रकमूलेनषडंगानिसमाचरेत् प्राणा
यामंततः कृत्वाध्यायेद्गणपतिंशिवे सिंदूराभंत्रि
नेत्रंपृथुतरजठरंहस्तपद्मैर्दधानं शंखंपाशांकुशे
ष्टान्युरुकरविलसद्वारुणीपूर्णकुंभम् बालेंदुदी
प्तमौलिंकरिपतिवदनंबीजपूरार्द्रगंडं भोगींद्रा
बद्धभूषंभजतगणपतिंरक्तवस्त्रांगरागं ध्यात्वैवं
मानसैरिष्टापीठशक्तीः प्रपूजयेत् तीव्राचज्वालि
नीनंदाभोगदाकामरूपिणी उग्रातेजस्वतीसत्या।
मध्येविघ्नविनाशिनी पूर्वादितोर्चयित्वैताः पूजये
त्कमलासनं पुनर्ध्यात्वागणेशानंपंचतत्वोप।

म॰ति॰ चारकैः अभ्यर्च्य तत्र तद्दिक्षु गणेशं गणनायकं
तं गणनाथं गणक्रीडं यजेत् कौलिकसत्तमः एक
६८ दंतं रक्ततुण्डं लंबोदरं गजाननौ महोदरं च विक
68 टं धूम्राक्षं विघ्ननाशनं ततो ब्राह्मीमुखाः शक्तीर्दि
क्पालांश्च प्रपूजयेत् तेषां मन्त्राणि संपूज्य विघ्न
राजं विसर्जयेत् एवं संपूज्य विघ्नेशमधिवासन
माचरेत् भोजयेद्व्रपंचतत्त्वैर्ब्रह्मज्ञानकुलसाध
कान् ततः परदिने स्नातः कृतनित्योदितक्रियः
आजन्मकृतपापानां नाशार्थं तिलकांचनं उत्
सृजेत् कौलतत्त्वार्थं भोजयेच्चैकमपि प्रिये अर्घ्यं
दत्वा दिनेशाय ब्रह्मविष्णुशिवग्रहान् अर्चयि
त्वा मातृगणान् वसुधारां प्रकल्पयेत् कर्मणो
भ्युदयार्थाय वृद्धिश्राद्धं समाचरेत् ततो गत्वा गुरोः
पार्श्वं प्रणम्य प्रार्थयेदिदं त्राहि नाथ कुलाचाररत
लिनी कुलवल्लभ त्वत्पादांभोरुहच्छायां देहि मू
र्ध्नि कृपानिधे आज्ञां देहि महाभाग अभिषेचनमि
षेचनं निर्विघ्नकर्मणः सिद्धमुपैमि त्वत्प्रसादतः
शिवशक्त्याज्ञया वत्स कुरु पूर्णाभिषेचनं मनोर
थमयी सिद्धिर्जायतां शिवशासनात् इत्याज्ञां
गुरोः प्राप्य सर्वोपद्रवशांतये आगुर्लक्ष्मीबलारो

गणपावाग्रे संकल्पमाचरेत् ततस्तु कृतसंकल्पो वस्त्रा
लंकारभूषणैः कारणैः शुद्धिसहितैरभ्यर्च्य गृहएव यागगृ
हे गुरुर्मनोहरे गेहे गैरिकादिभिश्चित्रिते चित्रध्वजपता
काभिः फलपल्लवशोभिते किंकिणीजालमालाभि
श्चंद्रातपविभूषिते घृतप्रदीपावलिभिस्तमोलेशा
विवर्जिते कर्पूरसहितैर्धूपैर्यत्नधूमैः सुवासिते।
व्यजनैश्चामरैश्छत्रैर्दर्पणाद्यैरलंकृते सार्द्धहस्तमि
तां वेदीमष्टवक्रैश्चतुरंगुलां रचयेन्मृण्मयीं तत्र चू
र्णैरत्नसंभवैः पीतरक्तासितश्वेतश्यामलैः सुमनो
हरं मण्डलं सर्वतोभद्रं विदध्यात् श्रीगुरुस्ततः स्व
स्वकल्पोक्तविधिना मानसार्चाविधिक्रियाम् कृत्वा
पूर्वोक्तमंत्रेण पंचतत्त्वानि शोधयेत् संशोध्य पंचत
त्त्वानि गुरुः कल्पितमण्डले स्वार्णं वा राजतं ताम्रं मृण्म
यं घटमेव वा क्षालितं चास्त्रबीजेन दध्यक्षतविचर्चि
तं स्थापयेद्धृल्लबीजेन सिंदूरेणांकयेत् श्रिया त्वका
राद्यैरकारांतैर्वर्णैर्बिन्दुविभूषितैः मूलमंत्रत्रिजापे
न पूरयेत् कारणेन तं अथवा तीर्थतोयेन शुद्धेन पाथसा
पि वा नवरत्नं सुवर्णं वा घटमध्ये विनिक्षिपेत् पन
सोदुंबराश्वत्थवकुलाम्रसमुद्भवं पल्लवं सन्न्यसेद्
याद्वाग्भवेन कृपानिधिः शरावं मार्त्तिकं वापि फला

म·ति·
ते
६५
69

क्षतसमन्वितं रमांमायांसमुच्चार्यस्थापयेत्पल्ल
वोपरि बध्नीयाद्वस्त्रयुग्मेनग्रीवांतस्यवरानने शा
क्तैरक्तंशिवेविलोम्येनतवासम्प्रकीर्तितं स्थाप्यैमा
यांरमांस्मृत्वास्थिरीकृत्यघटंततः निक्षिप्यपंचरत
त्नानिनवपात्राणिविन्यसेत् राजतंशक्तिपात्रंस्यात्
गुरुपात्रंहिरण्मयं श्रीपात्रंतुमहाशंखंतताम्राण्य
न्यानिकल्पयेत् पाषाणदारुलोहानांपात्राणिप
रिवर्जयेत् शक्त्याप्रकल्पयेत्पात्रंमहादेव्याःप्रपू
जने पात्राणांस्थापनंकृत्वागुरुंदेवींप्रतर्पयेत्
ततस्तुस्तत्संपूर्णघटमभ्यर्चयेत्सुधीः दर्शयित्वा
धूपदीपौसर्वभूतबलिंहरेत् पीठदेवान्प्रपूजयि
त्वाषडंगन्यासमाचरेत् प्राणायामंततःकृत्वाध्या
त्वावात्ममहेश्वरीम् स्वशक्त्याप्रपूजयेद्दिष्टांवित्तशा
ठ्यंविवर्जयेत् होमान्तंकृत्वानिष्पाद्यकुमारीशक्ति
साधकान् पुष्पचंदनवासोभिरर्चयेत्सद्गुरुःशि
वे श्रनुग्रहकृन्तकौलानेशिष्यंप्रतिकुलव्रताः पू
र्णाभिषेकसंस्कारेभवन्त्विरनुमन्यतां एवंपृच्छतिच
केषांतंबूयुर्गुरुमादरात् महामायाप्रसादेनप्रभा
वात्परमात्मनः शिष्योभवतुपूर्णस्तेपरतत्त्वपरा
यणः शिष्याणचगुरुर्देवीमर्चयित्वाविनिवेदये ॥

कामंमायांरमांजप्त्वाचालयेद्विमलंघटं उत्तिष्ठब्रा-
ह्मकलशदेवतात्मकसिद्धिद त्वत्तोयपल्लवैःसिक्ताः
शिष्योब्रह्मरतोस्तुमे इत्थंसंचाल्यकलशमन्त्राभिस्
त्रिगुरुः मंत्रैरेतैर्वक्ष्यमाणैरभिषिंचेत्कृपान्वितः
शुभपूर्णाभिषेकस्यसदाशिवऋषिः स्मृतः छंदो
नुष्टुप्देवताद्याप्रणवंबीजमीरितं शुभपूर्णाभिषे-
कार्थेविनियोगःप्रकीर्तितः गुरवस्त्वाभिषिंचंतुब्र
ह्मविष्णुमहेश्वराः दुर्गालक्ष्मीभवान्यस्त्वामभिषि
चंतुमातरः षोडशीतारिणीनित्यास्वाहामहिषम
र्दिनी एतास्त्वामभिषिंचंतुमंत्रपूतेनवारिणा ज
यदुर्गाविशालाक्षीब्रह्माणीचसरस्वती एतास्त्वा
मभिषिंचंतुबगलावरदाशिवा नारसिंहीचवाराही
वैष्णवीवनमालिनी इंद्राणीवारुणीरौद्रीत्वाभिषिं
चंतुशक्तयः भैरवीभद्रकालीचतुष्टिःपुष्टिरुमा-
क्षमा श्रद्धाकान्तिर्दयाशांतिरभिषिंचंतुतेसदा महा
कालीमहालक्ष्मीर्महानीलसरस्वती उग्रचंडाप्र-
चंडात्वामभिषिंचंतुसर्वदा मत्स्यःकूर्मोवराहश्चनृ
सिंहोवामनस्तथा रामोभार्गवरामस्त्वामभिषिंचं-
तुवारिणा असितांगोरुरुश्चंडःक्रोधोन्मत्तोभयंक
रः कपालीभीषणश्चत्वामभिषिंचंतुवारिणा का

मं. ति.
तं
८०
१०

लोकपालिनी कुल्लाकुरुकुल्लाविरोधिनी वि
प्रचित्तामहोग्रास्त्वामभिषिंचंतु सर्वदा इंद्रोऽग्निः
शमनो रक्षो वरुणः पवनस्तथा धनदश्च महेशा
नः सिंचंतु त्वां दिशीश्वराः रविः सोमो मंगलश्च
बुधो जीवः सितः शनिः राहुः केतुः सनक्षत्राश्च
भिषिंचंतु ते ग्रहाः नक्षत्रं करणं योगो वाराः पक्षो
दिनानि च ऋतुर्मासो हायनस्त्वामभिषिंचंतु स
र्वदा लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः
समुद्रास्त्वाभिषिंचंतु मंत्रपूतेन वारिणा गंगा
सूर्य सुता रेवा चंद्रभागा सरस्वती सरयूर्गण्डकी कुंती श्वे
तगंगा च कौशिकी एतास्त्वामभिषिंचंतु मंत्र
पूतेन वारिणा अनंताद्या महानागाः सुपर्णाद्याः प
तत्रिणः तरवः कल्पवृक्षाद्याः सिंचंतु त्वां महीधराः
पाताल भूतल व्योमचारिणः क्षेमकारिणः पू
र्णाभिषेकसंतुष्टास्त्वामभिषिंचंतु पाथसा दौर्भाग्यं
दुर्यशो रोगा दौर्मनस्यं तथा शुचः विनश्यंतु अभिषे
केण परब्रह्मतेजसा अलक्ष्मीः कालकर्णी च डा
किन्यो योगिनीगणाः विनश्यन्त्वभिषेकेण काली
बीजेन ताडिताः भूताः प्रेताः पिशाचाश्च ग्रहा ये वि
घ्नकारकाः विद्रुतास्ते विनश्यन्तु रमाबीजेन ताडि

ता: अभिचारकृता दोषा वैरिमंत्रोद्भवाश्च ये मनो
वाक्कायजा दोषा विनश्यन्त्वभिषेचनात् नश्यन्तु वि
पदः सर्वाः सम्पदः सन्तु सुस्थिराः अभिषेकेण पूर्णे
न पूर्णाः सन्तु मनोरथाः इत्येकाधिकविंशत्या मंत्रैः
संसिक्तः साधकं पश्चाद्धर्मलब्धमंत्रं ततः संश्रावये
द्गुरुः पूर्वोक्तमन्त्रान् संबोध्य ज्ञापयन् शक्तिसाधका।
न् दद्यादानंदनाथान्तमाख्यानं कौलिको गुरुः
कृतमंत्रो गुरोर्यंत्रे संपूज्य निजदेवताम् पंचतत्त्वो
पचारेण गुरुमभ्यर्च्य येन ततः गोभूहिरण्यवासांसि
पात्रालंकरणानि च गुरवे दक्षिणां दत्वा यजेत् ।
कौलान् शिवात्मकान् कृतकौलार्चनो धीरः शा
न्तो तिविनयान्वितः श्रीगुरोश्चरणौ स्पृष्ट्वा भक्त्यान
त्वेदमर्थयेत् श्रीनाथ जगतां नाथ मन्नाथ करुणा
निधे परामृतप्रदानेन पूरयास्मन्मनोरथं आज्ञां
मे दीयतां कौलाः प्रसन्नाः शिवरूपिणः सन्निधाय
विनीताय ददामि परमामृतं चक्रेशपरमेशान।
कौलपंकजभास्कर कृतार्थं कुरु सत्शिष्यं देह्य
मुष्मै कुलामृतं आज्ञामादाय कौलानां परमामृ
तपूरितं समुद्रिकं पानपात्रं शिष्यहस्ते समर्पये
त् कृपार्द्रेण गुरुर्देवीरूपसंलग्नमनसा स्वस्य

मे॰ ति॰ तं ७८ 71

शिष्यस्यकौलानांहृच्चैनतिलकंन्यसेत् ततःप्रा
सादतत्वानिकौलेभ्यःपरिवेशयेत् चक्रानुष्ठान
विधिनाविदध्यात् पानभोजनं इतितेकथितंदेवि
शुभपूर्णाभिषेचनं ब्रह्मज्ञानैकजननंशिवत्वफ
लसाधनं नवरात्रंसप्तरात्रंपंचरात्रंत्रिरात्रकं अथ
वाप्येकरात्रंचकुर्यात् पूर्णाभिषेचनं संस्कारेस्मि
न्कुलेशानिपंचकल्पाःप्रकीर्तिता नवरात्रेविधा
तव्यंसर्वतोभद्रमंडलं नवनाभंसप्तरात्रेपंचाब्जंपंच
रात्रके त्रिरात्रेचैकरात्रेचपद्ममष्टदलंप्रिये मण्ड
लेसर्वतोभद्रेनवनाभेपिसाधकैः स्थापनीयानव
घटाःपंचाब्जेपंचसंख्यकाः नलिनेष्टदलेदेविघ
टस्त्वेकःप्रकीर्तितः अंगावरणदेवांश्चकेसरादिषु
पूजयेत् पूर्णाभिषेकसिद्धानांकौलानांनिर्मला
त्मना दर्शनात्स्पर्शनाद्घ्राणात् द्रव्यशुद्धिर्विधी
यते शाक्तैर्वावैष्णवैःशैवैःसौरैर्गाणपतैरपि कौ
लधर्माश्रितःसाधुःपूजनीयोतियत्नतः शाक्ते
शाक्तोगुरुःशाक्तःशैवेशैवोगुरुस्मृतः वैष्णवेवैष्ण
वःसौरेसौरोगुरुरुदाहृतः गाणपेगाणपश्चैवकौ
लःसर्वत्रसद्गुरुः अतःसर्वात्मनाधीमान्कौलो
दीक्षांसमाचरेत् पंचतत्वेनयत्नेनभक्त्याकौ।

लान्यजंतिये उद्धृत्यपूरुषान्सर्वांल्लेयांतिपर।
मांगतिं पशोर्वक्त्राल्लब्धमंत्रः पशुरेवनसंशयः।
वीराल्लब्धमनुर्वीरः कौलाद्भवतिब्रह्मवित् शाक्ता
भिषेकीवीरःस्यात्पंचतत्वानिशोधयेत् सेवेष्टज्ञा न
विधावेवनतुचक्रेस्वैरोभवेत् वीरघातीह्यथापा
पीवीराणांस्त्रीगमस्तथा स्तेयीमहापातकिनस्त
तसंसर्गीचपंचमः कुलधर्मंकुलद्रव्यंकुलसाधक
मेवच येनिंदंतिदुरात्मानस्तेगच्छंत्यधमांगतिं
नस्यंतिरुद्रडाकिन्योनश्यंतिरुद्रभैरवाः मांसास्थि
चर्वणंनदाःहृष्टाःकौलद्विषांनराणां दयालवः।
सत्यशीलाःसदापरहितैषिणः तान्नगर्हयेतोनरा।
कानिष्कृतिंयांतिनकचित् अन्नप्रयोगावहवःक
र्माणिविविधानिच ब्रह्मकनिष्ठकौलस्यत्यागान्
ष्ठानयोःसमं एकमेवपरंब्रह्मजगदाव्याप्यतिष्ठति
विस्मार्यंयांतद्वचांस्यापयतःसर्वंतद्वितं फलासक्ताः हि
कामपराःकर्मजालरताप्रिये दृष्ट्वाक्रेनयजंतो।
पु पितनप्रयांतिविशंतिच सर्वंब्रह्मणिसर्वत्रब्रह्मैव।
परिपश्यति ज्ञेयःसएवसत्कौलोजीवन्मुक्तोन
संशयः इतिश्रीमहानिर्वाणतंत्रेसर्वतंत्रोत्तमोत्तमे
सर्वधर्मनिर्णयसारेश्रीमदाद्यासदाशिवसंवादे।

म· नि·
तं
८२
72

वृद्धिश्राद्धादिमृतक्रियापूर्णाभिषेककथनंनाम
दशमोल्लासः श्रीदेव्युवाच॥ वर्णाश्रमाचारध
र्माः संस्काराःलोकसिद्धये कथिताःकृपयामह्यं
सर्वज्ञेनत्वयाप्रभो कलौदुर्वृत्तयोलोकाःकाम
क्रोधान्धचेतसः नास्तिकाःसंशयात्मानःसदेंद्रि
यसुखैषिणः भवन्तिगदितेवर्त्मन्यनुष्ठास्यंतिदु
र्धियः तेषांकागतिरीशानविशेषाद्वक्तुमर्हसि
श्रीसदाशिवउवाच साधुपृष्टंत्वयादेविलोकानां
हितकारिणि त्वंजगज्जननीदुर्गाजन्मसंसारमोच
नी त्वमाद्याजगतांधात्रीपालयित्रीपरात्परा त्वयै
वधार्यतेदेवि विश्वमेतच्चराचरं त्वमेवपृथ्वीत्वंवा
रित्वंवायुस्त्वंहुताशनः त्वंवियत्त्वमहंकारस्त्वंमह
त्तत्वरूपिणी त्वमेवजीवोलोकेस्मिंस्त्वंविद्यापरदे
वता इंद्रियाणिमनोबुद्धिर्विश्वेषांत्वंगतिःस्थितिः
त्वमेववेदाःप्रणवःस्मृतयस्त्वंहिसंहिताः निगमा
गमतंत्राणिसर्वशास्त्रमयीशिवा महाकालीमहा
लक्ष्मीमहानीलसरस्वती महोदरीमहामायामहा
रौद्रीमहेश्वरी सर्वज्ञात्वंज्ञानमयीनास्त्यवेद्यंतवां
बिके तथापिपृच्छसिप्राज्ञेप्रीतयेकथयामिते।
सत्यमुक्तंत्वयादेविमनुजानांविचेष्टितं जानंतोपि

ह्रितंमत्वाःपापैरामुत्रसुखप्रदैः नाचरिष्यंतिसद्धर्म
हिताहितबहिष्कृताः तेषांतिश्रेयसार्थायकर्तव्यंयत्न
उच्यते अनुष्ठानंनिषिद्धस्यत्यागोविहितकर्मणः ॥
त्मणोजनयतः पापंक्लेशशोकामयप्रदं स्यातिष्टमा
न वर्जनात्परातिष्ठोपपादनात् तदेवपापंद्विविधंजाती
हिकुलनाथिके परातिष्टकरात्पापात्मुच्यतेराजशा
सनात् अन्यस्मान्मुच्यतेमर्त्यः प्रायश्चित्तात्समाधिता
प्रायश्चित्ताथवादंडैर्नपूतायेकृतांहसः नरकांस्तेनि
वर्तंतेइहामुत्रविगर्हिताः तत्रादौकथयाम्यायेन्द्रपशा
सननिर्णयं यत्नेचनात्महेशानिराज्ञायात्पथसंगतिं
भृत्यान्पुत्रान्दासीर्नान् प्रियानपितथाप्रियान् शा
सनेचतथान्यायेसमदृष्ट्यावलोकयेत् स्वयंचेत्कृत।
पापःस्यात्पीडयेद्दकृतांहसं उपवासैश्चदानैस्तात्प।
रितोष्पविशुध्यति वर्षांश्रमन्यमानंस्वंकृतपापोन
राधिपः त्यक्त्वाराज्यंवनंप्राप्यतपसात्मानमुद्धरेत् ॥
गुरुदंडैनैवराजाविदध्याल्लघुपापिषु नलघुंगुरु
पापेषुविनाहेतुविपर्यये तस्मिन्यत्सासतेशास्या
अनेकोन्मार्गवर्तिनः पापेभ्योनिर्भयेशास्तोलघुपा
पेगुरुर्दमः सकृत्कृतापराधेनसत्रपेवहुमातिति
पापाङ्गीरोप्रशान्तःस्यात्गुरुपापेलघुर्दमः स्वल्पा

मं॰नि॰ तं ७३ 73

पराधी कौलश्चेद्ब्राह्मणो लघु पापकृत् वर्द्धमानोपि
दण्डः स्याद्दयोभिरवतीम्स्ता। न्यायदण्डं प्रसादं च।
विचार्य्य सचिवैः सह योन कुर्य्यान्महीपालः स महा
पातकी भवेत् न त्यजेत्पितरौ पुत्रो न त्यजेद्गुरुं प्रजाः
न त्यजेत्स्वामिनं भार्य्या विनतानतिपापिनः राज्ये यतं
जीवनं च धार्म्मिकस्य महीपतेः संत्त्वहेतुः प्रजायते।
रन्यथा यान्त्यधोगतिं मातरं भगिनीं चापि तथा दुहि
तरं शिवे गंतारो ज्ञानतो ये च महागुरुनिपातकाः
कुलधर्मं समाश्रित्य पुनस्त्यक्तकुलक्रियाः विश्वास
घातिनो लोका अतिपातकिनः स्मृताः मातरं भगि
नीं कन्यां गच्छतो नियतं दमः तासामपि सकामानां
तदेव विहितं शिवे मातापितृस्वसृतलं स्नुषांश्व
श्रूं गुरुस्त्रियं पितामहस्य वनितां तथा मातामहस्य
च पितृभ्रातुः सुतां जायां भ्रातुः पत्नीं सुतामपि भा
गिनेयीः प्रभोः पत्नीं तनयां च कुमारिकां गच्छतो पा
पिनो लिंगच्छेदो दण्डो विधीयते गृहान्निर्य्यापनं चै
व पापादस्माद्धि मुक्तये सपिण्डदारतनयाः स्त्रियं वि
श्वासितामपि सर्वस्वहरणं केशपवनं गच्छतो दमः
स्त्रीभिरेताभिरज्ञानाद्भवेत्पापि [illegible] यो यदि ब्राह्मणो वा
पिप्रो वेन ज्ञात्वा तास्तत्क्षणं त्यजेत् सवर्णदारान्वा।

योगच्छेदनुलोमपरस्त्रियं दमस्तस्यधनादानंमासैकं
कणभोजनम् राजन्प्रवेश्यम्लेच्छाणांमामात्यांतांवरा
नंते ब्राह्मणींगच्छतोज्ञातालिंगच्छेदोदमःस्मृतः
ब्राह्मणींविकृतांकृत्वादेशान्निर्यापयेन्नृपः वीरस्त्री
गामिनंतांतामेवमेवदमोविधिः कुर्वतामायस्तुरमेत
प्रतिलोमपरस्त्रिया दाडस्तस्यधनादानंत्रिमासंकण
भोजनं सकामायाःस्त्रियश्चापिदाडस्तद्वद्द्वितीय
ते बलात्कारगताभार्य्यात्याज्यापाल्याभवेत्शिवे ॥
ब्राह्मीभार्य्याप्यवाशैवीकामतोवाप्यकामतः सर्व
थाहिपरित्याज्यास्याच्चेत्परगतासकृत् गच्छतोवा
रनारीश्चगवादिपशुयोनिषु शुद्धिर्भवतिदेवेशित्रि
रात्रैकणभोजनात् गच्छतोकामतःपुंसःस्त्रियःपापु
रुषात्मनो वधएवविधातव्योम्लेच्छानांशूद्रयासनात्
बलात्कारेणयोगच्छेदपिचाण्डालयोषितं वधस्ता
स्यविधातव्योनहंतव्याःकदापिसः परिणीतास्तुया
नार्य्योब्राह्मैर्वाशैववर्त्मभिः ताएवदाराविज्ञेयाश्चान्या
सर्वापरस्त्रियःकामात्परस्त्रियंपश्यन्रहःसंभाषय
न्स्पृशन् परिष्वज्योपवासेनविशुध्येद्द्विगुणक्रमात्
कुर्वत्येवंसकामायापरपुंसाकुलांगना उक्तोपवासवि
धिनास्वात्मानंपरिशोधयेत् द्रव्यंनिर्यंरजःस्त्रीषुपा

म॰ ति॰ ते
68
74

श्पत्नगतं परस्त्रिया। हमनुगृहतं मर्त्यः शुध्येद्द्वि
रुपवासतः दर्शयन्नग्रमात्मनोऽर्ध्वमग्रेन यापरं
त्रिरात्रमशनं त्यक्त्वा शुद्धो भवति मानवः पत्न्याः प
राभिगमनं प्रमाणयति चेत्पतिः न्टपस्तदा तां त
जारं घातस्यात् शास्त्रानुसारतः प्रमाणे यद्यशक्तः
स्यादृदयितो यपतेः पतिं त्यक्त्वा तां पोषयेद्द्यासे।
श्लिष्टैश्वेत् पतिशासने रममाणास्तूपपतौ यश्पत्न्य
त्नीपतिस्तदा तिष्ठन्त्वनितयाजारं वधार्हो नैव भूभृ
तः भर्तुर्निवारणे यत्रागमने येन भाषणे प्रयाणा।
श्रावणान्नत्यागार्हा स्यात् कुलांगना स्ते पत्यो स्व
धर्मेण पतिबंधुवशे स्थिता अभावे पितृबंधूनां तिष्ठ
ती दायमर्हति द्विर्भोजनं पराग्नं च मैथुनामिषभक्ष
णं पर्यंकं रक्तवासश्च विधवा परिवर्जयेत् नांगम्
हर्तयेद्दै स्त्री ग्राम्यालापमपित्यजेत् देवव्रतानयेत्
कालं वैधव्यं धर्ममाश्रिता न विद्यते पिता यस्य शि
शोर्माता पितामहः नियतं पालने तस्य मातृबंधुः
प्रशस्यते मातुर्माता पिता भ्राता मातृभ्रातुः सुता
स्तथा मातुः पितुः सोदराश्च विज्ञेया मातृबांधवाः
पितुः माता पिता भ्राता पितुर्भ्रातापि स्वसुः सुताः
पितुः पितुः सोदराश्च विज्ञेयाः पितृबांधवाः पत्न्या।

मीता पिता भ्राता पश्चभ्रातृः स्वसृः सुताः पत्युः पि-
तृः सोदराश्च विज्ञेया पतिबांधवाः पित्रेमात्रेपितुः
पित्रेपितामहैचैनत्याह्निये श्वयोज्यस्तु नवै पुत्रहीन-
मातामह्यायच मातामहैदरिद्रेभ्यपभ्योवासस्तथा
शतं दापयेन्नृपतिः पुंसोयथाविभवसंबिके दु-
ना र्वाच्यं कथयन्पत्नीमेकाहम शतंत्यजेत् अहंसंभाड
यन्रक्तंपातयन्समवासरान् क्रोधाद्वामोहतोभार्यां
मातरंभगिनीसुतां वदन्नृपोऽब्दस्समाहंविशुध्येद्विव
षासनात् षोडशाद्दूहिताकन्याकालातीतेपिपा-
र्थिवः ज्ञानन्नुद्वाहयेद्यस्तु सोपि विधिरेषशिवोदितः
परिणीतानरमिताकन्यकाविधवाभवेत् सापुनर्दाया
पुनः पित्राशैवधर्मेषु यं विधिः उद्वाहाद्द्वादशेपत्नेपत्य
भाजनतह्यायते प्रसूतेतत्रयद्योपनसापत्नीनवासुतः
यागर्भान्तपंचमासान्तर्गर्भंघातयेद्द्विया नद्रूपाय-
कृतंतांचघातयेत्तीब्रताडनैः पंचमासात्परतोमासात्क्या
स्त्रीभ्रूणंप्रपातयेत् तस्यायोकृत्यस्तस्याश्चपातकस्या-
द्धयोऽस्त्वं योहन्तिज्ञानतोमर्त्योमानवःक्रूरचेष्टितःवध
स्तस्यविधातव्यःसर्वथाधरणीश्वरैः प्रमादादभ्रमतो-
ज्ञानाद्हतेनरमरिंदमः द्रविणादानतस्तीव्रताडनेन
विशोधयेत् स्वतोवापरतोवापिवधोपायंप्रकुर्वतः ।

म·ति·
तं
७५
15

अज्ञानवधिनो दण्डो विहितस्तस्य पापिनः मिथः सं
ग्रामयोद्धारमाततायिनमागतं निघ्नस्य परमेशानि
न पापार्हो भवेन्नरः अंगच्छेदं विधातव्यं भूमिस्तेनो गति
कृन्तने प्रहारे च प्रहरणं तु पापं चिकीर्षु विप्रा
न् गुरून्वधयुतं प्रहरेद्योद्धुरामदः धनार्थ्येनाहत्त
बं घातकमतस्तं विशोधयेत् शस्त्रादित्तकायस्य
षण्मासात्परतो मृतौ प्रहर्ता दण्डनीयः स्यात्वधा
र्हो न हि भूमिस्ततः राष्ट्रविप्लाविनो राज्यं जिहीर्षुन्नृपवै
रिणं रहो हितैषिणो भृत्यान्भेदकान्नृपसैन्ययोः
योद्धुमिच्छुः प्रजा राज्ञां शास्त्रिणः पीड्यपीडकान् हत्वा
नरपतिस्त्वेतान्नैव किल्बिषभाग्भवेत् यो हत्वा
त्मानं वै भर्तृराज्ञायां परिहार्ययो भर्तुरेव वधस्तत्र
प्रहर्तुर्नैशिवाज्ञया अघयत्नपुमान् पशुनाशास्त्रैर्वाभि
घ्रते नरः धनदण्डेन वा कार्यं दमेनास्य विशोधनं ब
हिर्गत्वान्त्यपाज्ञा स्वन्त्यपाग्रेप्रोष्ठवादिनः दूषका
न् कुलधर्माणां शास्त्राद्राज्ञा विगर्हितान् स्थाप्या
पहारिणां क्रूरं वंचकं भेदकादिनं विवादयंते लोकां
श्च देशान्निर्यापयेन्नृपः शुल्केन कन्यादातु श्च पुत्र
घाते प्रयच्छतः देशान्निर्यापयेद्राजा पतितानुत्कृ
तात्मनः मिथ्यापवादव्याजेन परानिष्टे चिकीर्षवः

यथापराधं ते शास्त्रार्थमर्मज्ञेन महीभृता । यो यत्र परिमि-
तानि ष्टकुर्यात्तत्संमितं यतं नृपतिर्दापयेत्तज्ज्ञातायाति
ष्टभागिने मणिमुक्ताहिरण्यादिधातूनां स्तेयकारिणः
करस्य वाङ्घ्रेश्छेदं वा कुर्यात् मूल्यं विचारयन् महिषा ।
श्वगवादीनां रत्नादीनां तथा शिशोः बलेनै प्रस्[illegible]द्दा । वा
णं स्तेयि विवाहि हितो दमः अज्ञानामल्पमूल्यस्य वस्तुनः ।
स्तेयिने त्वपः विशेषयेन्नपदैकं समाहृवासयत्नकणं
विश्वासघातके छिंसितक्रतद्वेष्टुर्वंदिते यज्ञैर्वैतैल्लपोदा
नैः प्रायश्चित्तैर्निष्कृतिः ये कूटसाक्षिणो मर्त्यामध्य
स्याः पद्मपातितः शास्त्राम्नात्तीव्रदण्डेन देशान्निर्यापि
येन्नृपः षट्साक्षिणः प्रमाणं स्युश्श्रुतावस्त्वयप्रवा अ
भावे द्वावपि शिवे प्रसिद्धौ यदि धार्मिकौ देशतः कालतो
वापि तथा विषयतः स्थिये परस्परमयुक्तं चेद्यादत्तं साक्षि
णां वचः अंधानां वाक् प्रमाणं स्याद्बधिराणां तथा प्रिये
मूकानामेडमूकानां शिरसांगीकृतिर्लिपिः लिपिः प्रमा
णं सर्वेषां सर्वत्रैव प्रशस्यते विशेषाद्व्यवहारेषु न विना ।
श्रेपेक्षितं यतः स्वीयार्थमपरार्थं चेत्कुर्वतः कल्पितां लि
पिं दण्डस्तस्य विधातव्यो द्विपार्श्वं कूटसाक्षिणः अ
भ्रमस्याप्रमत्तस्य पदं गीकरणं सकृत् स्वीयार्थे तत्प्रमा
णं स्याद्वचसो वक्तृसाक्षिणाम् यथा तिष्ठंति प्रणिनि स

म॰ति॰
तं
७८
78

त्यमाश्रित्य पर्वति तथान्ते तं समाश्रित्य पातकान्यवि
लान्यपि अतः सत्यविहीनस्य सर्वपापाश्रयस्य च ताड
नाद्द्य मताद्वा ज्ञानपापार्हैः शिवाज्ञया सत्यं ब्रवीमि संक
ल्पः स्पृष्ट्वा कौले गुरुं द्विजं गंगातोयं देवमूर्तिं कुलशा
स्त्रं कुलाम्स्तं ते देवि निर्माल्यमथवा कथ्यते शापथो भवे
त् तत्रान्ते वदन्मर्त्यः कल्पांतं नरकं व्रजेत् अपाप
जनिकार्याणां त्यागे वा ग्रहणेपि वा तत्कार्यं सर्वथा
मर्त्यैः स्वीकृतं शापथेन यत् स्वीकारोल्लंघनो छेद्यैस्त्य
क्तमेकमभोजनैः भ्रमेणापि तमुल्लंघ्य द्वादशाहं क
णाशनैः कुलधर्मोपि सत्येन विधिना चेन्न सेवितः मो
क्षाय श्रेयसे न स्यात् कौले पापाय केवलं सुराद्रवम
यी तारा जीवनिस्तारकारिणी जननी भोगमोक्षाणां ।
नाशिनी विपदां रुजां दाहिनी पापसंघानां पावनी जग
तां प्रिये सर्वसिद्धिप्रदा ज्ञानबुद्धिविद्याविवर्द्धिनी मुक्तै
र्मुमुक्षुभिः सिद्धैः साधकैः क्षितिपालकैः सेव्यते सर्व
दा देवै रायेत्वाभीष्टसिद्धये सम्यग्विधिविधानेन सुस
माहितचेतसा पिबंति मदिरां मर्त्या अमर्त्या पवते क्षितौ
प्रत्येकतत्त्वस्वीकाराद्विधिना स्याच्छिवो नरः न ज्ञाने पं
चतत्त्वानां सेवनात् किं फलं भवेत् श्रयं चेद्वारुणी देवी नि
पीता विधिवर्जिता नृणां विनाशायेत् सर्वं बुद्धिमायुर्य ।

शोधनं अनंतपानात्मयस्य चतुर्वर्गप्रसाधनी ॥
बुद्धिर्विनश्यति प्रायो लोकानां मत्तचेतसां विभ्रांता
बुद्धेर्मनुजात्कार्याकार्यमजानतः स्यात्तिष्टं च परा
तिष्टं जायते स्मात्पदे पदे अतोऽल्पो वा चक्रेशो मद्ये
मादकवस्तुषु अभ्यासकृज्जनात्कायथनदाडेन
शोधयेत् स्वराभेदाद्व्यक्तिभेदात्स्वतेनाप्याथिकेन लं
वा देशकालविभेदेन बुद्धिभ्रंशो भवेन्नृणां अतएव
स्वरामानादतिपानं न लक्ष्यते सबलक्षाकपाणिपा
द्दृगभिरतिपानं विचारयेत् नैंद्रियाणि वशे यस्य म
दविह्वलचेतसः देवतागुरुमर्यादोल्लंघिनो भयद्रू
पिणः शौथिल्यानर्थयोगस्य पापिनः शिवघातिनः
दद्देजिह्वां हरेदर्थानतताडयेन्नत्र च पार्थिवः विचलत्पा
दवाकपाणि भ्रांतमन्मनसङ्गते तमुग्रं घातयेद्रा
जाद्दविणं चाहरेत्ततः अपवादवादिनं मत्तं लज्जाभय
विवर्जितं धनादानेन तं शास्यात्प्रजाप्रीतिकरो नृपः
शतामिषिक्तः कौलश्चेत् अतिपानात् कुलेश्वरि प
शुरेव समंतव्यः कुलधर्मबहिष्कृतः पिवन्नतिशयं म
द्यं शोधितं वाप्यशोधितं त्याज्यो भवति कौलानां दण्ड
नीयोपि भूभृतः ब्राह्मी भार्या सुरां मत्ताः पाययंतो हि
जातयः स्वध्येषु भार्ययासार्द्धं पंचाहं कणभोजनात्

म·ति·
ते
७८
77

असंस्कृतसुरापानात् शुध्येत्त्र्युपवसंस्त्र्यहं भु
क्त्वाप्यशोधितं मांसमुपवासद्वयं चरेत् असंस्कृ
तेमीनमांडे खादन्नुपवसेदहः अवैधं पंचमं कुर्व
न्राज्ञो दण्डेन शुध्यति अज्ञानो मानवं मांसं गो
संवादि मांसं ज्ञानतः शिवे उपोष्य पक्षं शुद्धः स्यात् प्राय
श्चित्तमिदं स्मृतं नराकृतिपशोर्मांसं मांसं मासा
दनस्य च अत्वा शुध्येन्नरः पापात्त्रुपवासैस्त्रिभिः प्रिये
म्लेच्छानां श्वपचानां च पशूनां कुलवैरिणां खाद
नं विशुद्धः स्यात्पक्षमेकमुपोषितः उच्छिष्टं य
दि भुंजीत ज्ञानादेषां कुलेश्वरि शुध्येन्मासोपवा
सेनाज्ञानात्पक्षोपवासतः अनुलोमेन वर्णाना
मन्नं भुक्त्वा [illegible] प्रिये दिनत्रयोपवासेन विशुद्धः
स्यान्ममाज्ञया पशुश्वपचम्लेच्छानामन्नं चकार्पितं
यदि वीरहस्तार्पितं वापि तदश्नन्नैव पापभाक् अ
न्नाभावे च दौर्भिक्षे विपदि प्राणसंकटे निषिद्धान्नाद
नेनापि रक्षन्प्राणान्न पातकी करिष्टे तथानेको
हात्यपाषाणदाहश्च अलक्षिते पिङ्गाणो भक्ष्यदो
षो न विद्यते पशूनभक्ष्यमांसाश्च व्याधिशुक्तान्निषि
द्धे न हन्याद्देवतार्थे पितृर्वा च पातकी भवेत् कुर्व
न्नराः कुर्यान्नवधे तु हि सर्वके अज्ञानाच्चरेदर्द्धव्र
न

तेशंकरप्रासनात् नकेशादपतंकुर्यात् ननत्वछेदनं
तथा तद्दारयोगंवसते यावन्नव्रतमाचरेत् उपवासैर्नये
न्मासंमासमेकंकणाशनैः मासैर्भेद्यामश्नन्यैर्दह्य
छव्रतमिदंशिवे स्नतोतेवापितशिराः कौलानज्ञातीः
स्वबांधवान् भोजयित्वाविमुक्तः स्यात् ज्ञातगोवधपा
तकात् अपालनवधाद्गोः शुध्येद्दशोपवासतः बा
ह्नजाघाविशुध्येच्छुः पादसूनक्रमात् शिवे गजोष्ट्रमहि
षाश्वांश्चहत्वाकौलिनिकामतः उपवासैस्त्रिभिः शु
ध्येन्मानवः कृतकिल्बिषः मृगमेषाजमार्जारान्नि
हत्यपवसेद्दहः मयूरशुकहंसांश्च सप्तोतिरघातंत्यजे
त् निहत्यमास्थिजंतेश्च नक्तमयात् निरामिषं निरा
स्थिजीविनोहत्वामतस्तापेनशुध्यति पशुमीनाश्चजा
तनिघ्नन्मृगयायांमहीपतिः नपापार्हो भवेद्देवि रा
ज्ञोधर्मः सनातनः देवोद्देशंविनाभद्रे हिंसांसर्वत्रव
र्जयेत् कृतायांवैधहिंसायांनरः पापैर्नलिप्यते संक
ल्पितव्रतात् भ्रष्टैर्देवनिर्माल्यलंघने अशुचौदेवता
स्पर्शेगायत्रीजपमाचरेत् मातापिताब्रह्मदातामहा
तोगुरवः स्मृताः निंदनेतान्वदन्क्रूरं शुध्येत्पंचोपवा
सतः एवमन्यान्गुरून्कौलान् विप्रान्नार्हन्नपिप्रि
ये सार्धद्वयोपवासेनमुक्तोभवतिपातकात् विना ।

सं॰ नि॰ ते

७८

78

विद्यार्थी मानवो देशान्तलिखेन्नगंतुमर्हति निषिद्ध
कौलिकाचारं देशं प्राप्तमपि त्यजेत् गछेत्तु स्वेछया
देशे निषिद्धकुलवर्त्मनि कुलधर्मान् पतेद्भूयः शुध्येत्
पूर्णाभिषेकतः तपनोदयमारभ्य यामाष्टकमभोज
नं उपवासः स विज्ञेयः प्रायश्चित्ते विधीयते पिबेत्तो
यांजलिं चैकं भक्तं वापि समीरणं मानवः प्राणरक्षा
र्थं न भ्रश्येदुपवासतः उपवासासमर्थश्चेद्रुजा वा
जरसापि वा तदाप्युपवासं च भोजयेद्द्वादश द्विजा
न् परनिंदां निजोत्कर्षं वा समनाधुक्तभाषणं अयुक्तं
कर्म कुर्वाणो मनस्तापैर्विशुध्यति अंत्यनियानिपा
पानि ज्ञातान्यज्ञातकृतान्यपि नश्यंति जपनाद्देव्याः
सावित्र्याः कौलभोजनात् सामान्यनियमान् पुंसां स्त्री
षु पणेषु योजयेत् सामान्यनियमान् पुंसां स्त्रीषु प
णेषु योजयेत् योषितां तु विशेषोयं पतिरेको महागु
रुः महारोगान्विता ये च येन चाश्चिररोगिणः स्वर्णदा
नेन पूतास्ते देवपैत्र्याधिकारिणः अपघातमृते ता
पि हृषितं विद्युदग्निना मृतं ह विशोधयेद्धोमैर्व्याहृत्या
शनसंख्यकैः कपीकूपतडागेषु पानं स्नापयेद्द
तोयं णात् उद्धृत्य कूपे [illegible] भाजनतस्तान् परिशोधयेत् वे
पूर्णाभिषेकमन्त्राभिर्मंत्रितैः शुद्धवारिभिः पूर्णे।

त्रिसप्तकृत्वस्स्नात्वा स्नापयेदिति शोधनं यदि स्वल्पजला
लेस्युः शार्ङ्गंधदूषिताः सपङ्कं सलिलं सर्वमुद्धृत्य स्ना
पयेत्ततः संतिभूरीणि तोयानि जलदत्तानि तेषु चेत्
शतकुम्भजलोद्धारैरभिषेकेण शोधयेत् यद्येवं शोधि
ताम्भस्सु र्तनस्पृष्टजलाशयाः अपेयसलिलास्तेषां प्रति
ष्ठामपि नाचरेत् स्नानमेषु जलैरेषां कुर्वन्कर्महपाभ
वेत् दिनमेकं निराहारः शुध्येत्पञ्चामृताशनात् याच
कं धृतिनं दृष्ट्वा वीरं शुद्धपराङ्मुखं वृषकं कुलधर्माणां
मद्यपं च कुलस्त्रियं मित्रद्रोहकरं मर्त्यं स्वयं पापरतं बुध
पश्यन्सूर्यं स्मरेत् विप्रः सचेलः स्नानमाचरेत् एवं कु
कुटकोलांश्च विक्रीणन्तो द्विजातयः नीचवृत्तिः चरंतोपि
शुध्येयुस्त्रिदिनव्रतात् दिनमेकं निराहारो द्वितीयं कणभो
जनः तृतीयं तनयेदप्सु त्रिदिनव्रतमम्बिके गृहे न्तु द्वा
दिनद्वारे स्नाङ्गतः प्रविशन्नरः वारितार्घ्यप्रवक्तापि पंचा
हमशनं त्यजेत् आगच्छन्मेष्टु स्नन्दृष्ट्वा तोतिष्ठेद्योमदा
न्वितः तथैव कुलशास्त्राणि शुध्येदेकोपवासतः एतस्मि
न्शांभवे शास्त्रे व्यक्तार्थपदबृंहिते स्फुटेनार्थकल्पयंतः
पतितानां नान्यथा गतिः इदं ते कथितं देवि सारात्सारपरा
त्परं रहस्यं तु अर्घ्यदं धर्मं पावनं हितकारकं इति श्रीम
हानिर्वाणतन्त्रे सर्वतन्त्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे

म.ति.
ते
७९
79

श्रीमदाद्यासदाशिवसंवादेस्वपरानिष्टजनकपापप्राय।
श्चित्तकथनंनामएकादशोल्लासः सदाशिवउवाच॥
अथलोकव्ययाम्याद्येव्यवहारान्सनातनान् यान्रक्ष
न्प्रविदन्राजास्वछंदःपालयेत्प्रजाः नियमेनविना
राज्ञोमानवाधनलोलुपाः मिथस्तेविवदिष्यंतिगुरुस्व
जनबंधुभिः व्यतिघ्नंतितदादेविस्वार्थिनोविघ्नहेतवे
पापाश्रयाभविष्यंतिहिंसयाचजिहीर्षया अतस्तेषांहि
तार्थायनियमोधर्मसंमतः नियोज्येनयमाश्रित्यनभ्र
श्येयुःसुमानवाः दाण्डयेत्पापिनोराजायथापापानुरू
नपे तथैवविभजेद्दायानत्वर्णसंबंधभेदतः संबंधो
द्विविधोज्ञेयोवैवाह्यजन्मनस्तथा नैवोद्वाहिकसंबंधा
दपरोवलवत्तरः दायेत्वैहृतनाज्जाया संबंधोयस्ततः
शिवे अतऊर्द्धक्रमात्तस्यातः उमान्मुख्यतरः स्मृतः त
त्रापिसन्निकर्षेणसंबंधीदायमर्हति अनेनविधिनार्थी
नविभजेयुःक्रमाद्भवेत् मृतस्यपुत्रेपौत्रेचकन्यासुपितरि
स्थिते भार्यायामपिदायार्हःपुत्रएवनचापरः बहुवल्ल
भयायत्रसर्वेतत्रसमांशिनः ज्येष्ठराज्याधिकारित्वंनतु।
वंशानुसारतः ऋणंयत्पैतृकंतस्यशोधयेत्पैतृकैर्धने
तस्मिन्स्थितेविभागार्हंनभवेत्पैतृकंवसु विभज्यप
दिरगृहीश्चविभजत्पैतृकंनराः ततस्तहनमास्यपि।

पुं

ऽऋणं दापयेन्नृपः यथास्वकृतपापेन तिर्यग्योनिमात
वाः ऋणेनापि तथा बद्धः स्वयमेव न चापरः साधारणं
धनं यच्च स्थावरं स्थावरेतरं अंशिनः प्राप्नुमर्हन्ति स्वं स्वम
शं विभागतः अंशिनां सम्मतावेव विभागः परिसिध्य
ति तेषामसंमतो राजा समहत्वं शमाचरेत् स्थावर
स्य चरस्यापि विभागार्हं वस्तुतः मूल्यं वा तदुपस्व
मंशिनां विभजेन्नृपः विभक्तेऽपि धने यस्तु स्वीयांशं प्र
तिपादयेत् पुनर्विभज्य तद्द्रव्यमधांशं शायदापयेत्
कृते विभागे द्रव्याणामंशिनां सम्मतोऽपि वै पुनर्विवा
दयेत्तत्र पापी भवति मृतेः स्थिते प्रेतस्य पौत्रस्त्र
भार्यायां च पितर्यपि पौत्र एव धनार्हः स्याद्यतस्ता।
जन्मगौरवात् अपुत्रस्य स्थिते ताते सोदरे च पितामहे
जन्मतः सन्निकर्षेणापि तेवास्य धनं हरेत् विद्यमाना
स्तु कन्यास्तु सन्निकृष्टास्तु पि स्त्रिये मृतस्य पौत्रो धनभा
ग्यतो ज्ञातितरः पुमान् धनं मृतेन पुत्रेणापौत्रं या
ति पितामहात् अतो च गीयते लोकैः पुत्ररूपः स्वयंपि
ता औद्वाहिकेऽपि संबंधे ब्राह्मी भार्या वरीयसी अपुत्र
सकृद्वेदकस्यं पत्युर्देहार्धहारिणी पतिपुत्रविहीना।
तु संप्राप्य स्वामिनोऽधनं नैव दातुं न विक्रेतुं समर्थास्व
धनं विना पितृभिः श्वशुरैर्वापि दत्तं यद्धर्मसंमतं स्व

ह्रत्योपार्जितं यच्च स्त्रीधनं तत्प्रकीर्तितं तस्यां मृता।
यां मृतकुर्यं तत्पुत्रः स्वामिपदं व्रजेत् तदासन्नतरो रिक्
थमथश्राद्धकर्म हरेत् मृते पत्यौ स्वधर्मेण पतिवंशव
शे स्थिता तदभावे पितृवंशे योतिलिष्टस्तादायमर्हति शं
कितव्यभिचारापि न पत्युर्दायभागिनी लभते जीवन
मात्रं भर्तृवित्तविहारिणः वन्ध्याश्चेद्धृतिनात्तस्य स्वधा
र्थं मंतत्परः भजेरन्स्वामिनो वित्तं समांशेन स्नुचि।
स्मिते पत्युर्धनं हरायाश्च मृते भर्तृस्तुतो स्थितो पु
त्रः स्वामिपदं गत्वा यतेनुहितं व्रजेत् एवं स्थितायां
कन्यायां मृतकुर्यं पुत्रवधूगतं तन्मृतो स्वामिनं प्राप्य
स्वशुरान्मृतामिपात् तथा पितामहे मृते वित्तं मातृ
गते पिवे तस्यां मृतायां पुत्रेण भर्तृश्वशुरगं भवेत् ॥
मृतस्योढ्गतं वित्तं यथा प्राप्नोति तत्पिता जनन्यपि
तथा प्नोति पतिहीना भवेद्यदि मृते जनन्यास्तं प्राप्य
पितृगां कुहिमातरं अपत्यानां विरहाद्यथा विकुर्य
तयास्यः येनैवापत्यं तस्य ग्रामं तेनैवोढं तदा व्रजेत् अ
तः स्थितो पितृव्यस्य धनं स्वसृगतं च सत् पत्नीस्थिते
नपत्यायां मृतेतो पितृव्यमाश्रयेत् ऊर्ध्वं हि तमथः प्रा
प्य पुत्रं समवलेवते अतः सत्यां सोदरायां वैमात्रेयोध
नं हरेत् स्थितायां सोदरायां च विमातुः पुत्रसंततो ॥

वैमात्रेयगतः वित्तं वैमात्रेयान्वयो भजेत् मृतस्य सोदरो
भ्राता वैमात्रेयस्तथाशिवे धनं पितृगतं त्वेत विभजेतां
समांशिनौ कन्यायां जीवितायां च तदपत्यं न दायभाक्
यत्र यद्वाधितं वित्तं तन्मृतावपरे व्रजेत् विभजेद्दुहित
ः पुत्राभावे पितुर्वसु उद्वाहयेत्सोऽनूढां तु पितुः साधा
रणैर्धनैः अनेन तया मृतायाश्च स्त्रीधनं स्वामिनं व्रजेत्।
अन्यत्र तु विवाहणां यस्मादात्मं तत्पदमाश्रयेत् प्रेतलब्धधने
नारी विद्ध्यादात्मपोषणं पुण्यं पत्युतनुपस्थैर्न शक्नोदा
न विक्रये पितामहस्नुषायां च सत्यां तातविमातरि पि
तामहगतं रिक्थं तत्पुत्रेणस्नुषां व्रजेत् पितामहपितृ
व्येच तथा भ्रातरि जीवति अथोभवानां मृत्युमात्मात्मते
व धनभाग्भवेत् पितृव्यान्सन्निकर्षेऽत्र तु लोके भ्रातृपि
तामहे धनं पितृपदं गत्वा प्रयातुर्भ्रातरं व्रजेत् स्थिते।
प्यपत्ये दुहितुः प्रेतस्य पितरि स्थिते दुहित्रपत्यं धनभा
क् धनं यस्माद्यो मृत्वे स्वः प्रयातुः स्थिते तातेन तथा मा
तरि कालिके पुंसो मृत्युमितस्त्वेन धनहारी भवेत् पिता
स्थितः स्वपितृमातापि एडो वर्तमाने पि मातुले प्रेतस्य ध
नहारी स्यात् पितुः संबंधयोरवात् अथ तन्मातामहं न ताभा
वे धनं मृद्ध्र भवंगतं तत्रापि पुंसां मृत्युमतो दितं पितृकु
ले शिवे अतोऽत्र सन्निकृष्टो पि मातुलो नाम याहृतं ॥

म॰ति॰
तं
८९
81

अजीवत्पितृकः पौत्रः पितृव्यैः सह पार्वति पिताम
हस्य द्रविणात् स्वपितुर्दायमर्हति भ्रातृहीना तथा ।
पौत्री पितृव्यैः समभागिनी पितामहधने सौम्या हे व ।
धेन्मृतमातृका सर्वे पौत्राः पितामहात्पौत्राः पितृ
व्यसत्यपि वित्ते पितृयते देवि पौत्री तत्राधिकारिणी
अयोगामिषु वित्तेषु प्रमातृज्यायान् यत्नतः ऊर्द्ध्वगा
मिपते श्रेष्ठः प्रमातृर्द्धी द्वयोर्भवेत् अतः स्नुषायां पौ ।
त्रे च सत्यां दुहितरि प्रिये प्रेतस्य विभवं हर्त्तुं नैव शक्नो
ति तत्पिता यदा पितृकुलेन स्यात् मृतस्य धनभाजनं
पूर्वोक्तविधिना किंच मातामहकुलं भजेत् मातामह
हगतं वित्तं मातुलैर्यं सुतादिभिः अथ ऊर्द्ध्वक्रमेणैव ।
प्रमां संस्त्रियमाश्रयेत् भार्य्यं वयविद्यमानैः पित्रोः सा
पिण्डैश्च स्थिते मृतस्य पौत्रीत तद्यान पितुर्दायभाग्भ
वेत् पौत्रपत्नी यतत्पत्राल भेरत्धनभागिनः ग्रास
माच्छादनं भद्रे स्वप्रयात्तद्धेयाय धनं पौत्रो ह्यंत्यप ऊर्द्ध्व
नी पौत्र भर्त्तैव पालयेत् सौम्यं चेन्नाधिकारोऽस्याः पित्रा
दीनां धने प्रिये अतः सत्कुलजां कन्यां पौत्रे कुद्धाह
यत्पिता क्रोधाद्वा लोभतो वापि स भवेल्लोकगर्हितः
पौत्री तद्दत्तधाभावे सोदको ब्राह्मणदौत्रयः हे वृ ऽक्रम
तो वित्तं मृतस्य शिवशासनात् पिण्डदातृसमप्रकृषा ।

सपिण्डाः कथिताः प्रिये सोदकादशमांताः स्मृतास्ततः
केवलगोत्रजाः विभक्तद्रविणा यत्र संसृष्टे त्वेकयात्
चेत् अविभक्तविधानेन भजेरंस्तद्धनं सुतः अविभक्ते
विभक्ते वा यस्य यादृग्विभागिता स्मृते पितृस्य दायादा
स्तादृग्विभवभागिनः येयस्य धनहर्तारो भवेयुर्जीव
तावधि दद्युः पिण्डं तएवास्याशौचभागिनस्तं विना लो
केऽस्मिन् जन्मसंबंधाद्यथाशौचं विधीयते धनभागित्व
संबंधात् त्रिरात्रं विहितं तथा पूर्णेऽशौचेप्यवापूर्णे तत्र
कालाभ्यंतरे श्रुते श्रवणाच्छेषदिवसैर्विशुद्ध्येयुर्द्विजा
दयः कालातीते तु विज्ञाते त्वाशौचं न विद्यते पूर्णे
त्रिरात्रं विहितं न चेत्संवत्सरात्परं वर्षातीतेपि चेन्मातुः
पित्रोर्वा मरणं श्रुतौ त्रिरात्रमशुचिः पुत्रस्तथा भर्तुः प
तिव्रता अशौचाभ्यंतरे यस्मिन्नशौचान्तरमापतेत् अ
धिशौचेतनमर्यानां शुद्धिस्तत्र विधीयते अशौचानां गुरु
त्वं च कालव्यापित्वयोस्तथा व्याप्यव्यापकयोर्मध्ये गा
रीयो व्यापकं स्मृतं यद्यशौचांतदिवसे पतेदपरसूत
के पूर्वाशौचेन शुद्धिः स्यादाद्यहद्यादिनद्वयं तावत्पि
तृकुलाशौचं यावन्नोढा हतं स्त्रियाः जाते परिणये पित्रो
र्दैतीनौ त्र्याहमदाहृतं विवाहानंतरं नारी पतिगोत्रेण गो
त्रिणी न पायहीनगोत्रेण दत्तपुत्रस्य गोत्रिता सुतमा

दायमन्त्यजनन्याजनकस्यच स्वगोत्रनामान्ङ्गा।
ल्लिख्या संस्कुर्य्यात् स्वजनैः सह औरसेऽपि यथाविज्ञो
धीते पिण्डेऽधिकारिता श्रादाश्रोर्दत्तकेत द्वयतोस्यपि
तरौ हितौ आ पंचाहं शिशुं गृहून सवर्णान्परिपाल
येत् पंचवर्षाधिको बालो दत्तको न प्रशस्यते भ्रातृ
पुत्रोऽपि दत्तश्चेद्गृहीतैव भवेत्पिता उत्पादकः पि
तृव्योस्यात्सर्वकर्मसु कालिके योयस्य धनहर्तास्या
त्सतद्धर्माणि पालयेत् संरक्षेन्नियमान्तस्य तद्धृ
त्यांस्तोषयेत् कानीना गोलकाः कुण्डाः अतिपात।
किनश्च ये नाशौचं मरणे तेषां नैव दायाधिकारिता
लिंगछेदो दमो येषां यासां नासानिकृन्तनं महापात
कितां चापि मृतौ नाशौचमाचरेत् दत्वामहेशाही
तानां परिवारान्धनान्यपि पालयेद्रक्षयेद्धा जाया
वद्द्वादशवत्सरं द्वादशाब्दे गते तेषां दर्भदेहान्न वि
दाहयेत् त्रिरात्रं तेतत्सुताद्यैः प्रेतत्वं परिमोचयेत्।
ततस्तत्परिवारेभ्यः पुत्रादिक्रमतो धनं विभज्यनृ
पतिर्दद्यादन्यथा पातकी भवेत् नकोपि रक्षिता यस्य
दीनस्यापहृतस्यच तस्यैव नृपतिः पातायतो भूपः प्र
जाप्रभुः यदागछेदनुद्दिष्टा विभागां तेपि कालिके
तस्यैव दाराः पुत्राश्च धनं तस्यैव नान्यथा नसमर्थः

इमात्दातुं पैतृकं स्थावरं च यत् स्वजनायाथवान्यस्मै
दायादानुमतिं विना यत्तु स्वार्जितं रिक्थं स्थावरं स्थावे वै
तरं अस्थावरं पैतृकं च स्वेच्छया दातुमर्हति स्थिते पुत्रेः
ऽथवा पत्नीकन्यायां तत्पिताऽथवा जनके च जनन्यां वा।
भ्रातर्येवं स्वसर्यपि स्वार्जितं स्थावरं धनमस्थावरं धनं
च यत् अस्थावरं पैतृकं च दातुं सर्वं क्षमो भवेत् यत्नमेवं
विधानेन दत्तं वा धर्मसात्कृतं इमात् तदन्यथा कर्तुं पुत्राद्यै
नैव शक्यते धर्मार्थः स्थापितं रिक्थं दातारं लब्धुमर्हति
न प्रभुः पुनरादातुं धर्मोऽस्य यतः प्रभुः मूलं वा तत्तु प
त्त्वं यथा संकल्पमं विके स्वयं वा तत् प्रतिनिधिर्धर्मा
र्थं विनियोजयेत् स्वोपार्जितधनस्यार्द्धं दायादा यापि
चेद्धनी दद्यात् स्नेहेन तत्त्वान्योनान्यथा कर्तुमर्हति य
दि स्वोपार्जितस्यार्द्धमेकस्मै धनहारिणे दद्यात्पत्न्यै स्वदा
याद्यैः प्रतिरोद्धुं न शक्यते एकेन पितृवित्तेन यत्र वित्तमु
पार्जितं पित्र्ये समांशाद् दायादानलाभार्हो वितार्जकं॥
पैतृकाणि च वित्तानि नष्टे पुद्धारयेत्तु यः दा[illegible]दानात या
हृतेभ्य उद्धर्ता ह्यंशमर्हति पुण्यं वित्तं च विद्या च नाम्रयेद
शरीरिणं शरीरन्तु पितुर्यस्मात् किन्नस्यात् पैतृकं वसु
पा इष्यगोत्रैः इष्यवित्तैर्मन्त्रजैर्यदुपार्जितं सर्वं तत् पितृ
संक्रान्तं न दा स्वोपार्जितं कुतः अतो महेशि स्वाध्यायैर्धन

मृ॰ति॰ यद्धनमर्जितं स्वोपार्जितं तदेव स्यात्तत्स्वामी [illegible]न
ते चापरः मातरं पितरं देवि गुरुं चैव पितामहान् मातामं
८३ हान्करेणापि प्रहरन्नैव दायभाक् निघ्नन्नपि स्त्री।
83 णोर्न तेषां धनमाप्नुयात् हतानामन्यदायादा भवेयुर्ध
नभागिनः नपुंसकाः पुत्र्यश्चैव स्वान्नाच्छादनमवि
के यावज्जीवमर्हन्ति न ते स्युर्दायभागिनः सस्वामि
कं प्राप्य धनं पथि वा यत्र कुत्रचित् न्यपतत्स्वामिने प्र
त्यादापयेत्तद्विचारयन् अस्वामिकानां जीवानामस्वा
मिकधनस्य च प्राप्तात्तत्र भवेत्स्वामी दशमांशं त्वपेपर्थ
येत् स्थावरं धनमन्यस्मै स्थिते सान्निध्यवर्तिनि योग्ये
क्रेतरि विक्रेतुं न शक्तः स्थावराधिपः सान्निध्यवर्तिता
ज्ञातिः सवर्णो वा विशिष्यते तयोरभावे स्युर्दो[illegible]के
रिक्षागारीयसी तिथिं तन्मूल्यपाते न स्थावरस्य क्रयो
यमे तन्मूल्यं चेत्समीपस्थो रानिके तातनचापरः मूल्यं
दातुमशक्तश्चेत्संमतो विक्रयेऽपि वा सन्निधिस्थस्तदा
न्यस्मै गृहीं शक्नोति विक्रये क्रीतं चेत्स्थावरं देवि परोक्षे
प्रतिवासिनः श्रवणादेव तन्मूल्यं दत्वा सोऽप्राप्नुमर्हति
क्रेतातत्र गृहारामान् विनिर्माति भुनक्ति वा मूल्यं दत्वा
पिनाप्नोति स्थावरं सन्निधिस्थितः करहीना प्रतिहताव
न्यारण्यातिदुर्गमा अनादिष्टोऽपि तां भूमिं संपन्नो कर्त्तु

मर्हति बहुप्रयासमसाध्यायास्तस्या भूमेर्मर्हीभरते द
त्वादंशांशे भेजीयाद्भूमिस्वामी यतोऽन्यः वापीकूपत
डागालोद्यानतें द्भूतरोपणं प्रतिष्ठकरे देशे नगरे हं क
र्तुमर्हति देवार्थं दत्तकूपादौ तथा स्रोतस्वतीजले पा
नाधिकारिणः सर्वे स्युश्चनैतिकवासिनः यतोऽयसे वा
ना लोका भवेयुर्जलकातराः न सिंचेयुर्जलं तस्माद
पि सन्निधिवर्तिनः धनानामविभक्तानामंशिनां सम
तिं विना तथा निर्णीतविनानामविहितोन्यामविक्रये
स्याप्यानां बहुविनानां ज्ञा नह्येषु यत्नतः तन्मूल्यं दाप त्वा
येत्तत्स्वामिने सर्वथाऽन्यः स्वाभिमत्या स्थापकस्य पश्चा
दिन्यस्तवस्तुनाम् व्यवहारे कृते तत्र यन्नासं पोषयेत्त
स्मात् लाभे नियोजयेद्यत्र स्थावरादीनि मानवः नियमेन
विना काललाभयोरन्यथा भवेत् साधारणानि वस्तूनि
लाभार्थं नैव योजयेत् मृते पितरि सर्वेषामंशिनां स
म्मतिं विना क्रमप्राप्तं यमूल्ये तद्द्रव्याणां विक्रये सति
न्यपत्तद्न्यथाकर्तुं न क्षमो भवति पार्वति जननं चापि
मरणं शरीराणां यथा सकृत् दानं तथैव कन्याया बालो
ढायाः सकृत् सकृत् नैकपुत्रः सुतं दद्यान्नैकस्त्रीकस्तथा
स्त्रियं नैककन्यः सुतां शेवोढा हे पितृहितः प्रमान् देवे
पित्र्ये च वाणिज्ये राजद्वारे विशेषतः यद्दिद्यात् प्रतिनि

म॰नि॰
ते
८४
84

यिस्तन्नियंतः क्वचिद्भवेत् नदाण्डार्हः प्रतिनिधिस्त
थाहूतोपिसव्रते नियोक्तृकृतदोषेणविधिरेषसना
तनः ऋणोकृषौचवाणिज्येतथासर्वेषुकर्मसु। यद
यदंगीकृतेलोकैस्तत्कार्यंधर्मसंमतं अधीशानां।
विनंविश्वंनाशंयाति निवेदय[illegible]ना पात्तृत्वात्ति व
विश्वेशस्तस्माल्लोकहितोभवेत् इतिश्रीमदाद्यास
दाशिवसंवादेसनातनव्यवहारकथनंद्वादशोल्ला
सः इतिनिगदितवन्तंदेवदेवंमहेश्वरं निखिलनि
गमसारंस्वर्गमोक्षैकबीजं कलिमलकलितानां
पावनैकान्तचिन्ता त्रिभुवनजनमाता पार्वतीप्राहभ
क्त्या देव्युवाच॥ महर्षीणामादिशक्तेर्महाकाल्याम
हाद्युतेः सूक्ष्मातिसूक्ष्मभूतायाःकथंरूपनिरूपणं
रूपंप्रकृतिकार्याणांसातुसाक्षात्परात्परा एतन्मेसं
शयंदेवविशेषाच्छेत्तुमर्हसि सदाशिवउवाच। उपा
सकानांकार्यार्थंपूर्वमेवकथितंप्रिये गुणक्रियानुसा
रेणरूपंदेव्याःप्रकल्पितं श्वेतपीतादिकोवर्णोयथा
कृष्णेविलीयते प्रविशन्तितथाकाल्यांसर्वभूतानि।
शैलजे अतस्तस्याःकालशक्तेर्निर्गुणायानिराकृतेः
हितायाःप्राप्तयोगानांवर्णःकृष्णोनिरूपितः नित्या।
याःकालरूपायाअरूपायाःशिवात्मनः अमृतत्वा।

ललाटेस्याः शशिचिह्नं निरूपितं शशिसूर्याग्निभि
र्नित्यैः रविलं कालिकं जगत् सम्पश्यति यतस्तस्मा
त्कल्पितं नयनत्रयं प्रशमं सर्वसत्त्वानां कालदण्डे
न चर्वणात् तद्रक्तसंघो देवेश पावासो रूपेण भाषितं
समये समये जीवरक्षणं विपदः शिवे प्रेरणं स्वस्वा
कार्ये भुवरक्षाभयमीरितं रजोजनितविश्वानिवि
श्वम्भ परितिष्ठति अतोहि कथितं भद्रे रक्तपद्मासना
स्थिता क्रीडन्तं कालिकं कालं पीत्वा मोहमयीं सुराम्
पश्यन्ती चिन्मयी देवी सर्वसाक्षिस्वरूपिणी एवं गुणा
न् सारेण रूपाणि विविधानि च कल्पितानि हितार्था
य भक्तानां वसुमेधसा देव्युवाच। ध्यानं यत्कथितं का
ल्या जीवनिस्तारहेतवे तस्मान्नृपतो मूर्तिं स्वर्णमयीं
वा शिलामयीम् दारुधातुमयीं वापि निर्माय यदि
साधकः विचित्रभवनं कृत्वा वस्त्रालंकारभूषिताम्
स्थापयेत्तत्र देवेशि किं फलं तस्य जायते प्रतिष्ठाकेन
विधिना तस्याः प्रतिष्ठिते प्रभो कर्तव्या तदशेषेण कृ
पया मे प्रकाशय तां वापीकूपग्रहारामदेवप्रतिष्ठिते
लयाः प्रतिष्ठा सूचिता पूर्वं गदिता न विशेषतः तदि
धानमपि श्रोतुमिच्छामि त्वत्तस्त्वां तु जात् कथ्यतां पर
मेशान कृपया यदि रोचते सदाशिव उवाच॥ शृणु

म॰ति॰
तं
८५
85

मेतत्परं त्वं यत्पृष्टं परमेश्वरि कथयामि भवत्स्नेहा
त्समाहितमनाः शृणु सकामाश्चैव निष्कामा हि द्वि
धा मनुविमानवाः सकामा लोकपदं मोक्षः कामिनो फ
लमुच्यते यो यद्देवप्रतिकृतिं प्रतिष्ठापयति प्रिये।
स तल्लोकमवाप्नोति भोगानपि तदुद्भवान् तृणामये
प्रतिविंबे तु वसेत्कल्पायुतं दिवि दारुपाषाणधा
तूनां क्रमाद्दशगुणाधिकं तृणकाष्ठादिरचितं ध्वज
वाहनसंयुतं मंदिरं देवमुद्दिश्य काममुद्दिश्य वा
नरः संकुर्याद्यस्त्वजेहापि तस्य पुण्यं निशामय तृ
णादिनिर्मितं गेहं यो दद्यात्परमेश्वरि वर्षकोटिसह
स्राणि स वसेद्देववेश्मनि इष्टकागृहदाने तु तस्मा
च्छतगुणं फलं ततोऽयुतगुणं पुण्यं शिलागेहप्रदा।
ततः सेतुसंक्रमदाता यो यमलोकं न पश्यति स्वं
सुरालयं प्राप्य मोदते स्वर्निवासिभिः हृद्यारामप्र
तिष्ठाता गत्वा त्रिदशमंदिरं कल्पपादपहन्देषु नि
वसन् दिव्यवेश्मनि भुंक्ते मनोरमान्भोगान्मनसा
यानभीप्सितान् प्रीतये सर्वसत्वानां यः प्रदद्याज्जला
शयं विधूतपापास्ते प्राप्य ब्रह्मलोकमनामयं निव
सेयुः शतं वर्षान्तस्ते संप्रतिश्रीकरं यो दद्याद्वाहनं दे
वि देवताप्रीतिकारकं स तेन रत्नितो नित्यं तल्लोके नि

वसेद्दिवं स्वर्णमये वाहने दत्ते यत्फलं जायते भुवि
दारुजे तद्दशगुणं शिलाजे तद्दशाधिके । रीतिका।
कांस्यताम्रादिनिर्मिते देववाहने दत्ते फलमवाप्नो
ति क्रमात् शतगुणाधिकं देवागारे महासिंहं वृषभं
शंकरालये गारुडं केशवगेहे प्रदद्यात्साधकोत्तमः
तीक्ष्णदंष्ट्रः करालास्यः सटाशोभितकंधरः चतुरंघ्रि
वज्रनखो महासिंहः प्रकीर्तितः शृंगायुधः शुभस्क
न्धश्चतुष्पादः सितखुरः बृहत्ककुत्कमलपुच्छः प्रणा।
मस्कंधो वृषभः स्मृतः गरुडः पक्षिराजश्च लम्बनासो दी।
र्घनासिकः पादसंकोचसंविष्टः पक्षयुक्तः कृतांजलि
पताकाध्वजदानेन देवप्रीतिः शतं समाः ध्वजदण्डस्तु
कर्तव्यो द्वात्रिंशद्धस्तसंमितः स्फुटपक्षिच्छिद्ररहितः स
रलः शुभदर्शनः वेष्टितो रक्तवस्त्रेण कोटौ चक्रसम।
न्वितः पताका तत्र संयोज्या तन्नाम्ना वाहनचिह्निता प्रश
स्ता मूलाद्धस्तमात्रा दिव्यवस्त्रविनिर्मिता शोभमाना
ध्वजाग्रे या पताका सा प्रकीर्तिता वासोभूषणपर्यं।
कायानसिंहासनानि च पानप्राशनतांबूलभाजना
नि शुभं गृहं मणिमुक्ताप्रवालादिरत्नान्यात्मप्रियं च
यत् यो दद्याद्देवमुद्दिश्य श्रद्धाभक्तिसमन्वितः स
न लोकं समासाद्य तत्कोटिगुणं लभेत् कामिनां।

म॰ति॰
तं
८९
86

फलमिच्छकं स्थपितं स्वमराज्यवत् निष्कामानान्तु
निर्वाणं तु तदाहुस्तिर्वर्जितं जलाशयगृहारामसेतु
ते ग्निमण्डपाविता देवतानां प्रतिष्ठायां वास्तुदैवं प्रपू
जयेत् अनर्चयित्वा यो वास्तुं कुर्यात् कर्माणि मा
नवः विघ्नं तस्याचरेद्वास्तुः परिवारगणैः सह क
पिलास्यः पिंगकेशो भीषणो रक्तलोचनः कोटरा
लोलेव कर्णो दीर्घजंघो महोदरः अश्वतुण्डः काक
कण्ठो वज्रबाहुर्भूतालकः एते परिकरा व्यालाः।
हृज्जनीयाः प्रयत्नतः मण्डलं स्थापनं वक्ष्यामि यत्र।
वास्तु प्रपूजयेत् वेद्यां वा समदेशे वा भूम्युप।
लेपिते वाप्यीशकोणयोर्मध्ये हस्तमात्रप्रमाणतः
तत्र पातक्रमेणैव रेखामेकां प्रकल्पयेत् ईशानाद
ग्निपर्यंतमपरां रचयेत्तथा आग्नेयान्नैर्ऋतं याव
त नैर्ऋताद्वानिलावधि दत्वा रेखां चतुष्कोणमेकं म
ण्डलमालिखेत् कोणसूत्रं पातयित्वा चतुर्द्धा विभ
जेत्तत यथा तत्र भवेद्विमत्स्यपुच्छचतुष्टयं त
तो भित्वा पुच्छमूले वारुणाद्वासवावधि कौबेरात्या
म्यपर्यन्तं दद्याद्रेखाद्वयं सुधीः ततश्चतुर्षु कोणे
षु कोणरेखाञ्चितेष्वपि कर्णकर्णिप्रयोगेणान्यमे
द्रेखाचतुष्टयं एवं संकेतविधिना कोष्ठानां षोड।

शंलिखेत् पंचवर्णैनचूर्णेनरचयेद्यंत्रमुत्तमं चतुर्थ
मध्यकोष्ठेषुपद्मंकुर्यान्मनोहरं चतुर्दलंपीतरक्तक
र्णिकंरक्तकेसरं दलानिशुक्लवर्णानिवह्नापीतानि
कल्पयेत् यथेष्टंपूरयेत्पद्मसंधिस्थानानिवर्णकैः
शांभवंकोष्ठमारभ्यकोष्ठानांद्वादशंक्रमात् श्वेतकृ
ष्णपीतरक्तैश्चतुर्वर्णैःप्रपूरयेत् दक्षिणावर्तयोगेन
कोष्ठानांपूरणंप्रिये वामावर्तेनदेवानांपूजनंतेषुसा
धयेत् पश्चिमसमर्चयेद्वास्तुदेवंविघ्नोपशान्तये ईशा
दिद्वादशेकोष्ठेकपिलास्यादिदानवान् कूष्माण्डको
क्तविधिनाकुर्वन्नन्तसंस्कृतिं यथाशक्त्याहुतिंदत्वावा
स्तुयज्ञंसमापयेत् इतितेकथितादेविवास्तुपूजाशु
भप्रदा यांकृत्वायजमानः क्वापिवास्तुविघ्नैर्नबाध्यते ॥
देव्युवाच॥ मण्डलंकथितंवास्तोर्विधानमपिपूज
ने ध्यानंनगदितंतावत्तदिदानींप्रकाशय सदाशि
वउवाच ध्यानंवक्ष्मिमहेशानिश्रूयतांवास्तुरक्षसः
यस्यानुशीलनात्सद्योनश्यंतिसकलापदः चतुर्भु
जंमहाकायंजटामंडितमस्तकं त्रिलोचनंकराला
स्यंहारकुण्डलशोभितं लंबोदरंदीर्घकर्णंलोमशंपी
तवाससं गदात्रिशूलपरशुखट्वांगंदधतंकरैः असि
चर्मधरैर्वीरैःकपिलास्यादिभिर्वृतं शत्रूनामन्तकं

म॰ति॰
ते
८७
87

सोत्ताऽरुणादित्यसन्निभं ध्यायेद्देवं वास्तुपतिं कूर्म
पद्मासनस्थितं मारीभये रोगभये डाकिन्यादिभये
तथा ऽत्पातिकापत्यदोषे बालरक्षोभये पि च ध्या
त्वैवं पूजयेद्वास्तुं परिवारसमन्वितं तिलाज्यपाय
सैर्हुत्वा सर्वशांतिमवाप्नुयात् यथा वस्तुः पूजनी
यः प्रोक्तकर्मसु सर्वते ग्रहाश्च पितथा पूज्याद श
दिक्पतिभिर्युताः ब्रह्माविष्णुरुद्रश्च वाणी लक्ष्मी
श्च शर्मदी मातरः सगणेशाश्च संपूज्या वसवस्तथा
पितरो यद्यत्न मासः सु कर्मस्वेतेषु कालिके सर्वं तस्य
भवेद्व्यर्थं विघ्नं वापि पदे पदे अतो महेशि यत्नेन प्रो
क्तसंस्कारकर्मसु पितॄणां तु मयेद्याभ्युदयिकं श्राद्ध
माचरेत् ग्रहयंत्रं प्रवक्ष्यामि सर्वशांतिविधायकं
यत्रैव पूजिताः सेंद्रा ग्रहा यच्छंति वांछितं त्रित्रिको
णैर्लिखेद्यंत्रं तद्वहिर्हेममालिकेत् विदध्याद्वृत्तल
ग्नांतिदलाष्टधी चतद्बहिः चतुर्द्वारान्वितं कुर्यात्
भूपुरं सुमनोहरं वासवेशानयोर्मध्ये भूपुरस्य ब
हिः स्थले वृत्तं विरचयेदेकं प्रादेशपरिमाणकं रक्षो
वारुणयोर्मध्ये चापरं कल्पयेत्तथा नवग्रहाणां व
र्णेन नवकोणानि पूरयेत् मध्ये त्रिकोणहीपार्श्वेषु स
मदक्षिणभेदतः श्वेतपीतौ विधातव्यौ पूर्वभाव ।

स्थितेततः अष्टदिक्पतिवर्णैनपर्णान्यष्टौप्रकल्पयेत्
सितरक्तासितैश्चूर्णैः पुरःप्राकारमाचरेत् पुरोबहिः
स्थिरेह्यन्तेदेविशोदशसम्मिते उपर्यधःक्रमेणैवरक्ता।
श्वेतेविधायच संधिस्थानानियंत्रस्य स्वेच्छयारचयेत्सु
धीः यन्त्रकोष्ठेवस्थितायेचतत्क्रमंशृणुसांप्रतं मध्य
कोणेयजेत्सूर्यंपार्श्वयोरक्तणोशिवोमम् पश्चात्तच।
ण्डेपोर्द्दण्डेशौपूजयेदंशुमालिनः भानूर्द्धकोणेपूर्वस्या
मर्चयेद्रजनीकरं आग्नेयेमंगलंयाम्येबुधंनैर्ऋतेको
णके बृहस्पतिंवारुणेचदैत्याचार्यंप्रपूजयेत् शनैश्च
रंतुवायव्येकौवेरेशानयोःक्रमात् राहुकेतूयजेत्चं
द्रंपरितस्तारकागणान् रवीरक्तःशशीशुक्लो मंगलो
रुणविग्रहः बुधजीवौपाण्डुपीतौश्वेतःशुक्रोसितःश
निः राहुकेतूविचित्रांगौग्रहवर्णाःप्रकीर्तिताः चतुर्भु
अ जंरविंध्यायेत्पद्मकावरभयैः चिंतयेच्छशिनंदानस
द्राम्रतकरांबुजं कुजमीषत्कुजंतं वह्निस्ताम्भोदाण्ड
धारिणं ध्यायेत्सोमात्मजंबालंभाललोलितकुंतलं
यज्ञसूत्रांचितंध्यायेत्पुस्तकांबुकरंगुरुम् एवंदैत्यगु
रुंचापिकालंरवंजंशनैश्चरं राहुकेतुशिवःकायौवि
कृतौहारचेष्टितौ ध्यात्वेवंध्यानैर्ग्रहानिष्टावजेदिन्द्रादि
दिकपतीन् दलेष्वष्टसुपूर्वादिक्रमशःसाधकोत्तमः।

त॰४

म.ति. सहस्राक्षं यजेदादौ पीतकौशेयवाससं वज्रपाणिं
तं पीतरुचिं स्थितमैरावतोपरि रक्ताभं छागवाहस्थं
८८ शक्तिहस्तं हुताशनं ध्यायेत्कालं लुलायस्थं दण्डि
88 तंहुलविग्रहं निर्ऋतिः खड्गहस्तं च श्यामलं वा
जिवाहनं वरुणं मकरारूढं पाशहस्तं सितप्रभं
ध्यायेत्कलविंघवायुं मृगस्थं चांकुशायुधं कुबे
रं कनकाकारं रत्नसिंहासनस्थितं स्तुतं यक्षगणैः
सर्वैः पाशांकुशकराम्बुजं ईशानं वृषभारूढं त्रि
शूलवरधारिणं व्याघ्रचर्माम्बरधरं शशीन्दुसदृश
प्रभं ध्यात्वा चैतान्क्रमादिष्ट्वा ब्रह्मानं ततो द्वारोबहिः
ग्रेह्मम उर्ध्वाधोहनयोर्व्योद्वारदेवताः उग्रभीमः प्रचण्डेशः
पूर्वद्वाःस्थाः प्रकीर्त्तिताः जयन्तः क्षेत्रपालश्च नकु
लेशो हतशिराः याम्यद्वारे पश्चिमे च हकाख्याने
दडुर्जराः त्रिशिराः शुरजिह्वैव भीमनादो महोदयः
उत्तरद्वारपार्श्वे ते सर्वे शस्त्रास्त्रपाणयः श्रूयतां ब्र
ह्मणो ध्यानमनन्तस्यापि सुव्रते रक्तोत्पलनिभो
ब्रह्मा चतुरास्यश्चतुर्भुजः हंसारूढो वराभीतिमा
लापुस्तकपाणिकः हिमकुन्देन्दुधवलः सहस्रा
क्षः सहस्रपात् सहस्रपाणिवदनो ध्येयोऽनन्तः
सुरासुरैः ध्यानं पूजाक्रमश्चापि यंत्रं च कथितं।

श्रिये वास्त्वादिकमतोऽत्येषांमंत्रानपि स्मराश्रिये
नकारो हव्यवाहस्थः षड्दीर्घस्वरसंयुतः भूषितो
नादबिंदुभ्यांवास्तुमंत्रः षडक्षरः तारंमायांतिग्मर
श्मिङे ऽन्नमारोग्यपदंवदेत् वह्निजायांततोदत्त्वास्तूर्य
मंत्रंसमुद्धरेत् कामोमायाचवाणीचततोमन्त्रक
रेतिच श्रमन्तेलावयद्वंद्वं स्वाहासोममनुर्मतः ऐं ह्रीं
ह्रौं सर्वपदादुष्टानाशयनाशय स्वाहावसानोमंत्रोऽयं
मंगलस्यप्रकीर्तितः ह्रीं श्रीं सौम्यपदं चौकासर्वात्का
मान्ततोवदेत् पूरयांतेवह्निकांतामेषसोमात्मजेम
नुः तारेणपुटितावाणीततः स्वरगुरोः पदं अभीष्ट
यच्छयच्छेति स्वाहामंत्रो बृहस्पतेः शंशंशींस्रूं शौंततः शो
णः शुक्रमंत्रः समीरितः ह्रांह्रींह्रौंह्रौं सर्वशत्रून्विद्रा
वयपदद्वयं मार्तण्डसूनवेपश्चान्नमोमंत्रः शनैश्च
रे रांह्रौं भौं ह्रौं सोमशत्रोः शत्रून्विध्वंसयद्वयं राहवेन
मइत्येषराहोर्मन्त्रउदाहृतः कृंकृंकैंकेतवेस्वाहा ॥
केतोर्मंत्रः प्रकीर्तितः लंरंमंसंबुधयमितिरंह्रौं श्रीमि
तिक्रमात् इंद्रादीनांतदिक्पानांदशमंत्राः समीरिताः
अप्येषांपरिवाराणांनाममंत्राः प्रकीर्तिताः अनन्तक
मंत्रेसर्वत्रविधिरेषशिवोदितः नमोऽन्तमंत्रेदेवेशि।
नतमोयोज्यं हुयः स्वाहान्तेपितथामंत्रेनदयाद्धा।

ये

म॰नि॰
ते
८५
89

ह्निवल्लभो ग्रहादिभ्यः प्रदातव्यं शुभं वा सश्रम्भूष।
णं तेषां वर्णस्वरूपेण नान्यथा श्रेयसे भवेत् कुशण्डि
कोक्तविधिना वह्निं संस्थापयन्सुधीः शुष्कैर्हव्यावचै।
र्यहास्समिद्भिर्होममाचरेत् शांतिकर्मणि पुष्टौ च व
रदो हव्यवाहनः प्रतिष्ठायां लोहिताक्षः शत्रुहा क्रू
रकर्मणि शांतौ पुष्टौ महेशानि तथा क्रूरेपि कर्मणि
ग्रहयागं प्रकुर्वाणो वांछितार्थमवाप्नुयात् यथाप्र
तिष्ठाकार्येषु देवार्चा पितृतर्पणं वास्तोर्यागे ग्रहा
णां च तद्वदेव विधीयते यद्येकस्मिन्दिने द्वित्रि प्रति
ष्ठायागकर्म च तत्रैव तत्र देवार्चा पितृश्राद्धादि
संक्रियाः जलाशयगृहारामसेतुसंक्रमणादि।
तः वाहनासनयानानि वासोलंकरणानि च पा
नाशनीयपात्राणि देयवस्तूनि यान्यपि असंस्कृता
नि देवाय न प्रदद्युः कलेप्सवः काम्ये कर्मणि सर्वत्र
बुधः संकल्पमाचरेत् विधिवाक्यानुसारेण संपूर्णं
सुकृतामये संस्कृताभ्यर्चितं द्रव्यं नामोच्चारणपूर्वकं
संप्रदानाभिधां चोक्त्वा दत्वा सम्यक् फलं लभेत् ज
लाशयगृहारामसेतुसंक्रमणादिनो कथ्यंते प्रो
त्सणे मंत्राः प्रयोज्या ब्रह्मविद्यया जीवनाधारजीवा
नां जीवनप्रदवारिणा प्रोक्षणेन वरुणं तु जलम्

चरावेचराः तृणकाष्ठादिसंभूतवासेयवल्लणः प्रिय।
तंप्रोक्षयामितोयेनप्रीतयेभवसर्वदा इष्टकादिसमु
द्भूतंवत्कव्यतिष्टकामये फलैःपत्रैश्चशाखाद्यैःम्ला
याभिश्चप्रियंकरः यच्छंतुमेविलासकामानप्रोक्षि
तास्तीर्थवारिभिः सेतुत्वंभवसिंधूनांपावनःपथिक
प्रियः मयासंप्रोक्षितःसेतोयथोक्तफलदोभव से
क्रमत्वाप्रोक्षयामिलोकानांसंक्रमंयथा दृढासीदृत
थास्वर्गेसंक्रमोमेप्रदीयतां आरामप्रोक्षणमंत्रोय
पषकथितःप्रिये मयवशाविसंस्कारेप्रयोक्तव्योम
नीषिभिः प्राणोवाहणंचास्त्रबीजत्रितयंविके
सर्वसाधारणद्रवाप्रोक्षणेविनियोजयेत् स्नापनार्हं
वाहनंचेत्स्नापयेद्बलविद्यया अन्यत्रैवार्च्यतोयेन
कुशाग्रेणविशोधयेत् प्राणप्रतिष्ठामाचार्यस्तत्तद्वा
हनसंज्ञया पूजितोलंकृतोवाहोदेयोभवतिदेवते
जलाशयेपूजनीयोवरुणोयादसांपतिः गृहेप्रजाप
तिर्ब्रह्माक्लृप्तेसेतोचसंक्रमे पूज्योविलज्जेगत्पातास।
र्वात्मासर्वेश्वरःप्रभुः देव्युवाच विविधानिविधानानि
कथितान्युक्तकर्मसु क्रमोनदर्शितोयेनमानवःक
र्मसाधयेत् क्रमव्यतीतकर्माणिबहुधायासकृतान्य।
पि नयच्छंतिफलंसम्यकत्वणांकल्याणजीविता

म॰ति॰
तं
८०
९०

म् यज्ञकं परमेशानि मातेव हितकारिणि निश्रेयसं
नलोकानां फलव्याहृतचेतसां एतेषामनुक्तकृत्या
नामनुष्ठानं पृथक् पृथक् वास्तुयागक्रमादेविक
थयाम्यवधीयतां पूर्वेह्नि नियताहारः श्वः प्रातः स्ना
नमाचरेत् कृत्वा पूर्वाह्निकं कर्म गृहं नारायणं यजे
त् ततः स्वकाममुद्दिश्य विधिदर्शितवर्त्मना कृत
संकल्पको मंत्री गणेशादीन्समर्चयेत् बंधूकाभं त्रि
नेत्रं द्विरदवरमुखं नागयज्ञोपवीतं शंखं चक्रं कृ
पाणं विमलसरसिजे हृत्पद्मे दधानं उद्यद्बालेन्दु
मौलिं दिनकरकिरणोहीमवस्त्राङ्गशोभं नानाले
कारयुक्तं भजत गणपतिं रक्तपद्मोपविष्टं एवं ध्या
त्वा यथाशक्त्या पूजयित्वा गणेश्वरं ब्रह्माणं च ततो
वाणीं विष्णुं लक्ष्मीं समर्चयेत् शिवं दुर्गां ग्रहांश्चापि
तथा षोडश मातृकाः घृतधारास्वपि वसून् निष्ठाकु
र्यात्पितृक्रियां ततः प्रोक्तविधानेन मण्डलं वास्तुर
त्नसः निर्माय पूजयेत्तत्र वास्तुदेवं गणैः सह ततस्त
स्थण्डिलं कृत्वा वह्निं संस्कृत्य पूर्ववत् धाराहोमान्समा
चर्य वास्तुहोमं समारभेत् यथाशास्त्रं ऋतीलस्मै परि
वारगणाय च तथा पूजितदेवेभ्यो दत्वा कर्म समाप
येत् वास्तुयागे पृथक्कार्ये एष ते कथितः क्रमः

अनेनैव ग्रहाणां च यज्ञोपि विहितः प्रिये ग्रहाणाम
भ्यर्च्चनाद्यागं तेन प्रपूजनं संकल्पानंतरं कार्य्यं वास्तु
र्चनमिति क्रमः गणेशाद्यर्चनं सर्व्वं वास्तुयागविधान
वत् ग्रहाणां यंत्रमंत्रौ च ध्यानं प्रागेव कीर्त्तितं प्रसंगात्क
थितो भद्रे ग्रहं वास्तुकृतक्रमं अथ प्रस्तुतमाख्यातास्तु
च्यते रूपसंस्क्रिया संकल्पं विधिवत्कृत्वा वास्तुपूज
नमाचरेत् माण्डले कलशे वापि शालग्रामे यथामति
ततः पूज्यो गणपतिर्ब्रह्मा वाणी हरी रमा शिवो दुर्गा
ग्रहाश्चापि पूज्या दिक्पतयस्तथा मातरो वसवोष्टौ
च ततः कार्य्या पितृक्रिया प्राधान्येन वरुणस्यात्र सरि
पूज्यो विशेषतः नानोपहारैर्व्वरुणमर्च्चयित्वा स्वशक्ति
तः विधिवत्संस्कृते वह्नौ वारुणं होममाचरेत् पूजि
तेभ्यश्च देवेभ्यो दत्वा प्रत्येकमाहुतिं पूर्णाहुत्यंतकं
स्येन होमकर्म समापयेत् ततो ध्वजपताकास्त्रगंधसिं
दूरचर्चितं उक्तप्रोक्षणमंत्रेण प्रोक्षयेद्रूपमुत्तमं
ततः स्वकाममुद्दिश्य देवमुद्दिश्य वा नरः सर्वभूत
प्रीणनार्थायोत्सृजेद्रूपजलाशयं कृतांजलिपुटो भू
त्वा प्रार्थयेत्साधकाग्रणीः सुप्रीयन्तां सर्वभूतान
भोभूतोयवासिनः उत्सृष्टं सर्वभूतेभ्यो मयैतज्जल
मुत्तमं तर्प्यंतु सर्वभूतानि स्नानपानावगाहनैः

म॰ति॰ सामान्यं सर्वजीवेभ्यो मया दत्तमिदं जलं येच केचिद्धि
ते पश्यंते स्वस्वकर्मविपाकतः तत्पापैर्न प्रलिप्येहं सफ
९१ लास्तु मम क्रियाः ततस्तु दक्षिणां कृत्वा कृतशान्त्या
९१ दिकक्रियः ब्राह्मणान् भोजयेत्कौलान् दीनानपि
बुभुक्षितान् जलाशयप्रतिष्ठास्तु सर्वत्रैव क्रमः शि
वे तडागादौ च कर्तव्या नागस्तम्भजले चराः मीन
मण्डूकमकरकूर्माश्च जलजन्तवः कार्याथात्र
मघाश्चैते कर्तुं विज्ञानुसारतः मत्स्यो स्वर्णमयो कु
र्यात् मण्डूकावपि हैमजौ राजतौ मकरौ कूर्मं मि
श्रुनं ताम्रं वितिकं एतैर्जलचरैः सार्धं तडागमपि
दीर्घिकाम् सागरं च समुत्तस्त्वप्रार्थ्य च नागमर्चये
त् अनन्तो वासुकिः पद्मो महापद्मश्च तक्षकः कुली
रः कर्कटः शंखः पाथसोरलकाविमे इत्यष्टौ नागना
मानि लिखित्वा अश्वत्थपल्लवे स्पृष्ट्वा प्रणवमायश्चो
वटमध्ये विनिःक्षिपेत् चेड्ढाकौ साक्षिणि कृत्वा वि
लोड्यैकं समुद्धरेत् तद्योनिष्ठतियो नागस्ते कुर्यान्तोय
रक्षकं स्तम्भमेकं समानीय विंशद्धस्तमितं शुभं सर
लं दारुजं तैलेकलितं च हरिद्रया स्नापयेत्तीर्थतोयेन
व्याहृत्या प्रणवेन च तत्र ह्रीं श्रीं नमःशान्तिसहितं ना
गमर्चयेत् नागत्वं विश्वशाय्यासि महादेवविभूषण

त्वम्मेतमधिष्ठायजलरक्षांकुरुष्वमे इतिप्रार्थ्यतः
तोनागंतम्मंमध्येजलाशये समारोप्यतडागंचकर्त्ताकु
र्य्यात्प्रदक्षिणं यूपश्चेत्स्थापितःपूर्वंतदानागंचदेर्द्वय
न् तज्जलेतत्रनिक्षिप्यशिष्टंकर्मसमापयेत् एवंगृह
प्रतिष्ठायांकृतसंकल्पकोबुधः वास्त्वादिवत्सपूजा
नेपित्र्यंकर्मचकूपवत् विधायात्रविशेषेणयजेद्दे
वंप्रजापतिं प्राजापत्यंचरुंहवनंकुर्य्यात्साधकसत्तम
गृहंपूर्वोक्तमंत्रेणप्रोक्ष्यगंधादिनार्चयेत् ईशानाभि
मुखोभूत्वाप्रार्थयेद्विहितांजलिः प्रजापतिपतेगेह
पुष्पमाल्यादिभूषित अस्माकंशुभवासायसर्व
थास्तुवरदोभव ततस्तुदक्षिणांकृत्वाशान्त्याशीर्वा
दमाचरेत् विप्रान्कुलीनान्दीनांश्चभोजयेदात्म
शक्तितः अन्यार्थेतुप्रतिष्ठाचेत्तत्तन्मंत्रंप्रयोज
येत् देवताकृतगेहस्यविधानंपूर्णशैलजे इत्थंसं
स्कृत्यभवनंप्रोक्षयेत्पूर्वदितिःस्वनैः देवतासन्निधिं
गत्वाप्रार्थयेद्विहितांजलिः इतिष्टदेवदेवेशभक्ता
नांवांछितप्रद आगत्यजन्मसाफल्यंकुरुमेकरुणा
निधे इत्यभ्यर्थ्यगृहाभ्यर्णेदेवमानीयसाधकः उप
स्थाप्यगृहद्वारिपूरतोवाहनंन्यसेत् त्रिशूलमथ
वाचक्रंविन्यस्यभवनोपरि रोपयेन्मंदिरेशानेसप

म.ति. ताकेधजैस्तथीः चंद्रातपैः किंकिणीभिः पुष्पा।
ते स्तवकचूतपल्लवैः शोभयित्वामठं सम्यक् छा
९२ दयेद्दिव्यवाससा। उत्तराभिमुखं देवं वरुणविधा वि
ततः स्नापयेद्विहिते ईदृशेस्तत्क्रमंवक्ष्यतेम्एए
ऐंह्रींश्रीमितिमंत्रांतेमूलमंत्रंसमुच्चरन् दुग्धेन
स्नापयामित्वांमातेवपरिपालय प्रोक्तबीजत्रय।
स्यांतेतथामूलं नियोजयन् दध्नात्वांस्नापयाम्य
यभवतापहारोभव ततबीजत्रयंमूलंसर्वानंद
करेतिच मधुनास्नापितःप्रीतोमामानंदमयंकुरु
शर्करेमूलंसमुच्चार्यसावित्रीप्रणवंस्मरन् देव।
प्रियेणहविषाज्याद्युःशुक्रेणतेजसा स्नानंतेक
ल्पयामीशमामरोगंसदाकुरु तद्वन्मूलंचगाय
त्रीव्याहृतिंसमुदीरयन् देवेशशर्करातोयैःस्ना
तोमेयच्छवांछितं तथामूलंसमुच्चार्यगायत्री
वारुणमंत्रं विधाद्यानिर्मितैर्दिव्यैःप्रियैःस्निग्धैर
लौकिकैः नारिकेलोदकैःस्नानंकल्पयामिन
मोस्तुते गायत्र्यामूलमंत्रेणस्नापयेद्दिव्जैरसैः
कामबीजंतथातारंसावित्रीमूलमीरयन् कर्पू
रागुरुकाश्मीरकस्तूरीचंदनोदकैः सुस्नातोभ
वसुप्रीतोभुक्तिमुक्तीप्रयच्छमे इत्यष्टकलशैः

स्नानंकारयित्वाजगत्पतिं गृह्याभ्यंतरमानीय।
स्थापयेदासनोपरि स्नापनार्हंतचेदर्चातयंत्रेवा
पितन्मतौ शालग्रामशिलायांवास्नापयित्वाप्रपू
जयेत् अशक्तौमूलमंत्रेण स्नापयेत्कुह्यपाद्यसा अ
ष्टभिःकलशैर्यद्वापंचभिःसप्तभिर्यथा घटप्रमा।
णंप्रागेवकथितंचक्रपूजने सर्वत्रागमकृत्येषुस
एवविहितोघटः ततोयजेन्महादेवंस्वस्वपूजाविधा
नतः तत्रोपचारान्वक्ष्यामिस्पष्टदेविपरात्परे आ
सनंस्वागतंपाद्यमर्घ्यमाचमनीकरं मधुपर्कस्ना
नाचामंस्नानीयंवस्त्रभूषणे गंधपुष्पेधूपदीपौनै
वेद्यंवंदनंतथा देवार्चनास्वितिदिष्टाउपचारास्त्रषोड
श पाद्यमर्घ्यंचाचमनंमधुपर्काचमौतथा गंधादिपं
चकंचैतेउपचारादशस्मृताः गंधपुष्पेधूपदीपौनै
वेद्यंचापिकालिके पंचोपचाराःकथितादेवतायाः
प्रपूजने अर्हणाद्यमिमाद्रव्यंप्रोक्षयेत्प्रदर्शय
त् संपूज्यगंधपुष्पाभ्यांद्रव्याख्यानंसमुल्लिखेत् व
क्ष्यमाणमंत्रेस्मृत्वामूलंचदेवताभिधां सचतुर्थीम
मुद्दार्यत्पामार्घ्यवचनंपठेत् निवेदनविधिःप्रोक्तो
देवेदेयेषुवस्तुषु अनेनविधिनाविद्वान्द्रव्यंदद्याद्दि
वौकसे आद्यार्चनविधौपूर्वंपाद्यार्घ्यादिनिवेदनं

म॰नि॰
तं
९३
93

अर्पणंकारणादीनांसर्वमेवप्रदर्शितं अथक्रमा।
मंत्रायेतत्रतानेवात्रस्थाणुप्रिये आसनाद्युपचा
राणांप्रदानेविनियोजयेत् सर्वभूतांतरस्थाय
सर्वभूतांतरात्मने कल्पयाम्युपवेशार्थमास
नंतेनमोनमः उक्तक्रमेणदेवेशिप्रदायासन
मुत्तमं कृतांजलिपुटोभूत्वास्वागतंप्रार्थयेत्तत
देवाःस्वाभीष्टसिद्ध्यर्थंयस्यवांछंतिदर्शनं सु
स्वागतंस्वागतंमेतस्मैतेपरमात्मने अद्यमेसफ
लंजन्मजीवनंसफलाःक्रियाः स्वागतेयत्त्वया
तन्मेतपसांफलमागतं देवमामेत्यसंप्रार्थ्यस्वा।
गतप्रश्नमम्बिके विहितेपाद्यमादायमंत्रमेतमु
दीरयेत् यत्पादजलसंस्पर्शाच्छुद्धिमापजगत्त्रयं
तस्याद्यात्मप्रीत्यर्थंपाद्यंतेकल्पयाम्यहं परमा
नंदसंदोहोजायतेयत्प्रसादतः तस्मैसर्वात्मभू
तायश्रानंदार्घ्यंसमर्पये जातीलवंगकक्कोलै
र्जलंकेवलमेववा प्रोक्षितार्चितमादायमंत्रेण
तेनचार्पयेत् यदुच्छिष्टमपस्पृष्टंशुद्धिमेत्यखि
लंजगत् तस्मैमुखारविंदायआचामंकल्पया।
मिते मधुपर्कंसमादायभक्त्यानेनसमर्पयेत्
तापत्रयविनाशार्थंनिर्वाणानंदहेतवे मधुप

ॐ ददाम्यर्घ्यं प्रसीद परमेश्वर अर्घ्यं विश्वचितामेति ।
यत्स्पृष्टस्पर्शमात्रतः अस्मिंल्लेवदत्तोभोजेऽवनराच
मनीयकं स्नानार्थं जलमादाय प्राग्वत्प्रोक्षितम
र्चितं निदाय देवभ्रतोमंत्रमेनमुदीरयेत् यन्तेज
सा जगदाधाम यतो जातमिदं जगत् तस्मै ते जगदाधा
र स्नानार्थं तोयमर्पये स्नाने वस्त्रे च नैवेद्यं दद्यादाच
मनीयकं अन्यद्रव्यप्रदानान्ते दद्याज्जोये सकृतसकृ
त् वस्त्रमानीय देवाग्रे शोधितं पूर्ववन्मना ध्यात्वाकरा
भ्यामुत्तोल्य पठेदेतं मंत्रं सुधीः सर्वावरहीनाय मा
यामच्छन्नतेजसे वाससी परिधानाय कल्पयामि
नमोस्तु ते नानाभरणमादाय स्वर्णरौप्यादिनिर्मितं
प्रोत्याचर्ययित्वा देवाय दद्यादेतं समुच्चरन् विश्वाभर
णभूताय विश्वशोभैकयोनये मायाविग्रहभूषार्थं
भूषणानि समर्पये गंधतन्मात्रयासृष्टायेनगंधेय
रायण तस्मै परात्मने तुभ्यं परमं गंधमर्पये पुष्पम
नोहरं रम्यं सुगंधं देवनिर्मितं मया निवेदितं तत्याउ
ष्पमेतत्प्रगृह्यतां वनस्पतिरसो दिव्यो गंधाढ्यः सुम
नोहरः आघ्रेयः सर्वभूतानां धूपो घ्राणपतेर्प्यते ।
स्वप्रकाशो महादीप्तः सर्वतस्तिमिरापहः सबाह्या
भ्यन्तरज्योतिर्दीपोयं प्रतिगृह्यतां नैवेद्यं स्वादुसं ।

म·ति·
ते
९४
94

युक्तंनानाभक्ष्यसमन्वितं निवेदयामिभक्त्येदं गृ
णपरमेश्वर पानार्थंसलिलंदेवकर्पूरादिसुवासि
तं सर्वतृप्तिकरंस्वच्छमर्पयामिनमोस्तुते ततःक
र्पूरखदिरलवंगैलादिभिर्युतं ताम्बूलंगृहराचामं
दत्वावंदनमाचरेत् उपचारार्थारदानेसाधारद्रव्य
मलिखेत् दद्याद्वाष्टधनाधारंतन्नामसमुच्चरन्
इत्यमर्चितदेवायदत्वापुष्पांजलित्रयं साष्टादनं
गृहंप्रोक्तपठेदेनंकृतांजलिः गेहत्वंसर्वलोका
नांपूज्यंपुण्ययशःप्रदः देवतास्थितिदानेनसुमे
हमद्यप्रोभव त्वंकैलासश्चवैकुण्ठस्त्वंब्रह्मभव
नंगृह यत्त्वयाविधृतोदेवस्तस्मात्वंसुरवंदितः
यस्यकुक्षौजगत्सर्वंवरीवर्ति चराचरं मायाविधृ
तदेहस्यतस्यमूर्तेर्विधारणात् देवमातृसमंत्वं
हिसर्वतीर्थमयस्तथा सर्वकामप्रदोभूत्वाशांतिं
मेकुरुतेनमः इत्यभ्यर्च्यविरभ्यर्च्यगृहेचक्रादिसं
युतं आत्मनःकामसंसिद्धिंप्रदद्याद्देवायसाधकः
विष्णवावासायवासायगृहंतेविनिवेदितं श्रीगृ
हमहेशानकृपयासन्निधीयतां इत्युक्त्वार्पितगेहा
यदेवायदत्तदक्षिणः पीठंवत्स्याद्दिद्योधेस्तस्याप
येहेदिकोपरि स्पृष्टादेवपदद्वंद्वंमूलमंत्रंसमुच्च

रत् स्थांस्थीस्थिरोभवेत्त्वंकावासंतेकल्पितोमया
इतिदेवंस्थिरीकृत्यभवनंप्रार्थयेत्ततः गृहदेवति
वास्तायसर्वंप्रीतिदोभव उत्स्थेत्वमिमेलोकाः
स्थिरासंतुनिरामयाः हिमसमातीतपुरुषान्हिम
मानागतानपि मांचमेपरिवारांश्चदेवयास्त्विति
वासय यजनात्सर्वयज्ञानांसर्वतीर्थनिषेवणात्
यत्फलंतत्फलंमेयजायतांत्वत्प्रसादतः यावद्वृक्षं
धरातिष्ठेत्यावदेतेधराधराः यावद्दिवानिशानाथौ
तावत्त्मेवर्ततांकुले इतिप्रार्थ्यगृहंप्राज्ञः पुनर्देवं
समर्चयेत्तदर्पणादीन्वस्त्रनिधजंचापिनिवेदये
त् ततस्तुवाहनंदद्याद्यस्मिन्देवेयथोदितं शिवाय
वृषभंदत्वाप्रार्थयेद्विहितांजलिः वृषभत्वंमहा
कायस्त्वीव्यात्मंगोविख्यातकः पृष्टेवहसिदेवेशंपू
ज्योसित्रिदशैरपि पुरेषुसर्वतीर्थानितिरोस्त्रिवेदाः
सनातनाः निगमागमतंत्राणिदर्शनान्येवसंतिते
त्वयिदत्तेमहाभागसुप्रीतःपार्वतीपतिः वासंददा
तुकैलासेत्वंमांपालयसर्वदा सिंहंदत्वामहादेव्यै
गरुडंविस्रवेतथा यथास्तुयान्महेशानितत्मेति
गदतःस्मृतौ सुरासुरनिग्रहेषुमहाबलपराक्रमः
देवानांजयदोभीमोदनुजानांविनाशकृत् सदा

म॰ नि॰ देवीप्रियोसित्वंब्रह्मन्विल्वशिवप्रियः देव्येस।
ते मर्पितोभक्त्याजह्निशत्रून्नमोस्तुते गहनस्थत्वत
९५ गश्रेष्ठश्रीपतिप्रीतिदायक वन्मचंचोतीस्त्वन
95 खतवपत्राहिरागमयाः नमस्तेस्तुखगेन्द्रायप
त्रिराजनमोस्तुते यथाकरपुटेनत्वंसंस्थितो।
विल्वसन्निधौ तथामामपिदर्पश्चेविल्वोदयेनिवा
सय त्वयिप्रीतेजगन्नाथप्रीतः सिद्धिंप्रयच्छति
देवायदत्तद्रव्याणांदयाद्देवायदक्षिणां तथाक
र्मफलंचापिभक्त्यातस्मैसमर्पयेत् न्तस्मैगीतेश्च
वादित्रैःसंमतःसहवांधवः वेषमप्रदक्षिणंकृ
त्वादेवंनत्वाप्रायेद्विजान् देवागारप्रतिष्ठायांयत्र
यःकथितःक्रमः आराममेतुसंक्रामप्रपाविता
मीरितोपिसः विशेषेनात्रकुम्भे३पूज्योविल्वःस
नातनः पूजाहोमोतथासर्वंगृहदानविधानव
त् अप्रतिष्ठितदेवायनैवदद्याद्गृहादिकं प्र
तिष्ठितेर्चितेदेवेपूजादानंविधीयते अथतत्रश्री
मदाद्याप्रतिष्ठाक्रमउच्यते येनप्रतिष्ठितादेवीन्नृ
णांयच्छतिवांछितं तद्दिनेसाधकःप्रातःस्नातःप्र
चिरदंसावः संकल्पंविधिवत्कृत्वायजेद्दास्त्वीप्र
रं ततः ग्रहदिक्पतिदेवांश्चार्चनंपितृकर्मच

विधाय स्नापकैर्विप्रैः प्रतिमासन्निधिं व्रजेत् प्रति
ष्ठितं गृहे यद्वा कुत्रचित् शोभनस्थले आनीयार्चा।
मर्चयित्वा स्नापयेत् स्नापको नमः भस्मना प्रथमं स्ना
नं ततो वल्मीकमृत्स्नया वराहदंतिदंतोत्थमृत्ति
काभिस्ततः परं वेश्याद्वारमृदा चापि प्रद्युम्नहृद
जातया ततः पंचकषायेण पंचपुष्पैस्त्रिपत्रकैः
कारयित्वा गंधतैलैः स्नापयेत् प्रतिमां सुधीः वाछ्रा
लबदरीजंबुबकुलाः शाल्मली तथा एते निगदि
ताः स्नाने कषाये पंचभूरुहाः करवीरं तथा जाती
चंपकं सरसीरुहम् पाटलीकुसुमं चापि पंच पु।
ष्पप्रकीर्तितं बर्बरा तुलसी बिल्वं पत्रत्रयमुदाहृतं
एतेषु प्रोक्तद्रव्येषु जलयोगो विधीयते पंचामृते गं
धतैले तोययोगं विवर्जयेत् सव्याहृतिं सप्रणवां
गायत्रीं मूलमन्त्रवत् एतद्द्रव्यस्पैतोयेन स्नापया
मि नमो वदेत् ततः प्रागुक्तविधिनाङ्गयाद्यैरष्टभि
र्घटैः कवोष्णसलिलैः स्नापि स्नापयेत्प्रतिमां बुधः
सितगोधूमचूर्णेन तिलकल्केन वापि वा शाली
तण्डुलचूर्णेन मार्जयित्वा विरूक्षयेत् तीर्थाम्भसा
मष्टघटैः स्नापयित्वा सुवाससा संमार्जितां ततः प्र
तिमां पूजास्थानं समानयेत् अग्राकोष्ठहृतो।

यानां पंचविंशतिसंख्यकैः कलशैः स्नापयेत् ।
र्द्धीमतया साधकसत्तमः स्नाने स्नाने महादेव्याः
शक्त्या पूजनमाचरेत् ततो निवेश्य प्रतिमामास
ने सुपरिष्कृते पाद्यार्घ्याद्यैरर्चयित्वा प्रार्थयेद्वि
हिताञ्जलिः नमस्ते प्रतिमे तुभ्यं विश्वकर्मवि ।
निर्मिते नमस्ते देवतावासे भक्ताभीष्टप्रदे नमः
त्वयि संपूजयाम्याद्यां परमेशीं परात्परां शिल्पदो
षावशिष्टांगे सम्पन्ने कुरु ते नमः ततस्तत् प्रतिमा
मूर्ध्नि पाणिं विन्यस्य वाग्यतः अष्टोत्तरशतं मूल ।
जप्त्वा गात्राणि संस्पृशेत् षडंगमातृकान्यासं प्र
तिमांगे प्रविन्यसेत् षड्दीर्घभाजा मूलेन षडं
गन्यासमाचरेत् तारमायारमाद्यैश्च नमोन्तैर्बि
न्दुसंयुतैः अष्टवर्गैर्देवतांगे वर्णन्यासं प्रकल्प
येत् मावि स्वरान् कवर्गं च कण्ठदेशे न्यसेद्बुधः
चवर्गं तु दरे दक्षबाहौ टाद्यक्षराणि च तवर्गं च
वामबाहौ दक्षवामोरुयुग्मयोः पवर्गं च यवर्गं
च शवर्गं मस्तके न्यसेत् वर्णन्यासं विधायेत्थं तत
स्न्यासं समाचरेत् पादयोः स्थापितत्त्वं तोयतत्त्वं
च लिंगके तेजस्तत्त्वं नाभिदेशे वायुतत्त्वं हृदम्बु
जे आस्यगं गगनतत्त्वं च चक्षुषो रूपतत्त्वकं घ्रा ।

णयोर्गंधतत्त्वंचशब्दतत्त्वंश्रुतिद्वये जिह्वायांरसत
त्त्वंचस्पर्शतत्त्वंचविन्यसेत् मनस्तत्त्वंभ्रुवोर्मध्येसह
स्रदलपंकजे शिवतत्त्वंज्ञानतत्त्वंपरतत्त्वंतथोरसि
जीवप्रकृतितत्त्वेचविन्यसेत्साधकाग्रणीः महत्तत्त्व
महंकारतत्त्वंसर्वांगकेक्रमात् तारमायारमाद्येन
ङे.नमोन्तेनविन्यसेत् सबिंदुमातृकावर्णैरुदितै
र्मूलमंत्रवत् नमोन्तेंमातृकास्थानेमंत्रन्यासंप्रयो
जयेत् सर्वयज्ञमयंतेजःसर्वभूतमयंवपुः इयंते
कल्पितामूर्तिरचलास्थापयाम्यहं ततःपूजावि
धानेनध्यानमावाहनादिकं प्राणप्रतिष्ठांसंपाद्य
पूजयेत्परदेवतां देवगेहप्रदानेतुयेयेमंत्राःसमी
रिताः तत्रैवात्रप्रयोक्तव्यामंत्रलिंगेनपूजने विधि
वत्संस्कृतेवह्नावर्चितेयोर्चिताहुतिः आवाह्यदे
वींसंपूज्यजातकर्माणिसाधयेत् जातनाम्नोतिष्क्र
मणमन्नप्राशनमेवच चूडोपनयनंचैतेषट्संस्का
राःशिवोदिताः प्रणवंव्याहृतिंचैवगायत्रींमूल।
मंत्रकं सामंत्रणाभिधानेतेजातकर्मादिनामच
संपादयाम्यग्निकांतांसम्यक्चार्ध्यविधानवित् पंच
पंचाहुतीर्दद्यात्प्रतिसंस्कारकर्मणि दत्तनाम्ना
हुतिपानेमूलोच्चारणपूर्वकं देव्यैदत्ताहुतेरंश

म॰नि॰
त
९७
97

प्रतिमामृद्भिनिःक्षिपेत् प्रायश्चित्तादिभिःशेषंक
र्मसंपादयन्सुधीः भोजयेत्साधकान्विप्रान्दीना
नाथांश्चतोषयेत् उक्तकर्मस्वशक्तश्चेत्पाथसांसम
मिश्रितैः स्नापयित्वार्चयन्नाम्नाश्रावयेन्नामदेवता
इतितेश्रीमदाद्यायाःप्रतिष्ठाकथिताप्रिये एवंदु
र्गादिविद्यानांमहेशादिदिवौकसां चलतःशिवलिं
गस्यप्रतिष्ठायामयंविधिः प्रयोक्तव्योविधानज्ञैःसं
त्रेहोमपूर्वकम् ॥ इतिश्रीमहानिर्वाणतंत्रेसर्वतं
त्रोत्तमोत्तमेसर्वधर्मनिर्णयसारेश्रीमदाद्यासदा।
शिवसंवादेआद्याकालीप्रतिष्ठानुष्ठानेवास्तुगृह
यागजलाशयादिप्रतिष्ठादेवटहृदानादिसर्वदेव
प्रतिष्ठाकथनंनामत्रयोदशोल्लासः श्रीदेव्युवाच
आद्यशक्तेरनुष्ठानं कृपयाभूरिसाधनं कथितं
मेकृपानाथत्वमास्मितवभावतः सचलस्यचलिं
गस्यप्रतिष्ठाविधिरीरितः अचलस्यप्रतिष्ठायांकिं
फलंविधिर्वकः कथ्यतांजगतांनाथसविशेष
णंसाम्प्रतं इदंहिपरमंतत्त्वंश्रुण्वदहणोमिकं त्व
नःकोवास्तिसर्वज्ञोदयालुःसर्वविद्धितः आशु
तोषोदीननाथोममानंदविवर्द्धनः श्रीसदाशिव
उवाच शिवलिंगस्थापनस्यमाहात्म्यंकिंब्रवी।

मिते यत्स्थापनान्महापापैर्विमुक्तोयातिपरंपदम् स्व
र्णश्रृंगमहीदानाद्वाजिमेधायुतार्जनात् त्रिलोकीयेनो
पकरणान्दीनानांपरितोषणात् यत्फलंलभतेमा
र्त्यस्तस्मात्कोटिगुणंफलं शिवलिंगप्रतिष्ठायांल
भतेनात्रसंशयः लिंगरूपीमहादेवोयत्रतिष्ठतिका
लिके तत्रब्रह्माचविष्णुश्चसेंद्रास्तिष्ठंतिदेवताः सा
र्द्धत्रिकोटितीर्थानिहृष्टाहृष्टानियानिच पुण्यक्षेत्रा
णिसर्वाणिवर्त्तंतेशिवसन्निधौ लिंगरूपधरंशंभुंप्र
तिष्ठितंदिविदिक्षुच शतहस्तप्रमाणेनशिवक्षेत्रंप्र
कीर्त्तितं ईशक्षेत्रंमहापुण्यंसर्वतीर्थोत्तमोत्तमं या
त्रामराविराजंतेसर्वतीर्थानिसर्वदा क्षणमात्रंशिव
क्षेत्रेयोवसेद्भावतत्परः ससर्वपापनिर्मुक्तोयात्यंते
शंकरालयं अत्रयत्क्रियतेकर्मस्वल्पंवाबहुलंत
था प्रभावाद्रुद्रदेवस्यतत्तत्कोटिगुणंभवेत् यत्र
तत्रकृतात्पापान्मुच्यतेशिवसन्निधौ शिवक्षेत्रेकृ
तंपापंवज्रलेपसमंप्रिये पुरश्चर्याजपंदानंश्राद्धं
तर्पणमेवच यत्करोतिशिवक्षेत्रेतदनंतायकल्प
ते पुरश्चर्याशतंकृत्वाय हृणशशिदिनेशयोः य
त्फलंतदवाप्नोतिसकृज्जप्त्वाशिवांतिके गयायां
गयाप्रयागेषुकोटिपिण्डप्रदानतः अतिपातकिनो

म. ति. ते ९८ 98

येचमहापातकिनस्तथे शैवतीर्थेकृतस्नानास्तेपि
यांतिपरांगतिं लिंगरूपीजगन्नाथोदेव्याश्रीदुर्गया
सह यत्रास्तितत्रतिष्ठंतिभुवनानिचतुर्दश स्यापि
तेशस्यमाहात्म्यंकिंचिदेतत्प्रकाशितं अनादिभूत
भूतेशमहिमावागगोचरः महापीठेतवार्णायामा
स्पृश्यस्पर्शोहृषाणां विद्यतेसुव्रतेनैतल्लिंगरूपधरेह
रे यथावकार्शनेदेविकोपिदोषोनविद्यते शिवक्षे
त्रेमहातीर्थेतथाजानीहिकालिके बहुनात्रकिमुक्ते
नतवाग्रेसमुच्यते प्रभावःशिवलिंगस्यमयाव
क्तुंनशक्यते अयुक्तवेदिकंलिंगंयुक्तवेदिकयापि
वा साधकःपूजयेन्नत्वास्वाभीष्टफलसिद्धये प्र
तिष्ठापूर्वंसायाह्नेदेवतायोधिवासयेत् सोप्यमेधा
युतफलंलभतेसाधकोत्तमः महीगंधःशिलाधा
न्यंदूर्वापुष्पफलंदधिः घृतंस्वस्तिकसिंदूरंशंख
कज्जलरोचनाः सिद्धार्थकांचनंरौप्यंताम्रंदीपश्च
दर्पणं अधिवासविधौविंशद्रव्याण्येतानियोज
येत् प्रत्येकंद्रव्यमादायमायथात्रास्तिविद्यया अने
नामृष्यपदतःशुभमस्त्वधिवासनं इतिस्पृशेत्मा
ध्यमालेमयाद्यैःसर्ववस्तुभिः ततःप्रशस्तिपात्रेण
त्रियेवमाधिवासयेत् अनेनविधिनादेवमधिवा

स्यविधानवित् गरुडदानविधानेनद्रव्याद्यैः स्नापये
त्ततः संमार्ज्य वाससा लिंगं स्थापयित्वासनोपरि पूजा
नुष्ठानविधिना गणेशादीन्समर्चयेत् प्रणवेन कर
न्यासं प्राणायामं विधाय च ध्यायेत्सदाशिवं शांतं
चंद्रकोटिसमप्रभं व्याघ्रचर्मपरीधानं नागयज्ञो
पवीतिनं विभूतिलिप्तसर्वांगं नागालंकारभूषितं
धूम्रपीतारुणश्वेतरक्तैः पंचभिराननैः युक्तं त्रिन
यनं बिभ्रज्जटाजूटधरं विभुं गंगाधरं दशभुजं श
शिशोभितमस्तकं कपालं पावकं पाशं पिनाकं
परशुं करैः वामैर्दधानं दक्षैश्च शूलं वज्रांकुशं शरं
वरं च बिभ्रतं सर्वैर्देवैर्मुनिवरैः स्तुतं परमानंदसं
दोहोल्लसत्कुटिललोचनं हिमकुंदेंदुसंकाशं वृषा
सनविराजितं परितः सिद्धगंधर्वैरप्सरोभिरहर्नि
न शं गीयमानमुमाकांतमेकांतशरणप्रियं इति ध्या
त्वा महेशानं मानसैरुपचारकैः संपूज्य वाह्यतल्लिं
गे यजेच्च लक्षाविधानवित् आसनाद्युपचाराणां दा
ने मंत्राः प्रोदिताः मूलमंत्रमतो वक्ष्ये महेशस्य महा
त्मनः मायातारः शक्तिबीजं संध्यंतीतात्परं वितं अ
त्रैरुद्रविंदुभूषाढ्यं शिवबीजं प्रकीर्तितं हृगंधिपृष्ठ

म॰ ति॰ तं

५५

११

ल

मालेनवाससाछाद्य शंकरं निवेश्य दिव्यशय्यायां
वेदीमेवं विशोधयेत् वेद्यां प्रपूजयेद्देवीमेवमेवविधा
ततः माधपात्रकरन्यासौ प्राणायामसमाचरेत् उद्य
द्भानुसहस्रकांतिममलां वह्न्यर्कचंद्रेक्षणां मुक्ता
यंत्रितहेमकुण्डलसत्स्मेराननांभोरुहाम् हस्ताब्जै
रभयंवरंचदधतीं चक्रं तथाब्जं दधत् पीनोत्तुंगपयो
धरांभयहरांपीतांबरांचिंतये इति ध्यात्वा महादेवीं
प्रपूजयेन्निजशक्तितः ततस्तु दशदिक्पालान्प्र
थमंचसमर्चयेत् भगवत्याः मन्त्रं वक्ष्ये येनाराध्या
जगन्मयी मायालक्ष्मीसमुच्चार्य सालंषट्स्व मि+
रान्वितं बिंदुयुक्तं तदंते च योजयेद्वह्निवल्लभां ॥
पूर्ववत्स्थापयन्देवीं सर्वदेवबलिं हरेत् दधियुक्तं
माषभक्तं शर्करादिसमन्वितं येणान्यां बलिमा
दाय वारुणेन विशोधयेत् संपूज्य गंधपुष्पाभ्यां
मंत्रेणानेन चार्पयेत् सर्वदेवाः सिद्धगणगंधर्वो
रगराक्षसाः पिशाचामातरोयक्षाभूतानाश्चपितर
स्तथा ऋषयोयेन्यदेवाश्चबलिंगृह्णंतुसंयताः
परिवार्यमहादेवंतिष्ठंतुगिरिजामपि ततोजपे
न्महादेव्यामंत्रमेतंयथेप्सितं गीतवाद्यादिभिः

सद्भिर्विदध्यान्मंगलक्रियां अधिवासं विधायेध
ध्येपरेह्नि विहितक्रियः संकल्पं विधिवत्कृत्वा पंच
देवान्प्रपूजयेत् मातृपूजां वसोर्धारां वृद्धिश्राद्धं
समाचरेत् महेशद्वारपालांश्च यजेत्भक्त्यासमा
हितः नंदीमहाबलः कीशवदनो गणनायकः ।
द्वारपालाः शिवस्यैते सर्वे शस्त्रास्त्रपाणयः ततो
लिंगं समानीय वेदीरूपां चतुरस्रिणी मण्डले सर्व
तोभद्रे स्थापयित्वा शुभासने अष्टाभिः कलशैः शु
भैर्मन्त्रेणा त्र्यम्बकेण च स्नापयित्वार्चयेत्भक्त्या षो
डशैरुपचारकैः वेदीं च मूलमंत्रेण तद्वत्संस्थाप्य
पूजयेत् कृतांजलिपुटः साधुः प्रार्थयेत् शंकरं शि
वं आगच्छ भगवन् शंभो सर्वदेवनमस्कृत पिना
कपाणे सर्वेश महादेव नमोस्तु ते आगच्छ नंदि
देवभक्तानुग्रहकारक भगवत्या सहागच्छ कृपां
कुरु नमो नमः मातर्देवि महामाये सर्वकल्याण
कारिणि प्रसीद शंभुना सार्द्धं नमस्ते हरप्रिये
आधाहि वरदे देवि भवनेस्मिन् वरप्रदे प्रीता भव
महेशानि सर्वसंपत्करी भव उत्तिष्ठ देवदेवेशि स्वैः
स्वैः परिकरैः सह स्थावं निवसतां गेहे प्रीयेतां भक्त
वत्सलौ इति प्रार्थ्य शिवं देवीं मंगलध्वनिपूर्वकं

म॰ नि॰
त॰
१००
100

प्रदक्षिणं त्रिधा वेश्म कारयित्वा प्रवेशयेत् पाषा
णवनिते गर्ते इष्टकारचिते पि वा अथ त्रिभागलिं
गस्यारोपयेन्मूलमुच्चरन् यावच्चंद्रश्च सूर्यश्च या
वत्पृथ्वी च सागराः तावदत्र महादेव स्थिरो भ
व नमोऽस्तु ते मंत्रेणानेन सुदृढं कारयित्वा सदा
शिवं उत्तराया तत्र वेदीमूलेनैव प्रवेशयेत् स्थि
रो भव जगन्नाथ विश्वसृष्टिस्थित्यंतकारिणि यावद्दि
वानिशानाथौ तावदत्र स्थिरो भव अनेन सुदृ।
ढीकृत्य लिंगं संस्थापयेदिमे आगच्छंतु पिशा
चाश्च गंधर्वाः सिद्धचारणाः यक्षा नागाश्च वेता।
लाः लोकपाला महर्षयः मातरो गणनाथाश्च
विघ्नेशा बृहस्पतिः यस्य सिंहासने शुक्राश्च।
वराः खेचरालया आवाहयामि तं देवमुत्तमीशा
नमव्ययं आगच्छ भगवन्नत्र ब्रजितिर्मितयंत्रके
भुवाय भव सर्वेषां शुभाय च वरदाय च ततो देव।
प्रतिष्ठोक्तविधिना स्नापयन् शिवं आवाह्यात्मा
मानसोपचारैः संपूजयेत्स्त्रिये विशेषमर्च्चीं संस्था
प्य समर्च्यगणदेवतां पुनर्ध्यात्वा महेशानं पुष्पं लिं
गोपरि न्यसेत् पाशांकुशपुटाशक्तियोदिमांताः।
सबिंदुकाः ह्रींहंस इति मंत्रेण तत्र प्राणान्निवे

शयेत् चंदनागुरुकाश्मीरैर्विलिप्य गिरिजाप
तिं यजेत्शास्त्रोक्तविधिना षोडशैरुपचारकैः
जातनामादिसंस्कारान्कृत्वा पूर्वविधानवत् ॥
समाप्य सर्वं विधिवत् वेद्यां देवीं महेश्वरीम् अभ्य
र्च्य तत्र देवस्य मूर्तीरष्टौ प्रपूजयेत् शर्वः क्षितिः स
मुद्दिष्टो भवो जलमुदाहृता रुद्रोऽग्निरुग्रो वायुः
स्यात् भीम आकाशसंस्थितः पशोः पतिर्यजमा
नो महादेवः सुधाकरः ईशानः सूर्य इत्येते मूर्त
यो ऽष्टौ प्रकीर्तिताः प्रणवादिनमोन्तेन प्रत्येका
ह्वानपूर्वकं पूर्वादीशानपर्यन्तमष्टमूर्तीः क्र
माद्यजेत् इंद्रादिदिक्पतीन् विष्णुब्रह्मस्याद्याश्चा
ष्टमातृकाः हृदयं वितानेगेहादिदद्यादीशाय सा
धकः ततः कृतांजलिर्भक्त्या प्रार्थयेत्पार्वतीपतिं
गृहेस्मिन्करुणासिंधो स्थापितोसि मया प्रभो प्र
सीद भगवन् शंभो सर्वकारणकारण यावत्ससा
गरा पृथ्वी यावत् शशिदिवाकरौ तावदस्मिन्गृहे
तिष्ठन्नमस्ते परमेश्वर गृहेस्मिन्यस्य कस्यापि जी
वस्य मरणं भवेत् ततस्त्वा पैः प्रलिप्येहं प्रसादात्त
व धूर्जटे ततः प्रदक्षिणीकृत्य नमस्कृत्य गृहं व्र
जेत् प्रभाते पुनरागत्य स्नापयेच्चंद्रशेखरं श्र

ह्नैः पंचामृतैः स्नानं प्रथमं प्रतिपादयेत् ततः सु
गंधितोयानां कलशैः शतसंख्यकैः संपूज्यते यथा
शक्त्या प्रार्थयेत् भक्तिभावतः विधिहीनं क्रियाही
नं भक्तिहीनं यदर्चितं संपूर्णमस्तु तत्सर्वं त्वत्प्रसा
दादुमापते यावच्चंद्रश्च सूर्यश्च यावत्पृथ्वी च सा
गराः तावन्मे कीर्तिरतुला लोके तिष्ठतु सर्वदा न
मस्त्र्यम्बकाय रुद्राय पिनाकवरधारिणे विल्वपत्रे
इत्यर्घ्यायैरर्चिताय नमो नमः ततस्तु दक्षिणां द
त्वा भोजयेत्कौलिकान् द्विजान् भक्ष्यैः पेयैश्च वा
सोभिर्दरिद्रान्परितोषयेत् प्रत्यहं पूजयेद्देवं यथा
विभवमात्मनः स्थावरं शिवलिंगं तु न कदापि वि
चालयेत् अचलस्यैव लिंगस्य प्रतिष्ठा कथिता ति
ते संक्षेपात्परमेशानि सर्वागमसमुद्धृता श्रीदेव्यु
वाच ॥ यदा कस्माद्देवतानां पूजाबाधो भवेद्धि भो
विधेयं तत्र किं भक्तैस्तन्मे कथय तत्त्वतः अपूज
नीया के दोषे भवेयुर्देवमूर्तयः सज्ज्यावाके न दो
षेण तदुपायश्च भण्यतां श्रीसदाशिव उवाच ॥
एकाहमर्चनाबाधे द्विगुणं देवमर्चयेत् दिनद्वये
न द्विगुणं तद्द्विगुणं दिनत्रये ततः षण्मासपा
र्यंतं यदि पूजा न संभवेत् तदाष्टकलशैर्देवं।

स्नापयित्वा यजेत् सुधीः षण्मासात्परतो देवं प्रा
क्संस्कारविधानतः पुनः संस्कृतं कृत्वा पूज
येत्साधकाग्रणीः खण्डितं स्फुटितं भग्नं देवं तो
ये विसर्जयेत् पतितं दुष्टदुर्म्यादौ न देवं पूजयेत्
बुधः हीनांगं स्फुटितं भग्नं देवं तोये विसर्जयेत्
स्पर्शादिदोषदुष्टं तु संस्कृत्य पुनरर्चयेत् महापी
ठेनादिलिंगे सर्वदोषविवर्जिते सर्वदा पूजयेन्न
त्वेवं स्वमिष्टं स्वात्मनये यद्यत्तु सृष्टं महामायेन्द्र।
णां कर्मानुजीविनां निःश्रेयसाय तत् सर्वं सवि
शेषं प्रकीर्तितं विना कर्म न तिष्ठन्ति क्षणार्द्धमपि
देहिनः अनिच्छन्तोपि विवशाः कृष्यन्ते कर्मवायु
ना कर्मणा सुखमश्नन्ति दुःखमश्नन्ति कर्मणा जा
यन्ते च प्रलीयन्ते वर्तन्ते कर्मणो वशात् अतो बहु
विधं कर्म कथितं साधनान्वितं प्रवर्तयेत्स्वबोधा।
तो दुष्टेप्सितनिवृत्तये यतो हि कर्म द्विविधं शुभं चा
शुभमेव च अशुभात्कर्मणो याति प्राणिनस्तीव्र।
यातनां कर्मणोपि शुभाद्दे विफले षासक्तचेतसः
प्रयान्त्यायान्त्यमुत्रेह कर्मश्रृंखलयन्त्रिताः यावा।
न्नलीयते कर्म शुभं वाशुभमेव वा तावन्न जायते मो
क्षो नृणां कल्पशतैरपि यथा लोहमयैः पाशैः पा।

म॰नि॰
त
१०२
102

शैः स्वर्णमयैरपि तथाबद्धोभवेज्जीवः कर्मभि
श्चाशुभैः शुभैः कुर्वाणः सततंकर्मकृत्वाकष्ट
शतान्यपि तावन्नलभतेमोक्षंयावज्ज्ञानंनवि
न्दति ज्ञानंतत्वविचारेणनिष्कामेणापिकर्म
णा जायतेक्षीणतमसांविदुषांनिर्मलात्मनां
ब्रह्मादितृणपर्य्यन्तंमाययाकल्पितंजगत्
सत्यमेकंपरंब्रह्मविदित्वैवंसुखीभवेत् विहाय
नामरूपाणिनित्येब्रह्मणिनिश्चले परिनिश्चि
ततत्वोयःस मुक्तःकर्मबंधनात् नमुक्तिर्जप
नाद्धोमादुपवासशतैरपि ब्रह्मैवाहमितिज्ञा
त्वामुक्तोभवतिदेहभृत् आत्मासाक्षीविभुःपू
र्णःसत्योद्वैतःपरात्परः देहस्थोऽपिनदेहस्थो
ज्ञात्वैवंमुक्तिभाग्भवेत् बालक्रीडनवत्सर्वं
रूपनामादिकल्पनं विहायब्रह्मनिष्ठोयःसमु
क्तोनात्रसंशयः मनसाकल्पितामूर्त्तिर्नृणांचे
न्मोक्षसाधनी स्वप्नरूपेनराज्येनराजानोमान।
वास्तदा मृच्छिलाधातुदार्वादिमूर्तावीश्वरबुद्ध
यः क्लिश्यन्तस्तपसाज्ञानंविनामोक्षंनयान्तिते
आहारसंयमक्लिष्टायथेष्टाहारतुण्डिलाः ब्रह्म
ज्ञानविहीनाश्चेन्निष्कृतिंतेव्रजंतिकिं वायुपर्णा।

करुणातोयव्रतिनोमोक्षभागिनः संतिचेत्तत्र
मात्स्यकाः पशुपक्षिजलेचराः उत्तमोब्रह्मसद्भा
वोध्यानभावस्तुमध्यमः स्तुतिर्जपोधमोभावोब
हिः पूजाधमाधमा योगोजीवात्मनोरैक्यंपूजनं
सेवकेशयोः सर्वंब्रह्मेतिविदुषोनयोगोनचपू
जनं ब्रह्मज्ञानंपरंज्ञानंयस्यचित्तेविराजते किंत
स्यजपयज्ञाद्यैस्तपोभिर्नियमव्रतैः सत्यंविज्ञान
मानंदमेकंब्रह्मेतिपश्यतः स्वभावाद्ब्रह्मभूता
स्यकिंपूजाध्यानधारणा नपापंनैवसुकृतंनना
स्वर्गोनपुनर्भवः नापिध्येयोनवाध्यातासर्वंब्र
ह्मेतिजानतः अयमात्मासदामुक्तोनिर्लिप्तः स
र्ववस्तुषु किंतस्यबंधनंकस्मान्मुक्तिमिच्छंति
दुर्धियः स्वमायारचितंविश्वमवितर्क्यंसुरैरपि
स्वयंविराजतेतत्रत्वप्रविष्टःप्रविष्टवत् बहिर
न्तर्यथाकाशंसर्वेषामेववस्तुनाम् तथैवभा
तिसद्रूपोह्यात्मासाक्षीस्वरूपतः नबाल्यमस्ति
हन्तैवनात्मनोयौवनंजरा सदैकरूपश्चिन्मा
त्रोविकारपरिवर्जितः जन्मयौवनवार्द्धक्यंदेह
स्यैवतुचात्मनः पश्यंतोपिनपश्यंतिमायाप्राह
तबुद्धयः यथाशरावतोयस्थंरविंपश्यंत्यनेकधा

म॰ति॰
ते
१०३
103

तथैवमायया देहे बद्धयात्मानमीक्षते यथास
लिलचांचल्यं मन्यंते नाद्रुते विधौ तथैव बुद्धेश्चां
चल्यं पश्यंत्यात्मन्यकोविदाः घटस्थं यादृशं व्यो
म घटे भग्नेपि तादृशं नष्टे देहे तथैवात्मा समरूपो
विराजते आत्मज्ञानमिदं देवि परं मोक्षैकसाध
नं जानन्निहैव मुक्तः स्यात्सत्यं सत्यं न संशयः
न कर्मणा विमुक्तः स्यान्न संतत्या धनेन वा आत्म
नात्मानमाज्ञाय मुक्तो भवति मानवः प्रियो ह्या
त्मैव सर्वेषां नात्मनो ह्यपरं प्रियं लोकेस्मिन्नात्म
संबंधात्मवंत्यन्ये प्रियाः प्रिये ज्ञानं ज्ञेयं तथा ज्ञा
ता त्रितयं भाति मायया विचार्यमाणे त्रितये आ
त्मैवैकोवशिष्यते ज्ञानमात्मैव चिद्रूपो ज्ञेयमा
त्मैव चिन्मयः विज्ञाता स्वयमेवात्मा यो जानाति
स आत्मवित् एतत्ते कथितं ज्ञानं साक्षान्निर्वाण।
कारणं चतुर्विधावधूतानामेतदेव परं धनं श्री
देव्युवाच॥ द्विविधा वाश्रमाः प्रोक्ता गार्हस्थ्यो भैक्ष
कं तथा किमिदं श्रूयते चित्रमवधूताश्चतुर्वि
धाः श्रुत्वा वेदितुमिच्छामि तत्त्वतः कथय प्रभो।
चतुर्विधावधूतानां लक्षणानि विशेषतः ब्रह्मम
त्रोपासका ये ब्राह्मणक्षत्रियादयः गृहाश्रमे वसं

तोपिज्ञेयास्तेयतयःप्रिये पूर्णाभिषेकविधिनासं
स्कृतायेचमानवाः शैवावधूतास्तेज्ञेयाःपूजनीयाः
कुलार्चिते ब्राह्मावधूताःशैवाश्चस्वाश्रमाचारवर्ति
नः विदध्युःसर्वकर्माणिमदुदीरितवर्त्मना विना
नेवार्पितंचैतेनथाचकार्पितंविना निषिद्धमन्नंतोयं
चनगृह्णीयुःकदाचन ब्राह्मावधूतकौलानांकौ
लानामभिषेकिणां प्रागेवकथितोधर्मआचारश्च
वरानने स्नानंसंध्याशनंपानंदानंचदारसंग्रहणं
सर्वमार्गेनमार्गेनशैवब्राह्मावधूतयोः उक्तावधू
तोद्विविधःपूर्णापूर्णविभेदतः पूर्णःपरमहंसा
ख्यःपरिव्राडपरःप्रिये कृतावधूतसंस्कारोपदिस्या
त्तज्ञानदुर्बलः सदालोकालयेतिष्ठन्नात्मानंसंशो
धयेत रक्षन्स्वजातिचिह्नंचकुर्वन्कर्माणिकौलव
त् सदाब्रह्मपरोभूत्वासाधयेत्ज्ञानमुत्तमं ॐत
त् त्सम्मंत्रमुच्चार्यसोहमस्मीतिचिंतयन् कुर्यादा
त्मोचितंकर्मसदावैराग्यमाश्रितः कुर्वन्कर्माण्य
नासक्तोनलिनीदलनीरवत् यतेतात्मानमुद्धर्तुंत
त्वज्ञानविवेकतः ॐतत्सदितिमंत्रेणयोयत्कर्मस
माचरेत् गृहस्थोवाप्युदासीनंतस्याभीष्टायतद्भवे

म॰ति॰ त् जपो होमं प्रतिष्ठा च संस्काराद्यखिलाः क्रियाः
ते ॐ तत्सन्मंत्रतिष्ठत्वाः संपूर्णाः स्युर्न संशयः किम
१०४ न्यैर्बहुभिर्मंत्रैः किमन्यैर्भूरिसाधनैः ब्राह्मेणाने
10४ व मंत्रेण सर्वकर्माणि साधयेत् सुखसाध्यमवाङ्म
ल्यं संपूर्णफलदायकं नास्त्येतस्मान्महामंत्राद्रुपा
यांतरमं विके भूः प्रदेशे देहे वा लिखित्वा धारयेदि
मं गेहं तस्य महातीर्थं देहः पुण्यमयो भवेत् नि
गमागमतंत्राणां सारात्सारतरो मनुः ॐ तत्सदिति
देवेशि तवाग्रे मत्समीरितं ब्रह्मविष्णुमहेशानां भि
त्वा तालुशिरः शिवाः प्रादुर्भूतोयमों तत्सत्सर्वमं
त्रोत्तमोत्तमः चतुर्विधानाममन्त्रानामन्येषामपि वल्लु म
तो मंत्राद्यैः शोधनेनालं स्याद्वेदनेन शोधितं पक्षम
त्सर्वत्र सद्रूपं जपेत्तत्तन्महामनुम् स्वेच्छाचाराः शु
द्धचित्तः सएव मनु विकीलरात् जपादस्य भवेत्सिद्धो
मुक्तः स्यादर्थचिंतनात् साक्षाद्ब्रह्मसमो देही सा
र्थमेनं जपन्मनुम् त्रिपदोयं महामंत्रः सर्वकारण
कारणं साधनादस्य मंत्रस्य भवेन्मृत्युंजयः स्वयं पु
नः भुक्तपदं वापि प्रत्येकपदमेव वा जपेन्मंत्रस्य महे
शानि साधकः सिद्धिभाक् भवेत् शैवा वप्रतसंस्का

णविधूताखिलकर्मणः नापिदैवेनवापित्र्येनार्षे
कृत्येधिकारिता चतुर्णामवधूतानांतुरीयोहंसउ
च्यते त्रयोन्येयोगभोगाभ्यांमुक्ताः सर्वेशिवोपमाः
हंसोनकुर्यात्स्त्रीसंगंनवाधातुपरिग्रहं प्रारब्ध
मश्नन्विहरेन्निषेधविधिवर्जितः त्यजेत्स्वजाति
चिह्नानिकर्माणिगृह्यमेधिनां तुरीयोविचरेत्क्षोणीं
तिः संकल्पोनिरुद्यमः सदात्मभावसंतुष्टः शोका
मोहविवर्जितः निर्निकेतस्तितिक्षुः स्यान्निःशंको
निरुपद्रवः नार्पणंभक्ष्यपेयानांनतुसाध्यानधारणा
मुक्तोविरक्तोनिर्द्वंद्वोहंसाचारपरोयतिः इतितेकथि
तंदेविचतुर्णांकुलयोगिनां लक्षणंसविशेषेणसा
धूतांमत्स्वरूपिणां एतेषांदर्शनस्पर्शनादालापात्परि
तोषणात् सर्वतीर्थफलावाप्तिर्जायतेनात्रजन्मि
नां पृथिव्यांयानितीर्थानि पुण्यक्षेत्राणियानिच
कुलसंन्यासिनांदेहे संतितानिसदाप्रिये तेधन्यास्ते
कृतार्थाश्चतेपुण्यास्तेकृतायराः येरर्चिताःकुलद्रव्यै
र्मीनवैःकुलसाधवः श्वविर्यातिशुचितामस्पृश्यः
स्पृश्यतामियात् अभक्ष्यमपिभक्ष्यंस्यात्येषांसंस्पर्श
मात्रतः किराताःपापिनःक्रूराःपुलिंदायवनाःखा
लाः शुध्यंतियेषांसंस्पर्शात्तान्विनाकोन्यमर्चयेत्

म॰ति॰
तं
१०५
105

कुलतत्त्वैः कुलद्रव्यैः कौलिकान् कुलयोगिनः
येर्चयंति महाभक्त्या तेपि पूज्या महीतले कौलध
र्मात्परो धर्मो नास्त्येव कमलानने श्वपचोपि यमा
श्रित्य पूतः कौलपदं व्रजेत् करिपादे विलीयंते स
र्वप्राणिपदा यथा कुलधर्मे निमज्जंति सर्वे धर्मास्त
था प्रिये ब्रह्मोद्गणपतमाः कौलास्तीर्थस्वरूपाः स्वयं
प्रिये येऽद्भुतेत्यात्मसंबंधान् म्लेच्छश्वपचपामरा
न् गंगायां पतितांभांसि यांति गांगेयतां यथा कुला
चारे विशंतोपि सर्वे गच्छंति कौलतां यथार्णवगतं
वारि नष्टपूर्वभावमाप्नुयात् तथा कुलांबुधौ मग्ना
न भवेयुर्जनाः पृथक् विप्राद्यंत्यजपर्यंता हि पदा
येऽत्र भूतले ते सर्वेस्मिन् कुलाचारे भवेयुरधिका
रिणः आकृताः कुलधर्मेस्मिन् ये भवंति परंमुखाः
सर्वधर्मपरिभ्रष्टास्ते गच्छंत्यधमां गतिं प्रार्थयंति।
कुलाचारं ये केचिदपि मानवाः तान् वंचयन् कुली
नोपि रौरवं नरकं व्रजेत् चांडालं यवनं नीचं मत्वा
स्त्रियमवज्ञया कौलं न कुर्यात्तद्यः कौलः सोऽधमो या
त्यधोगतिं शताभिषेकानां यत्पुण्यं पुरश्चर्याशतेष्वपि
तस्मात्कोटिगुणं पुण्यमेकस्मिन् कौलिके कृते येवै
वर्णाः द्विजैः संति यत्र धर्ममुपाश्रिताः कौलाभ

वेतस्तेपाशैर्मुक्तायांतिपरंपदं शैवधर्माश्रिताःकौलाः
तीर्थरूपाःशिवात्मकाः स्नेहेनश्रद्धयाप्रेम्णापूज्यामा
न्याःपरस्परं बहुनात्रकिमुक्तेननवाग्रेसत्यमुच्यते॥
भवाब्धितरणेसेतुःकुलधर्मोहिनापरः क्षियंतेसंश
याःसर्वेक्षीयंतेपापसंचयाः दह्यंतेकर्मजालानि।
कुलधर्मनिषेवणात् सत्यव्रताब्रह्मनिष्ठाःकृपया
हृयमानवान् पावयंतिकुलाचारैस्तेज्ञेयाःकौलिको
त्तमाः इतितेकथितंदेविसर्वधर्मविनिर्णयं महा।
निर्वाणतंत्रस्यपूर्वार्द्धंलोकपावनं यइदंशृणुयान्नि
त्यंश्रावयेद्वापिमानवान् सर्वपापविनिर्मुक्तःसोन्ते
निर्वाणमाप्नुयात् सर्वागमानांतंत्राणांसारात्सारंप
रात्परम् तंत्रराजमिदंज्ञात्वाजायतेसर्वशास्त्रवित्
किंतस्यतीर्थभ्रमणैःकिंयज्ञैर्जपसाधनैः ज्ञानेनैत
न्महातंत्रंकर्मपाशैर्विमुच्यते सविज्ञःसर्वशास्त्रेषु
सर्वधर्मविदांवरः सज्ञानीब्रह्मवित्साधुर्यपतहेति
कालिके मूलवेदैःपुराणैश्चस्मृतिभिःसंहितादि
भिः किमन्यैर्बहुभिस्तंत्रैस्तैर्वेदंसर्वविद्भवेत् प्रासी
दृशस्तमंयन्मेसाधनंज्ञानमुत्तमं नवप्रश्ननतंत्रे
स्मिंस्तत्सर्वंसुप्रकाशितं यथात्वंब्राह्मणःशक्तिर्मम
प्राणाधिकापरा महानिर्वाणतंत्रंमेतथाजानीहि।

म॰ति॰
ते
१०६
106

स्यते यथानगेषु हिमवान् तारकासु यथा शशी
भास्वान् तेजःसु तंत्रेषु तंत्रराजमिदं तथा सर्वधर्ममयं
तंत्रं ब्रह्मज्ञानैकसाधनं पठित्वा पाठयित्वापि ब्रह्म
ज्ञानी भवेन्नरः विद्यते यस्य भवने सर्वतंत्रोत्तमोत्तमं
तंत्रं तस्य वंशे देवेशि पशुर्भवति कर्हिचित् अज्ञाना।
मितिरंधोपि मूर्खः कर्मजडोपि वा स एवैतन्महा
तंत्रं कर्मबंधाद्विमुच्यते पतनं तस्य पठनं श्रवणं पू
जनं तथा बंधनं परमेशानि नृणां कैवल्यदायकं
उक्तं बहुविधं तंत्रमेकैकाख्यानसंयुतं सर्वधर्मान्वि
तं तंत्रं नातः परतरं क्वचित् पातालचक्रं भूचक्रं ज्यो
तिश्चक्रसमन्वितं परार्द्धमस्य यो वेत्ति स सर्वज्ञो न
संशयः परार्द्धसहितं ग्रंथमेनं जानन्नरो भवेत् ॥
त्रिकालवार्ता त्रैलोक्यवृत्तांतं कथितं त्वमः संति तं
त्राणि बहुधा शास्त्राणि विविधान्यपि महानिर्वाण
तंत्रस्य कलां नार्हंति षोडशीम् महानिर्वाणतंत्रस्य
माहात्म्यं किं ब्रवीमि ते विदित्वैतन्महातंत्रं ब्रह्मनि
र्वाणमाप्नुयात् इति श्रीमहानिर्वाणतंत्रे सर्वतंत्रो
त्तमोत्तमे सर्वधर्मनिर्णयसारे श्रीदाद्यासदाशिव
संवादे पूर्वकांडे शिवलिंगस्थापनं चतुर्विधाव
धूतविवरणकथनं नाम चतुर्दशोल्लासः १४

पूर्वखांडसमाप्तम् शुभम् ॥ १ ॥ जम्बूपुर्य्यां सं· १९४९ वैक्रमे